CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुमतितन्त्रम्

(प्रथमो भागः)

त्रि. वि. प्र.
प्रदर्शन तथा बिक्री (खुट दत्मा) केन्द्र
भृकुटी मण्डप, काठमाडौं,

नयराजपन्तः
देवीप्रसादभण्डारी
दिनेशराजपन्तः

प्रकाशकम्
त्रिभुवनविश्वविद्यालयान्तर्गतं
पाठ्यक्रमविकासकेन्द्रम्
नेपाले काष्ठमण्डपे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्यौ. ६५६

सुमतितन्त्रम्

त्रि. वि. प्र. (प्रथमो भागः)
प्रदर्शन तथा बिक्री (छुट दरमां)
मृकुटी मण्डप, काठमाडौं

नयराजपन्तः
देवीप्रसादभण्डारी
दिनेशराजपन्तः

प्रकाशकम्
त्रिभुवनविश्वविद्यालयान्तर्गतं
पाठ्यक्रमविकासकेन्द्रम्
नेपाले काष्ठमण्डपे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

R
133-52
PAN

प्रकाशकम्

त्रिभुवनविश्वविद्यालयान्तर्गतं
पाठ्यक्रमविकासकेन्द्रम्

(अस्य सर्वेऽधिकारास्त्रिभुवनविश्वविद्यालयान्तर्गतेन पाठ्यक्रमविकासकेन्द्रेण स्वायत्तीकृताः)

प्रथमे संस्करणे ५०० पुस्तकानि

२०३५ वैक्रमाब्द आषाढमासस्य ८ दिवसे
१९७८ क्रैस्तवाब्दे जूनमासस्य २२ दिवसे

92265

मूल्यम्

मुद्रकः

त्रिभुवनविश्वविद्यालयमुद्रणालयः
काष्ठमण्डपे कीर्तिपुरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समर्पणम्

मासो भवेच् शीतकरप्रसङ्गाद्
ऋतुर्भवेत् तीक्ष्णकरप्रसङ्गात् ।
चान्द्री च सौरी च गतिस्तदर्थं
स्याच् चिन्तनीया समयप्रबुद्ध्यै ॥१॥
तद्बोधहेतोः प्रणिनाय शास्त्रं
यो ज्यौतिषं वेदविभागरूपम् ।
महात्मनः श्रीलगधस्य तस्य
स्मृतिः सदा स्ताद् हृदयेऽस्मदीये ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशकीय

आगामी २०४० सालसम्ममा राष्ट्रभाषा नेपालीलाई उच्च शिक्षाका सबै तहमा शिक्षणको माध्यम बनाउने त्रि. वि. को लक्ष्यलाई ध्यानमा राखी यस केन्द्रले प्रत्येक आर्थिक वर्ष विज्ञान एवं प्रविधि र अन्य क्षेत्रका लागिसमेत आवश्यक पाठ्यपुस्तक र सन्दर्भसामग्री जति सक्यो चाँडो र बढी सङ्ख्यामा तयार गर्ने योजना बनाएको छ । यस योजनाको कार्यान्वयन जगैदेखि बलियो हुन सकोस् भन्ने अभिप्रायले प्रमाणपत्र तहका पुस्तक अपरिहार्य अवस्थामा बाहेक अन्य अवस्थामा नेपालीमै लेखाउन थालिएको छ ।

यसै सिलसिलामा नेपालका एक मूर्धन्य विद्वान् प्राध्यापक श्रीनयराज पन्तज्यूले र उहाँको प्रौढ निर्देशनमा उहाँकै दुइजना सहयोगी श्रीदेवीप्रसाद भण्डारी र श्रीदिनेशराज पन्तद्वारा सम्पादित मूलपाठ, संशोधित पाठ, नेपाली अनुवादसहितको सुमतितन्त्रनामक पुस्तक स्नातकोत्तर तहका निमित्त सन्दर्भ पुस्तकका हिसाबले पाठकवृन्दको सेवामा प्रस्तुत गर्ने यस केन्द्रको योजना छ । सुमतितन्त्रको पहिलो भाग यो हो । दोस्रो र तेस्रो भाग पनि क्रमशः प्रकाशित हुनेछन् ।

यसका लेखकहरूको संक्षिप्त परिचय यसै पुस्तकको पछाडिको जिल्दमा दिइएको छ । पुस्तक मुद्रणावस्थामा छँदा प्रुफ हेर्ने काम श्रीदेवीप्रसाद भण्डारी र श्रीदिनेशराज पन्तले गर्नुभएको हो । लेखकत्रयलाई हार्दिक धन्यवाद ज्ञापित गर्दै उहाँहरूलाई अझ प्रोत्साहित गर्ने दायित्व हामी पाठकवर्गकै जिम्मामा छोड्दछौँ ।

यस केन्द्रको मूल लक्ष्य विद्यार्थीहरूको ज्ञानको विस्तारका निमित्त जति सक्यो चाँडो र सरल मूल्यमा गहन पाठ्यपुस्तक तथा सन्दर्भसामग्रीसमेत दिँदै जाने भएकोले यस क्षेत्रमा गरिएका सम्पूर्ण प्रयासमाथि विज्ञजनको समालोचनात्मक दृष्टि पुग्ने नै छ र त्यहीअनुसार मार्गदर्शन पाउँदै जानेछौँ भन्ने हामी विश्वास राख्छौँ ।

वि. सं. २०३५ आषाढ ८ गते बृहस्पतिवार
इ. सं. जून २२, १९७८

निर्देशक

पाठ्यक्रम विकास केन्द्र

त्रि. वि. कीर्तिपुर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताडपत्रोपलब्धः

सुमतितन्त्रसंज्ञः

सिद्धान्तज्यौतिषग्रन्थः

(परिशिष्टसहितः)

त्रिभुवनविश्वविद्यालयान्तर्गतस्य
संस्कृताध्ययनसंस्थानस्य
नियोगेन

नयराजपन्तेन

देवीप्रसादभण्डारिणो दिनेशराजपन्तस्य च

सहायतामवलम्ब्य सम्पादितः

त्रिभुवनविश्वविद्यालयान्तर्गतेन
पाठ्यक्रमविकासकेन्द्रेण
प्रकाशितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयसूची

पृष्ठसङ्ख्याः

समर्पणम्
प्रकाणकीय

प्रस्तावना १-३१

ग्रन्थस्याऽभिधेयः २-१२
ग्रन्थरचनास्थानम् १३-१९
सुमतितन्त्रस्य लाभाद् निष्पन्नं फलम् २०-२४
नेपालस्येतिहासस्योद्धारः २५-२८

सुमतितन्त्रस्य मध्यमाधिकारः ३-३६
सुमतितन्त्रस्य स्पष्टाधिकारः ३७-९९
सुमतितन्त्रस्य त्रिप्रश्नाधिकारः १००-१६६
सुमतितन्त्रस्य चन्द्रग्रहणाधिकारः १६७-२०५
सुमतितन्त्रस्य सूर्यग्रहणाधिकारः २०६-२२९
सुमतितन्त्रस्य ब्रह्माण्डाधिकारः २३०-२३७
सुमतितन्त्रस्य सारण्यादिकम् २३८-२६८
सुमतितन्त्रस्य मध्ये प्रक्षिप्तं पत्रत्रयम् २६९-२७३

सुमतिकरणम् (१ परिशिष्टम्) १-२७
सुमतिसिद्धान्तः (२ परिशिष्टम्) २९-१९०
सुमतिकरणम् (३ परिशिष्टम्) १९१-२२६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रस्तावना

वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्व्या विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं
यो ज्यौतिषं वेत्ति स वेद यज्ञान् ॥३॥

(वेदाङ्गज्यौतिषम्)

सुमतितन्त्रनामकं ताडपत्रे लिखितं पुस्तकं नेपालराष्ट्रियाभिलेखालयमध्यास्ते (वीरपुस्तकालयस्य चतुर्थे विभागे ५७ सङ्ख्या) । तत्र १५२ पत्राणि सन्ति । तेषां पत्राणां १४. ७ अङ्गुलमितं दैर्घ्यं २. ८ अङ्गुलमिता विस्तृतिर्वर्तते । प्रतिपत्रं पृष्ठद्वयेऽपि लेखो वर्तते । प्रतिपृष्ठं पञ्चावराः सप्तपराः पङ्क्तयः सन्ति । प्रतिपङ्क्ति च षट्त्रिंशदवराणि षट्पञ्चाशत्पराण्यक्षराणि सन्ति । परीक्षकाणां सुबोधाय ६ पृष्ठानामत्र प्रतिच्छवयः प्रकाश्यन्ते ।

अस्मिन् पुस्तके द्विषष्टितमपत्रपर्यन्तं प्राचीना लिपिर्वर्तते । ततः समाप्तिपर्यन्तं किञ्चिन्नवीना लिपिर्वर्तते । अत्रत्यां लिपिं भुजिमोल इति तद्विदः कथयन्ति । द्विषष्टितमपत्रपर्यन्तं पत्रसङ्ख्या अक्षराङ्कैर्लिखिताः सन्ति । तादृशा एवाऽङ्का लिच्छवीनामभिलेखेषूपलभ्यन्ते । त्रिषष्टितमात् पत्रात् समाप्तिपर्यन्तं पत्रसङ्ख्या दशमलवपद्धतिमनुसृत्य वर्तमानकाले प्रचलितया पद्धत्या लिखिताः सन्ति । येषु पत्रेषु प्राचीनया रीत्या पत्रसङ्ख्या लिखिताः, तेषु पत्रेष्वपि ग्रहाणां भगणादिसङ्ख्या नवीनया रीत्यैव लिखिताः सन्ति ।

अस्य ग्रन्थस्याऽन्तिमे भागे

ॐ अद्यः वाराहकल्पे वैवस्वतमन्वन्तरै । कलो युगै भरतखण्डै जाम्बूदीपे हिमवन्तपार्श्वे आर्यावर्तदेशै पुण्यभूमौ । वाग्मतीदक्षिणकुले वाश्वकीक्षेत्रे पशुपतिस -- ने श्रीमच्छ्रीनेपालपत्तने ॥ शुभमस्तु सर्व्वजगताः ॥

१ नेपालाब्द शरच्छिद्रवेदं
पोषाशितापक्षत्रिदशै तिथौ यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२ माराध्यमारम्भमादिवारं
नेऋत्यृशमृक्षं योग ध्रुवं वरं ।।
१ शुभ ।।

इति लिखितं वर्तते ।

अस्य भागस्याऽस्माभिः संशोधितः पाठः

ॐ अद्य वाराहकल्पे वैवस्वतमन्वन्तरे कलौ युगे जम्बूद्वीपे भरतखण्ड आर्यावर्तदेशे हिमवत्पार्श्वे पुण्यभूमौ वाग्वतीदक्षिणकूले वासुकिक्षेत्रे पशुपतिसन्निधाने श्रीमति नेपालपत्तने लिखितम् । शुभमस्तु सर्वजगताम् ।

शराङ्कवेदै ४९५ स्तुलिते नेपालाभिधवत्सरे ।
पौषे कृष्णे त्रयोदश्यां रवौ निर्ऋतिभे ध्रुवे ।।
द्विरारम्भात् प्रतिलिपेर्ग्रन्थोऽयं पूर्णतामगात् ।

अस्य दिनस्याऽस्माभिर्गणितं पञ्चाङ्गमधः प्रदर्श्यते–

नेपालसंवत्सरः ४९५ (विक्रमसंवत्सरः १४३१)

पौषकृष्णे (पूर्णान्तमानेन माघकृष्णे)

सौरस्य माघस्य वासरः तिथिः घट्यः पलानि नक्षत्रम् घट्यः पलानि योगः घट्यः पले दिवसः

५ आदित्यः त्रयोदशी ५२। २८ ज्येष्ठा ६। १३ ध्रुवः ३०। २

ज्येष्ठाया घट्यादेः ६ । १३ अनन्तरं मूलनक्षत्रेऽस्य ग्रन्थस्य प्रतिलिपिः समाप्ता ।

पशुपतिसन्निधाने वाग्वत्या दक्षिणे कूले ग्रन्थस्य प्रतिलिपिः समाप्तेत्यत्र दर्शनात् ललितपुरे वसता लिपिकरेण रूपाग्निशक्र १४३१ मिते वैक्रमाब्दे सौरस्य माघस्य पञ्चमे दिवसे ग्रन्थस्य प्रतिलिपिः समाप्तेति स्फुटीभवति । अयं प्रतिलिपिसमाप्तिकालोऽन्तिमभागस्य । अस्य ग्रन्थस्य पश्चिमभागस्य प्रतिलिपेः पूर्वैः कतिभिर्वर्षैः पूर्वभागस्य प्रतिलिपिर्बभूवेति निश्चेतुं दृढं प्रमाणं नोपलभ्यते ।

ग्रन्थस्याऽभिधेयः

सूर्यसिद्धान्तमध्येषु दध्नो घृतमिवोद्धृतं ।
नाम्ना तु सुमतितन्त्रं सिद्धान्तस्य समद्भुतम् ।।

प्र. २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्तथा कथयिष्यामि श्रृणु वक्ष्यामि सुव्रते ॥ : ॥

(सुमतितन्त्रे ताडपत्रे १ ख पत्रे)

संशोधितः पाठः

यथाश्रुतं शास्त्रमेतद् वक्ष्यामि श्रृणु सुव्रत ।
सुमते सूर्यसिद्धान्ताद् दध्नो घृतमिवोद्धृतः ॥
सारः सुमतितन्त्राख्यः सिद्धान्तोऽयं भविष्यति ।

अत्र सूर्यसिद्धान्तस्य सारः सुमतितन्त्रमिति स्फुटं लिखितं वर्तते । अतो वर्तमानकाले समुपलभ्यमाने सूर्यसिद्धान्ते निर्दिष्टैर्ग्रहभगणैः सुमतितन्त्रोक्ता ग्रहभगणाः सङ्गच्छन्ते वा नेति विचार्यते ।

युगे सूर्यज्ञशुक्राणां खचतुष्करदार्णवाः ४३२०००० ।
कुजार्किगुरुशीघ्राणां भगणाः पूर्वयायिनाम् ॥२९॥
इन्दो रसाग्नित्रित्रीषुसप्तभूधरमार्गणाः ५७७५३३३६ ।
दस्त्रत्र्यष्टरसाङ्काक्षिलोचनानि २२९६८३२ कुजस्य तु ॥३०॥
बुधशीघ्रस्य शून्यर्तुखाद्रित्र्यङ्कनगेन्दवः१७९३७०६० ।
बृहस्पतेः खदस्राक्षिवेदषड्वह्नय ३६४२२० स्तथा ॥३१॥
सितशीघ्रस्य षट्सप्तत्रियमाश्विखभूधराः ७०२२३७६।
शनेर्भुजङ्गषट्पञ्चरसवेदनिशाकराः १४६५६८ ॥३२॥
चन्द्रोच्चस्याऽग्निशून्याश्विवसुसर्पार्णवा ४८८२०३ युगे ।
वामं पातस्य वस्वग्नियमाश्विशिखिदस्त्रकाः २३२२२८ ॥३३॥
उदयादुदयं भानोर्भूमिसावनवासरः ॥३६॥
वसुद्वयष्टाद्रिरूपाङ्कसप्ताद्रितिथयो १५७७९१७८२८ युगे ... ॥३७॥

(सूर्यसिद्धान्ते मध्यमाधिकारे)

१ कोष्ठः

अतः सूर्यसिद्धान्तानुसारम्
४३२०००० सौरवर्षेषु

सूर्यभगणाः	४३२००००
चन्द्रभगणाः	५७७५३३३६

प्र. ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मङ्गलभगणाः	२२९६८३२
बुधशीघ्रोच्चभगणाः	१७९३७०६०
बृहस्पतिभगणाः	३६४२२०
शुक्रशीघ्रोच्चभगणाः	७०२२३७६
शनैश्चरभगणाः	१४६५६८
चन्द्रमन्दोच्चभगणाः	४८८२०३
चन्द्रपातभगणाः	२३२२३८
सावनदिनानि	१५७७९१७८२८
	भवन्ति ।

मूलपाठः

मध्यमश्च भवेत्तत्र सूर्यादीनां यथाक्रमम् ।
आदित्यस्य खशून्याभ्रवेमपिण्डबलाहकैः
चन्द्रस्याब्धियुगाग्न्यग्निरूपखैकगुणास्विभिः ।
चन्द्रोच्चस्य रसाष्टाष्टदस्त्रभूतवटंकुभिः
कोषाग्निरन्ध्रमातङ्गपक्षकू – तमस्य तु ।
अङ्गारस्य रसाङ्काश्विसप्तनागमहीवटैः ।
ज्ञस्य व्योमखशून्याष्टवेदसप्तभुविस्वरैः ।
वाक्षतेर्नभनागाष्टकोषपञ्चनदीकुभिः ।
भार्गवस्य यमाक्षेषुच्छिद्रभद्रखपिण्डकैः ।
सौरस्यर्तुशरोपक्षाकोषयूथपपञ्चभिः ।
भागैर्शून्यखसूर्याद्रिकोषरुद्रगुणार्तुभिः ।

तस्य सूत्रस्याङ्क	
भानोर्द्युगण गुण	१७२८००००
इन्दोर्गुण	२३१०१३३४४
चन्द्रोच्चस्य गुण	१९५२८८६
पातस्य गुण	९२८९३६
अङ्गारस्य गुण	९१८७२९६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञस्य गुण	७१७४८०००
जीवस्य गुण	१४५६८८०
शुक्रस्य गुण	२८०८९५५२
सौरस्य गुण	५८६२५६
सर्वग्रहमध्यमसाधने भागाहार	६३११६७१२००॥

(सुमतितन्त्रे ताडपत्रे १० ख, ११ क पत्रयो

संशोधितः पाठः

मध्यमानयनं वक्ष्ये सूर्यादीनां यथाक्रमम् ।
आदित्यस्य खशून्याभ्रव्योमपिण्डबलाहकाः १७२८०००० ॥
चन्द्रस्याऽब्धियुगाग्न्यग्निरूपखैकगुणाश्विनः २३१०१३३४४ ।
चन्द्रोच्चस्य रसाष्टाष्टदस्रभूताङ्कभूमयः १९५२८८६ ॥
चन्द्रपातस्य कोषाग्निरन्ध्रनागाश्विखेचराः ९२८९३६ ।
भूपुत्रस्य रसाङ्काश्विसप्तनागकुखेचराः ९१८७२९६ ॥
ज्ञशीघ्रोच्चस्य खाभ्राभ्रनागाब्धिमेघपर्वताः ७१७४८००० ।
वाक्पतेः शून्यनागाष्टकोषपञ्चाब्धिभूमयः १४५६८८० ॥
शुक्राशूच्चस्य नेत्रेषुबाणाङ्काष्टखपिण्डकाः २८०८९५५२ ।
सौरस्य रसबाणद्विरसमातङ्गसायकाः ५८६२५६ ॥
गुणाः प्रोक्ता द्युपिण्डस्य भगणादिग्रहाप्तये ।
भाजकः खाभ्रसूर्याद्रिकोषरुद्रगुणर्तवः ६३११६७१२०० ॥

अस्य सूत्रस्याऽङ्कव्याख्या ।
द्युगणस्य गुणकाः कथ्यन्ते ।

भानोर्गुणकः	१७२८००००
इन्दोर्गुणकः	२३१०१३३४४
चन्द्रोच्चस्य गुणकः	१९५२८८६
चन्द्रपातस्य गुणकः	९२८९३६
अङ्गारकस्य गुणकः	९१८७२९६
ज्ञशीघ्रोच्चस्य गुणकः	७१७४८०००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवस्य गुणकः	१४५६८८०
शुक्रशीघ्रोच्चस्य गुणकः	२८०८९५५२
सौरस्य गुणकः	५८६२५६
सर्वेषां भाजकः	६३११६७१२००

एवं भगणादयो मध्यमा ग्रहा भवन्ति ।

२ कोष्ठः

अतः सुमतितन्त्रानुसारम्

१७२८०००० सौरवर्षेषु

सूर्यभगणाः	१७२८००००
चन्द्रभगणाः	२३१०१३३४४
चन्द्रमन्दोच्चभगणाः	१९५२८८६
चन्द्रपातभगणाः	९२८९३६
मङ्गलभगणाः	९१८७२९६
बुधशीघ्रोच्चभगणाः	७१७४८०००
बृहस्पतिभगणाः	१४५६८८०
शुक्रशीघ्रोच्चभगणाः	२८०८९५५२
शनैश्चरभगणाः	५८६२५६
सावनदिनानि	६३११६७१२००

भवन्ति ।

सूर्यसिद्धान्ते ४३२०००० सौरवर्षाणां ग्रहभगणा निर्दिष्टाः सन्ति । सुमतितन्त्रे १७२८०००० सौरवर्षाणां ग्रहभगणा निर्दिष्टाः सन्ति । अतस्तुलनार्थं सुमतितन्त्रस्थान् ग्रहभगणांश्चतुर्भिर्भक्त्वाऽधःस्थः कोष्ठको रचितो वर्तते ।

३ कोष्ठः

४३२०००० सौरवर्षेषु

	सुमतितन्त्रानुसारम्	सूर्यसिद्धान्तानुसारम्
सूर्यभगणाः	४३२००००	४३२००००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रभगणाः	५७७५३३३६	५७७५३३३६
चन्द्रमन्दोच्चभगणाः	४८८२२१.५	४८८२०३
चन्द्रपातभगणाः	२३२२३४	२३२२३८
मङ्गलभगणाः	२२९६८२४	२२९६८३२
बुधशीघ्रोच्चभगणाः	१७९३७०००	१७९३७०६०
बृहस्पतिभगणाः	३६४२२०	३६४२२०
शुक्रशीघ्रोच्चभगणाः	७०२२३८८	७०२२३७६
शनैश्चरभगणाः	१४६५६४	१४६५६८
सावनदिनानि	१५७७९१७८००	१५७७९१७८२८

अत्राऽस्य कोष्ठकस्य दर्शनेन सुमतितन्त्रोक्तानि ग्रहयुगभगणा युगसावनदिनानि च सूर्यसिद्धान्तोक्तैर्ग्रहयुगभगणैर्युगसावनदिनैश्च न सङ्गच्छन्त इति स्फुटम् । सूर्यचन्द्रबृहस्पतीनां भगणसाम्यदर्शनेऽपि युगसावनदिनानां भेदात् तेषां गतयोऽपि परस्परं न सङ्गच्छन्त इति स्फुटम् ।

अतः संप्रति प्रसिद्धः सूर्यसिद्धान्तः सुमतितन्त्रोक्तः सूर्यसिद्धान्तो नेति स्फुटीभवति ।

पञ्चचतुर्नवरूप १९४५ मिते वैक्रमाब्द आचार्येण थीबोमहाशयेन महामहोपाध्यायेन सुधाकरद्विवेदिना च सम्भूय पञ्चसिद्धान्तिका प्रकाशिता । ताभ्यां तदीयं व्याख्यानं चोपलब्धोपकरणानुरूपं विदधे । तदनु त्रिपञ्चनवरूप १९५३ मिते वैक्रमाब्दे श्रीमता शङ्करबालकृष्णदीक्षितमहोदयेन स्वकीये भारतीयज्यौतिषनाम्नि ग्रन्थे पञ्चसिद्धान्तिकास्था विषयाः पाण्डित्यपूर्णया रीत्या विवेकपथमानीताः । थीबोसुधाकराभ्यां संशोधिताः पाठा दीक्षितमहोदयेन कुत्रचित् स्वीकृताः कुत्रचिदन्ये पाठाः स्वयं रचिता इति दीक्षितग्रन्थाज् ज्ञायते । तदनु विरचिता पञ्चसिद्धान्तिकाविषयका ग्रन्था अस्माभिर्नोपलब्धाः ।

पौलिशरोमकवासिष्ठसौरपैतामहास्तु सिद्धान्ताः ।
पञ्चभ्यो द्वावाद्यौ व्याख्यातौ लाटदेवेन ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पौलिशकृतः स्फुटोऽसौ तस्याऽसन्नस्तु रोमकः प्रोक्तः ।
स्पष्टतरः सावित्रः परिशेषौ दूरविभ्रष्टौ ॥४॥

(पञ्चसिद्धान्तिकायां प्रथमेऽध्याये)

वर्तमानकाले प्रचलितस्य सूर्यसिद्धान्तस्य भगणाः सुमतितन्त्रोक्तस्य सूर्यसिद्धान्तस्य भगणाश्च साम्यं न वहन्तीत्यस्माभिः पूर्वं लिखितमेव । अतः परं वराहमिहिरेण स्पष्टतर इति स्वीकृते सूर्यसिद्धान्ते सुमतितन्त्रोक्ते सूर्यसिद्धान्ते च साम्यं वर्तते वा नेति विचार्यते ।

मूलपाठः

द्युगणेर्केष्टशतघ्ने विपक्षवेदार्णवेर्कसिद्धांते ।
स्वरखाद्विधिनवयमोद्धृते क्रमाद्दिनदलेवत्यां ॥१॥

(पञ्चसिद्धान्तिकायां नवमेऽध्याये)

थीबोसुधाकराभ्यां संशोधितः पाठः

द्युगणेऽर्कोऽष्टशत ८०० घ्ने विपक्षवेदार्णवे ४४२ऽर्कसिद्धान्ते ।
स्वरखद्विद्विनवयमो २९२२०७ द्धृते क्रमाद् दिनदलेऽवन्त्याम् ॥१॥

(अत्र सङ्ख्या अस्माभिः स्थापिताः ।)

अत्र वराहमिहिरेण सौरवर्षाणामष्टशत्या २९२२०७ सावनदिनानि स्वीकृतानि । अतः

४३२०००० ÷ ८०० = ५४००

२९२२०७
× ५४००
११६८८२८
१४६१०३५
१५७७९१७८००

अतो वराहमिहिरस्वीकृतसूर्यसिद्धान्तानुसारं ४३२०००० सौरवर्षेषु १५७७९१७८०० सावनदिनानि भवन्ति, तावत्सु सौरवर्षेषु तावन्त्येव सावन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिनानि सुमतितन्त्रानुसारं भवन्तीति तृतीयकोष्ठाज् ज्ञायते । अतो वराह-मिहिरस्य सूर्यसिद्धान्तः सुमतितन्त्रोक्तः सूर्यसिद्धान्तश्च एक एवेति प्रतिभाति ।

मूलपाठः

वर्षायुते धृतिघ्ने नववसुगुणरसरसाः स्युरधिमासाः ।
सावित्रे शरनवखेंद्रि[या]र्णवाशास्तिथिप्रलयाः ॥१४॥

(पञ्चसिद्धान्तिकायां प्रथमेऽध्याये)

थीबोसुधाकराभ्यां संशोधितः पाठः

वर्षायुते धृतिघ्ने १८०००० नववसुगुणरसरसाः६६३८९ स्युरधिमासाः।
सावित्रे शरनवखेन्द्रियार्णवाशा १०४५०९५ स्तिथिप्रलयाः ॥१४॥

अत्र वराहमिहिरेण सूर्यसिद्धान्तानुसारं

१८०००० सौरवर्षेषु
६६३८९ अधिमासाः
१०४५०९५ अवमदिनानि

स्वीकृतानि ।

मूलपाठः

कल्याब्ध सन्ताडित दस्ररूपा
– त्रादिकम्मासयुतं द्विसंस्थं
सङ्गुण्य कूपाष्टगुणाङ्गस्वादैः
खखाभ्रशून्याष्टियमैर्विभक्ता
लब्धाधिमासैस्तु विमिश्र राशौ
त्रिंशङ्गुण – क्लतिथिविमिश्रैः
द्विस्थ घ्न लोकाद्रिरसाङ्कस्वादैः ।
भक्तङ्गजाद्रच्यूडुशराब्दिवेदैः
लब्दावमं शोध्य तदूर्द्धराशौ ॥
सप्ताप्तशेषान्तु सितादि – म् ॥०॥

प्र. ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य सूत्रस्याङ्कः

गताब्द गुण १२ चैत्रादिमासयुत द्विधाधरि गुण ६६३८९ भाग २१६०००० फल उपरिमराशौ योज्य - - ३० द्विधा गुण ६९६७३ भाग ४४५२७७८ फल ऊर्द्धे शोध्य । शेष सितादि द्युगण ।।०।।

(सुमतितन्त्रे ताडपत्रे ८ क-८ ख पत्रे)

संशोधितः पाठः

कलेर्गताब्दा रविभि १२ र्विनिघ्ना-
श्चैत्रादिमासैः सहिता व्यतीतैः ।
स्युः सौरमासा अथ सौरमासा
हता नवेभत्रिविपक्षकोषैः ६६३८९ ।।
खशून्यशून्याभ्रषडिन्दुपक्षै २१६०००० -
र्भक्ता भवेयुर्ह्यधिमासकास्तैः ।
सौराख्यमासाः सहिता विधेयाः
स्युश्चान्द्रमासाः खगुणै ३० र्हतास्ते ।।
शुक्लादिकाभिस्तिथिभिर्गताभि-
र्योज्याः प्रसिद्ध्येद् निचयस्तिथीनाम् ।
तिथीचयस्त्र्यद्रिषडङ्कषड् ६९६७३ घ्नो
भक्तो गजागोडुशराब्धिवेदैः ४४५२७७८ ।।
लब्धैः क्षयाहैः शशिवत्रसङ्घो
हीनो विधेयो द्युगणः प्रसिद्ध्येत् ।
शुक्रादिकः स्याद् द्युगणोऽत्र सिद्धः
परीक्षकः स्याद् द्युगणस्य वारः ।।

अस्य सूत्रस्याऽङ्कव्याख्या ।

कलिगताब्दाः १२ गुणाश्चैत्रादिगतमासयुताः कार्याः, सौरमासाः स्युः । सौरमासाः ६६३८९ गुणाः २१६०००० भाज्याः, अधिमासा लभ्यन्ते । सौरमासा अधिमासैर्योज्याः, चान्द्रमासा भवन्ति । चान्द्रमासाः ३० गुणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्तमानस्य मासस्य शुक्लादिगततिथिभिर्युक्ताः कार्याः, तिथिगणः स्यात्। तिथिगणः ६९६७३ गुणः ४४५२७७८ भाज्यः, अवमाहा लभ्यन्ते। अवमाहै-रूनितस्तिथिगणः सावनाहर्गणो भवति। सावनाहर्गणं ७ तक्ष्णुयात्। ० शेषे शुक्रवारः १ शेषे शनिवार इति क्रमेण वारः स्यात्। वारेणाऽहर्गणपरीक्षा कार्या।

अत्र
सौरमासाः = २१६००००
अधिमासाः = ६६३८९

इति स्वीकृतम्।

२१६०००० ÷ १२ = १८००००

अतः १८०००० सौरवर्षेषु ६६३८९ अधिमासा भवन्ति। वराहमिहिरेणाऽपि सूर्यसिद्धान्तानुसारं तथैव कथितम्।

चान्द्रदिनानि = ४४५२७७८
अवमदिनानि = ६९६७३

६९६७३) १०४५०९५ (१५
६९६७३
३४८३६५
३४८३६५

४४५२७७८
× १५
२२२६३८९०
४४५२७७८
६६७९१६७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतः

चान्द्रदिनानि = ६६७९१६७०
अवमदिनानि = १०४५०९५

६६७९१६७० ÷ ३० = २२२६३८९

चान्द्रमासाः = २२२६३८९
अधिमासाः = −६६३८९
सौरमासाः = २१६००००

अतः

सुमतितन्त्रानुसारम्

सौरमासाः = २१६००००
अधिमासाः = ६६३८९
अवमदिनानि = १०४५०९५

इति सिद्ध्यति ।

अतः

सौरवर्षाणि = १८००००
अधिमासाः = ६६३८९
अवमदिनानि = १०४५०९५

अतो वराहमिहिरेण सूर्यसिद्धान्तानुसारं १८०००० सौरवर्षेष्वधिमासावमनानां याः सङ्ख्याः कथिताः, ता एव सङ्ख्याः सुमतितन्त्रकारेण प्रतिपादिता ते स्फुटीभवति ।

प्र. १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रन्थरचनास्थानम्

मूलपाठः

इह दीपेक्ष २७

(सुमतितन्त्रे ताडपत्रे ६१ क पत्रे)

संशोधितः पाठः

अस्मिन् देशेऽक्षांशाः २७

मूलपाठः

-- षेन प्रवक्ष्यामि कन्यादीपस्य निश्चयम्
तृप्रश्ने यत्प्रयुज्यन्ते छायादीनाम्प्रवक्ष्यते ॥
शतांश --- च्छाया षट्शतैकादशाधिके ॥
लोकर्तुशून्यलोकञ्च लम्बकज्या प्रकीर्तिता ॥
रूपकोशे --------- तिता ।
शून्ययुग्मरसैकञ्च स्वाक्षांशञ्च विनिर्दिशेत् ।
पञ्चर्त्वग्नि गजाङ्काश्वि वह्नयदस्र ---
मेषाद्या मिथुनान्तानि चरप्राणञ्च प्रवर्त्तते ॥
एवमादीनि रंम्य च कंन्यादीपे प्रवर्त्तति ॥

अस्या –

– ११	विशुवमध्याच्छाय ।
३०६३	लम्बक ।
१५६१	अक्षज्या
१६२०	अक्षांशक ।
३६५	मेषस्य च प्राण
२९८	वृषस्य च प्राण
१२३	युग्मस्य च प्राण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राश्योदयं प्रवक्ष्यामि
मध्योदयञ्च संस्थाप्य क्रमेनोक्रमशस्तथा ।
चारप्राणान्तथैवञ्च क्रमेन रुत्क्रमेन च ।
मेषवृषभयुग्मञ्च । युग्मवृषभमन्मथा: ।
मध्योदये चरप्राणां क्रमस्थाने विशोधयेत् ।
उत्क्रमे योजयित्वा तु स्वदेशभवनोदयां ॥०॥
सर्वत्र मेषादीकन्यान्त उत्क्रमेण तुलादय: ॥०॥

अस्य सूत्रस्याङ्क:
मध्योदयप्राणपिण्डाणां मेषादिकन्यन्तानां लिख्यन्ते ।
१६६९ । १७९५ । १९३६ । १९३६ । १७९५ । १६६९ ॥

तथैव चरप्राण लिख्यन्ते ।
३६५ । २९८ । १२३ । १२३ । २९८ । ३६५ ॥

तथैव स्वदेशभुवनोदय लिख्यन्ते ।
१३०४ । १४९७ । १८१३ । २०५९ । २०९३ । २०३४ ॥

अपरञ्च विलिप्तभवनोदयं लिख्यन्ते ।
२१७ । २४९ । ३०२ । ३४३ । ३५० । ३४९ ॥

(सुमतितन्त्रे ताडपत्रे ६५ क–६६ क पत्रयो:)

संशोधित: पाठ:
कन्याखण्डैकभागस्य धृतवर्णाश्रमस्थिते: ।
नेपालद्रोण्यभिख्यस्य देशस्याऽस्य विशेषत: ॥
त्रिप्रश्नोक्तविधानेन च्छायादीनां प्रसिद्धये ।
प्रवक्ष्यन्तेऽक्षभाऽक्षांशचरप्राणादय: क्रमात् ॥
विषुवद्दिनमध्याह्ने द्वादशा १२ ङ्गुलशङ्कुजा ।
छाया भवेच् शतेनाप्ता षट्शत्येकादशाधिका $\frac{६११}{१००}$ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोकर्तुशून्यज्वलना ३०६३ लम्बकज्या प्रकीर्तिता ।
रूपकोषशरक्षोण्यः १५६१ पलांशज्या प्रकीर्तिता ॥
व्योमबाहुरसक्षोण्यः १६२० स्मृता अक्षांशजाः कलाः ।
सप्तदोर्भिः २७ परिमिताः स्मृता अक्षभवा लवाः ॥
पञ्चर्तुराभा ३६५ नागाङ्कबाहवो २९८ रामभास्कराः १२३ ।
मेषादिमिथुनान्तानां चरप्राणाः क्रमात् स्मृताः ॥

अस्य सूत्रस्याऽङ्कव्याख्या ।

कन्याखण्डान्तर्गतायां नेपालद्रोण्याम्

पलभा	६११/१८८
लम्बज्या	३०६३
अक्षज्या	१५६१
अक्षांशकलाः	१६२०
अक्षांशाः	२७
मेषस्य चरप्राणाः	३६५
वृषस्य चरप्राणाः	२९८
मिथुनस्य चरप्राणाः	१२३

निजे देशे प्रवक्ष्यामि राशीनामुदयानथ ।
मध्योदयाः स्थापनीयाः क्रमादुत्क्रमतोऽपि च ॥
चरप्राणाः स्थापनीयाः क्रमादुत्क्रमतस्तथा ।
मध्योदयाः क्रमस्थास्तु चरैः शोध्याः क्रमस्थितैः ॥
निजोदयाः स्युर्मेषस्य वृषस्य मिथुनस्य च ।
मध्योदया उत्क्रमस्था उत्क्रमस्थैश्चरैर्युताः ॥
कार्याः कर्कस्य सिंहस्य कन्यायाः स्युर्निजोदयाः ।
कन्यान्तानामजादीनां स्वोदयाः साधिता इह ॥
तुलादीनां ऋषान्तानां स्वोदयाः स्युर्विलोमतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य सूत्रस्याऽङ्कव्याख्या ।

मध्योदयप्राणपिण्डा मेषादीनां कन्यान्तानां लिख्यन्ते ।

१६६९ । १७९५ ।१९३६ । १९३६ । १७९५ । १६६९

तथैव चरप्राणा लिख्यन्ते ।

३६५ । २९८ । १२३ । १२३ । २९८ । ३६५

तथैव स्वदेशे राश्युदया लिख्यन्ते ।

१३०४ । १४९७ । १८१३ । २०५९ । २०९३ । २०३४

अपरे च पलरूपा राश्युदया लिख्यन्ते ।

२१७ । २४९ । ३०२ । ३४३ । ३४९ । ३३९

अस्माद् वचनात् सुमतितन्त्रकारेण स्वदेशे

अक्षांशाः	२७
लम्बांशाः	६३
अक्षज्या	१५६१
लम्बज्या	३०६३

इति स्वीकृत्य तदनुसारं चरप्राणाश्चरपलानि स्वदेशोदयप्राणाः स्वदेशोदयपलानि च साधितानीति ज्ञायते ।

सुमतितन्त्रानुसारम्

राशेः	स्वदेशोदयपलानि
मेषस्य	२१७
वृषस्य	२४९
मिथुनस्य	३०२
कर्कटस्य	३४३
सिंहस्य	३४९
कन्यायाः	३३९

इति सिद्ध्यति ।

प्र. १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीन्तना नैपालका ज्योतिर्विदः

षड्भूमिपक्षा २१६ नववेदपक्षाः २४९
पक्षाभ्ररामाः ३०२ कृतवेदरामाः ३४४ ।
नवाब्धिरामा ३४९ गगनाब्धिरामा ३४०–
स्तुलादितोऽमी च विलोमसंस्थाः ॥

इति श्लोकं कण्ठस्थीकृत्य लग्नं साधयन्ति ।

अतो नेपालद्रोण्यां

राशेः	स्वदेशोदयपलानि
मेषस्य	२१६
वृषस्य	२४९
मिथुनस्य	३०२
कर्कटस्य	३४४
सिंहस्य	३४९
कन्यायाः	३४०

इति ज्ञायते ।

एतावता वृषस्य, मिथुनस्य, सिंहस्य च स्वदेशोदयपलानीदानीन्तनानां नैपालकानां ज्योतिर्विदां सुमतितन्त्रकारस्य च सर्वात्मना सङ्गच्छन्ते; मेषस्य, कर्कटस्य, कन्यायाश्च स्वदेशोदयपलानीदानीन्तनानां नैपालकानां ज्योतिर्विदां सुमतितन्त्रकारस्य चैकपलमात्रेण न सङ्गच्छन्त इति स्फुटम् ।

मूलपाठः

सर्व्वग्रहाणा देशान्तरलिप्तादिक्रमः ॥

आ
०
०

प्र. १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१
५८
१

(सुमतितन्त्रे ताडपत्रे २६ ख पत्रे)

संशोधितः पाठः

सर्वेषां ग्रहाणां नेपालद्रोण्यां देशान्तरलिप्ताद्या लिख्यन्ते ।

आदित्यस्य
१
५८
१

अतः सुमतितन्त्रकारस्य देशे

$$\text{देशान्तरघटयः} = \frac{(१।५८।१) \times ६०}{५९।८।१०} = १.९९६ = २ \text{ (आसन्नघटीद्वयम्)}$$

एतावता सुमतितन्त्रकारेण स्वदेशे घटीद्वयमितं देशान्तरं स्वीकृतमिति स्फुटीभवति ।

श्रीमद्गोर्षायां देशान्तरं	०।१।५
काश्यां	०।०।४७
देशान्तरं	
	०।१।५ गोर्षायां
नेपाले	०।१।६

(लक्ष्मीपतिसङ्ग्रहस्थस्य रामविनोदस्य ३-४ पत्रयोः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति वैक्रम्यामेकोनविंश्यां शताब्द्यां नैपालकेन दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा लिखितम् । अतस्तदनुसारम्

नेपालस्य रेखान्तरपलानि – काश्या रेखान्तरपलानि =६६–४७=१९

इति सिद्ध्यति ।

यवनान्तरजा नाड्यः सप्ताऽवन्त्यां त्रिभागसंयुक्ताः ७ । २० ।
वाराणस्यां त्रिकृतिः ९ । ० साधनमन्यत्र वक्ष्यामि ।।१३।।

(पञ्चसिद्धान्तिकायां तृतीयेऽध्याये)

वराहमिहिरस्य लेखानुसारं

	घ. प.	घ. प.	घ. प.
रेखादेशात् काश्या रेखान्तरम्=	९। ० –	७। २०=	१। ४०

अतो वराहमिहिरस्य वाक्यानुसारं काश्या रेखान्तरपलानि १०० इति सिद्ध्यति ।

अतो नेपालद्रोण्या रेखान्तरपलानि =१००+१९=११९ (आसन्नघटीद्वयम्)

एतदेव सुमतितन्त्रकारेण स्वीकृतम् । वराहमिहिरकृतायां पञ्चसिद्धान्तिकायामन्तर्भूतस्य सूर्यसिद्धान्तस्य सुमतितन्त्रस्य च मूलमेकमेवेति पूर्वमेवाऽत्राऽस्माभिः प्रतिपादितम् । अतः प्राचीनसूर्यसिद्धान्तानुसारं नेपालद्रोण्यां रेखान्तरं घटीद्वयमिति सिद्ध्यति ।

सुमतितन्त्रे निर्दिष्टा अक्षांशा रेखान्तरपलानि च नेपालद्रोण्या अक्षांशै रेखान्तरपलैश्च सङ्गच्छन्त इति नेपालद्रोण्या अन्यत्र सुमतितन्त्रस्य रचना भवितुं नाऽर्हति ।

प्र. १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुमतितन्त्रस्य लाभाद् निष्पन्नं फलम्

सप्ताश्विवेदसंख्यं शककालमपास्य चैत्रशुक्लादौ ।
अर्द्धास्तमिते भानौ यवनपुरे सौम्यदिवसाद्ये ॥८॥

(पञ्चसिद्धान्तिकायाः प्रथमेऽध्याये)

अत्र भौम्यदिवसाद्यः इति पाठान्तरम् ।

एवं समुपलब्धमिदं पद्यं विद्वद्भ्यां थीबोसुधाकराभ्यां संशोध्य पञ्चवेदनवभू १९४५ मिते वैक्रमाब्दे

सप्ताश्विवेदसङ्ख्यं शककालमपास्य चैत्रशुक्लादौ ।
अर्द्धास्तमिते भानौ यवनपुरे सोमदिवसाद्ये ॥८॥

इदंरूपतया प्रकाशितम् ।

थीबोसुधाकराभ्यां सम्पादितायाः पञ्चसिद्धान्तिकाया द्वितीयं पृष्ठं द्रष्टव्यम् ।

तदनु विदुषा शङ्करबालकृष्णदीक्षितेन त्रिपञ्चनवभू १९५३ मिते वैक्रमाब्दे तदेव पद्यं संशोध्य

सप्ताश्विवेद (४२७) संख्यं शककालमपास्य चैत्रशुक्लादौ ।
अर्धास्तमिते भानौ यवनपुरे भौमदिवसाद्यः ॥८॥

इदंरूपतया प्रकाशितम् ।

दीक्षितकृतस्य भारतीयज्योतिःशास्त्रस्य द्वितीयसंस्करणस्य १५६ पृष्ठं द्रष्टव्यम् ।

एवं थीबोसुधाकरपक्षस्य दीक्षितपक्षस्य च विसंवादः पञ्चसिद्धान्तिकामध्येतुमनसो विदुषो व्याकुलीकरोति । एवंविधा विसंवादा बहुषु स्थानेषु जायन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य सुमतितन्त्रस्योपलम्भेन गणितप्रक्रियया ते विसंवादा निराकृताः सन्ति । संशोधितपाठानां प्रकाशनानन्तरमुपोद्घाते सविस्तरमस्मिन् विषये लेखिष्यते ।

सुमतितन्त्रानुसारमेकस्मिन् सौरवर्षे सावनदिनसङ्ख्या

$$= \frac{१५७७९१७८००}{४३२००००} = \frac{२९२२०७}{८००}$$

दि. घ. प. वि.

= ३६५। १५। ३१। ३०

प्रचलितसूर्यसिद्धान्तानुसारमेकस्मिन् सौरवर्षे सावनदिनसङ्ख्या

$$= \frac{१५७७९१७८२८}{४३२००००}$$

$$= \frac{३९४४७९४५७}{१०८००००} =$$ दि. घ. प. वि. प्र. वि.

३६५ । १५ । ३१ । ३१ । २४

दन्ताब्धयोऽयुतहता ४३२०००० युगवत्सराः स्युः ... ॥३॥
व्योमाभ्रबाणतुरगक्षितिनन्दशैल–
क्ष्माभृच्छिलीमुखभुवः १५७७९१७५०० क्षितिवासराः...स्युः ॥८॥

(आर्यसिद्धान्तानुयायिनो लल्लस्य शिष्यधीवृद्धिदे मध्यमाधिकारे)

अत आर्यसिद्धान्तानुसारमेकस्मिन् सौरवर्षे सावनदिनसङ्ख्या

$$= \frac{१५७७९१७५००}{४३२००००} = \frac{२१०३८९}{५७६} =$$ दि. घ. प. वि.

३६५ । १५ । ३१ । १५

पञ्चाङ्गरामा ३६५ स्तिथयः १५ खरामाः ३०
सार्द्धद्विदस्राः २२ । ३० कुदिनाद्यमब्दे ... ॥८॥

एकस्मिन् सौरवर्षे पञ्चषष्टयधिकत्रिशती ३६५ मिताः सावनदिवसाः पञ्चदश १५ नाडिकाश्च त्रिंशत् ३० पलानि च सार्द्धानि द्वाविंशति २२ । ३० विपलानि । ...

(ब्रह्मसिद्धान्तानुयायिनो भास्करस्य सिद्धान्तशिरोमणौ मध्यगतिवासनायाम्)

प्र. २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतो ब्रह्मसिद्धान्तानुसारमेकस्मिन् सौरवर्षे सावनदिनसङ्ख्या

	दि.	घ.	प.	वि.	प्र. वि.
=	३६५ ।	१५ ।	३० ।	२२ ।	३०

१ सौरवर्षे सावनदिनसङ्ख्याः

	दि.	घ.	प.	वि.	प्र. वि.
प्राचीनसूर्यसिद्धान्ते (सुमतितन्त्रे)	३६५ ।	१५ ।	३१ ।	३०	
प्रचलिते सूर्यसिद्धान्ते	३६५ ।	१५ ।	३१ ।	३१ ।	२४
आर्यसिद्धान्ते	३६५ ।	१५ ।	३१ ।	१५	
ब्रह्मसिद्धान्ते	३६५ ।	१५ ।	३० ।	२२ ।	३०

इति सिद्ध्यति ।

श्रीचापवंशतिलके श्रीव्याघ्रमुखे नृपे शकनृपाणाम् ।
पञ्चाशत्संयुक्तैर्वर्षशतैः पञ्चभि ५५० रतीतैः ॥७॥
ब्राह्मः स्फुटसिद्धान्तः सज्जनगणितज्ञगोलवित्प्रीत्यै ।
त्रिंशद्वर्षेण कृतो जिष्णुसुतब्रह्मगुप्तेन ॥८॥

(ब्राह्मस्फुटसिद्धान्ते संज्ञाध्याये)

आभ्यां पद्याभ्यां पञ्चाशीत्यधिकषट्शत ६८५ मिते वैक्रमाब्दे त्रिंशद्वर्षो ब्रह्मगुप्तो ब्राह्मस्फुटसिद्धान्तं प्रणिनायेति सिद्ध्यति ।

जानात्येकमपि यतो नार्यभटो गणितकालगोलानाम् ।
न मया प्रोक्तानि ततः पृथक् पृथग् दूषणान्येषाम् ॥४३॥

(ब्राह्मस्फुटसिद्धान्ते तन्त्रपरीक्षाध्याये)

अनेन पद्येन ब्रह्मगुप्त आर्यभटस्य पक्षं न स्वीकरोति स्मेति स्पष्टं भवति ।

प्रणिपत्य महादेवं जगदुत्पत्तिस्थितिप्रलयहेतुम् ।
वक्ष्यामि खण्डखाद्यकमाचार्यार्यभटतुल्यफलम् ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रायेणाऽर्यभटेन व्यवहारः प्रतिदिनं यतोऽशक्यः ।
उद्वाहजातकादिषु तत्समफललघुतरोक्तिरतः ॥२॥
शाकोऽगवसुशरो ५८७ नोऽर्क १२ गुणश्चैत्रादिमाससंयुक्तः ।

(ब्रह्मगुप्तकृते खण्डखाद्यके तिथ्यधिकारे)

एभिर्वाक्यैर्द्वाविंशत्यधिकसप्तशत ७२२ मिते वैक्रमाब्दे सप्तषष्टिवर्षो ब्रह्मगुप्त आर्यभटस्याऽचार्यत्वं स्वीकृत्य तदुदितया रीत्या लोकस्य विवाहजातकादिषु तिथ्यादीनां सिद्धये खण्डखाद्यकं प्रणिनायेति स्फुटीभवति ।

खखवसु ८०० गुणिताद् वसुगुणकृता ४३८-
धिकान्मुनिनखद्विनन्दयमैः २९२२०७ ।
भगणाद्यर्कबुधसिताः
शीघ्रोच्चं कुजगुरुशनीनाम् ॥६॥

(खण्डखाद्यके तिथ्यधिकारे)

अत्र ब्रह्मगुप्तेन ८०० मितेषु सौरभगणेषु नाम ८०० सौरवर्षेषु २९२२०७ सावनदिवसाः स्वीकृताः । अतः खण्डखाद्यकानुसारमेकस्मिन् सौरवर्षे ३६५ ।१५। ३१ । ३० भवन्ति । एषा सावनदिनसङ्ख्या च सुमतितन्त्रानुसारिणी वर्तते । आर्यब्रह्मसिद्धान्तयोस्तु वर्षे सावनदिनसङ्ख्ये अन्ये एव स्तः । अत आर्यभटेन प्राचीनसूर्यसिद्धान्तानुसारी कश्चन ग्रन्थोऽपि रचयाम्बभूवे, तदनुसारं लोका विवाहजातकादिषु तिथिनिर्णयं कुर्वन्ति स्म, तस्य ग्रन्थस्य कठिनतां दूरीकर्तुं वृद्धो ब्रह्मगुप्तः खण्डखाद्यकं प्रणिनायेति सिद्ध्यति ।

आर्यभटः स्वकीयं स्वतन्त्रं सिद्धान्तं रचयामास । यस्येदानीमार्यभटीयनाम्ना प्रसिद्धिर्वर्तते । ब्रह्मगुप्तोऽपि स्वकीयं स्वतन्त्रं सिद्धान्तं रचयामास । यस्येदानीं ब्राह्मस्फुटसिद्धान्तनाम्ना प्रसिद्धिर्वर्तते । परन्तु लोकास्तदात्वे तयोः सिद्धान्तौ न स्वीचक्रुः । अतस्ताभ्यां स्वसिद्धान्तप्रतिकूलोऽपि लोकव्यवहारार्थं प्राचीनसूर्यसिद्धान्तानुयायी ग्रन्थः पृथक् पृथग् रचित इति स्फुटीभवति । एतावता सुमतितन्त्रमूलस्य प्राचीनसूर्यसिद्धान्तस्य लोकव्यापिता स्फुटीभवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नत्वा मुरारेश्चरणारविन्दं
श्रीमाञ् शतानन्द इति प्रसिद्धः ।
तां भास्वतीं शिष्यहितार्थमाह
शाके विहीने शशिपक्षखैकैः १०२१ ॥१॥
अथ प्रवक्ष्ये मिहिरोपदेशाच्
छ्रीसूर्यसिद्धान्तसमं समासात् ।
शास्त्राब्दपिण्डः स्वरशून्यदिग् १००७ घन-
स्तानाग्नि ३४९ युक्तोऽष्टशतै ८०० र्विभक्तः ॥२॥
लब्धं नगैः ७ शेषितमङ्ग ६ युक्तं
सूर्यादिसंवत्सरपालकः स्यात् ।

(भास्वत्यां तिथिध्रुवाधिकारे)

एभिः श्लोकैः षट्पञ्चाशदधिकैकादशशत ११५६ मिते वैक्रमाब्दे शतानन्द एकस्य सौरवर्षस्य वारादिकं

	वा.	घ.	प.	वि.
$\frac{१००७}{८००}$ =	१।	१५।	३१।	३०

स्वीकृत्य भास्वतीं रचयामासेति बुद्ध्यते । अतः शतानन्दोऽप्येकस्मिन् सौरवर्षे

दि.	घ.	प.	वि.	
३६५ ।	१५ ।	३१ ।	३०	स्वीचकारेति स्फुटीभवति ।

प्राचीनसूर्यसिद्धान्तस्य विलुप्ततया पञ्चसिद्धान्तिकान्तर्गतस्य सूर्यसिद्धान्तस्य, खण्डखाद्यकस्य, भास्वत्याश्चोपपत्तयः सम्यक्तया विदुषां मनो नाऽधिरोहन्ति । सुमतितन्त्रस्योपलम्भेन तदुपपत्तयः स्फुटीभवन्तीत्युपोद्घाते सविस्तरं प्रदर्शयिष्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपालस्येतिहासस्योद्धारः

सम्प्रत्रिनवभू १९३७ मिते वैक्रमाब्दे पुरातत्त्वपण्डितो भगवानलाल इंद्र-प्रथमतया नेपालस्याऽभिलेखान् प्रकाशयामास । तत्र लिच्छवीनामभिलेखेषु द्विविधौ संवत्सरौ लेख्यते । काविमौ संवत्सराविति तदनु पुरातत्त्वपण्डितेषु विविधा विचाराः प्रादुरभवन् ।

तदनु द्विचतुर्नवभू १९४२ मिते वैक्रमाब्दे प्राध्यापकः सेसिलवेन्डलः पाटनसुनधारास्थमंशुवर्मणः शिलाभिलेखं प्रकाशयामास । तस्मिन्नभिलेखे

संवत् ३४ प्रथमपौषशुक्लद्वितीयायाम्

इत्युत्कीर्णं वर्तते ।

वर्तमानकाले प्रचलितया पञ्चाङ्गगणनापद्धत्या पौषेऽधिमासो न संभवति । अतः केयं पञ्चाङ्गगणनाप्रणालीति विदुषां समाजे वितर्कः समजनि ।

मूलपाठः

जातो दुर्योधनो राजा कलि -- प्रवर्त्तते ।
युधिष्ठिरो महाराजो दुर्योधनस्तयोः पि वा ।
उभौ राजौ सहस्रे द्वे वर्षन्तु सम्प्रवर्त्तति ।
नन्दराज्यं शताष्टञ्च श्चन्द्रगुप्तस्ततोपरे
राज्यङ्करोति तेनापि द्वात्रिंशच्चाधिकं शतम् ।
राजा शूद्रकदेवश्च वर्ष सप्ताब्धि चाब्धिनौ
शकराजा ततो पश्चाद्वसुरन्ध्रकृतन्तथा ।
इत्येते ¯ षितम्मह्यं ज्ञेया राजा क्रमेण तु ।

(सुमतितन्त्रे ताडपत्रे २ ख पत्रे)

संशोधितः पाठः

युधिष्ठिरसंवत्

दुर्योधने महीपाले कलिः प्रादुर्भविष्यति ।
युधिष्ठिरो महाराजो नृपो दुर्योधनस्तयोः ।।
समासहस्रद्वितयं २००० यावत् कालो भविष्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्दसंवत्

नन्दकालः शतान्यष्टौ ८००

चन्द्रगुप्तसंवत्

ततः कालो भविष्यति ॥

द्वात्रिंशं च शतं १३२ यावच् चन्द्रगुप्तस्य भूपतेः ।

शूद्रकदेवसंवत्

कालः शूद्रकदेवस्य सप्तवेदभुजै २४७ मितः ॥

शकसंवत्

ततः शकमहीभर्तुर्वसुरन्ध्रकृतै ४९८ मिताः ।
समा वर्तिष्यते कालो राजकाला इमे स्मृताः ॥

अत्र कलियुगस्य प्रारम्भात्

२००० वर्षाणि यावद् युधिष्ठिरसंवत्सरः ।
ततः ८०० वर्षाणि यावद् नन्दसंवत्सरः ।
ततः १३२ वर्षाणि यावच् चन्द्रगुप्तसंवत्सरः ।
ततः २४७ वर्षाणि यावच् शूद्रकदेवसंवत्सरः ।
ततः ४९८ वर्षाणि यावच् शकसंवत्सरः ।

प्रचरिष्यतीत्युल्लेखो वर्तते ।

२०००+८००+१३२+२४७+४९८=३६७७

अतः ३६७७ मितेषु कलिगतवर्षेषु गतेषु कस्यचन संवत्सरस्य प्रादुर्भावो बभूवेति सिद्ध्यति ।

मूलपाठः

…कृतअम्बराग्नि – – –
–ोमानदेवाब्द प्रयुज्यमाना एतानि पिण्ड…

(सुमतितन्त्रे ताडपत्रे २ ख पत्रे)

प्र. २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संशोधितः पाठः

मानदेवसंवत्

श्रीमानदेवाब्द इति प्रसिद्धः

संवत्सरः सागरशून्यरामैः ३०४ ।

तुल्यानि वर्षाणि चरिष्यतीह

कल्यादितो यातसमाः प्रसाध्याः ॥

ताडपत्रे क्रमशः प्राचीनया लिप्या लिखिते भागे मानदेवसंवत्सरस्योल्लेखो नास्ति । यस्मिन् पत्रे (२ ख पत्रे) शकसंवत्सरस्योल्लेखो वर्तते, तस्मिन्नेव पत्रे शकसंवत्सरस्योल्लेखस्य पश्चात् चिह्नं दत्त्वाऽधस्तने भागे किञ्चिदर्वाचीनया लिप्या मानदेवसंवत्सरस्योल्लेखो वर्तते । शकसंवत्सरः ४९८ वर्षाणि यावत् प्रचरिष्यतीति सुमतितन्त्रे प्राचीनया लिप्या क्रमपूर्वकमेव लिखितम् । अतः ४९८ शकाब्दानन्तरमन्यः संवत्सर प्रचरिष्यतीति तेन मूलवाक्येनैव सूचितः । नूतनस्य संवत्सरस्य नाम मानदेवसंवत्सर इत्यधः प्रक्षिप्तेन वाक्येन ज्ञायते । मानदेवसंवत्सर ३०४ वर्षाणि यावत् प्रचरिष्यतीत्यत्र लिखितत्वात् ततोऽन्यः कश्चन नवीनसंवत्सरः प्रादुर्भविष्यतीति ध्वनितम् । तस्य संवत्सरस्य नामोल्लेखस्तु न कृतः ।

सुमतितन्त्रस्योपलम्भादंशुवर्मादिभिः प्रयुक्तः संवत्सरो मानदेवसंवत्सर इति नैपालका विद्वांसः स्वीचक्रुः ।

ॐ

एकत्रिंशत्तमे वर्षे वर्तमाने स्वसंस्थया
माघशुक्लत्रयोदश्याम्पुष्येण सवितुर्दिने १
कालेन शीर्णमवलोक्य समस्तमाद्यं
हैमं हरेर्भगवतः कवचं सताक्ष्यम्
तस्मान्निदर्शनमवाप्य जगद्धितार्थं
सञ्चस्कृवान्नरपतिः पुनरंशुवर्मा २

(दोलाद्रिस्थोंऽशुवर्मणः सुवर्णपत्राभिलेखः)

प्र. २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयमभिलेख इदंप्रथमतया धनवज्रवज्राचार्येण प्रकाशितः ।

... यस्त्वेतानाज्ञां विलङ्घ्यान्यथा प्रवर्तिष्यते ... मर्यादाज्ञाव्यतिक्रम-
कारिणो ... रपि भूपतिभिर्धर्मगुरुतया गुरुकृतप्रसादानु(व)र्तिभिरेव
भवितव्यमिति स्वयमाज्ञा दूतकोत्र राजपुत्रस्थितिवर्मा
संवत् ३१ द्वितीयपौषशुक्लाष्टम्याम्

(भक्तपुर इनायूचोस्थः शिलाभिलेखः)

अयमभिलेख इदंप्रथमतया मोहनप्रसादखनालेन प्रकाशितः ।

अनयोरभिलेखयोरुपलम्भात् भट्टोत्पलकृतायाः खण्डखाद्यकटीकायाः, धर्म-निर्णयतिथिसारसङ्ग्रहस्य (वीरपुस्तकालयस्य प्रथमे विभागे १६३४ सङ्ख्या) चाऽवलम्बनेन सुमतितन्त्रानुसारं कृतया गणनयांऽशुवर्मादिभिः प्रयुक्तः संवत्सरस्त्रित्रिषड् ६३३ मिते वैक्रमाब्दे प्रारब्धः संवत्सर इति निर्णेतुं शक्यते । स निर्णय उपोद्घाते सविस्तरं प्रकाशयिष्यते ।

सुमतितन्त्रस्य ताडपत्रे लिखितमन्यत् पुस्तकं ब्रिटिशसङ्ग्रहालये वर्तत इति सेसिलवेन्डलमहोदयस्य सूचीपत्रतोऽवगम्यते । तस्य पुस्तकस्य प्रतिलिपेः प्राप्त्यै विश्वविद्यालयस्याऽधिकारिणोऽस्माभिर्निवेदिताः । अस्माकमनुरोधेन नेपालराष्ट्रियाभिलेखालयस्य तात्कालिकेनाऽध्यक्षेण पण्डितेन पराजुलीकुलप्रसूतेन बुद्धिसागरशर्मणा प्रयत्नोऽपि व्यधायि । परं दैवस्य प्रातिकूलिकतयाऽस्माभि-रद्य यावत् तत्रत्यस्य पुस्तकस्य प्रतिलिपिर्नोपलब्धा । अतोऽस्माकं पाठः सर्वात्मना नेपालराष्ट्रियाभिलेखालयस्थं ताडपत्रपुस्तकस्य पाठमेवाऽनुकरोति ।

पाठस्याऽशुद्धतया यथामति तत्पाठस्य संशोधनमप्यस्माभिर्व्यधायि । अस्मत्संशोधितः पाठो मूलग्रन्थकर्तुराशयस्याऽनुकूलिको वर्तते न वेत्यत्र परीक्षका एव प्रमाणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतोऽस्माभिर्यथोपलब्धं पाठस्य प्रकाशनमेवोचितमित्यूरीकृत्य प्रथमभागतया मूलपाठ एव प्रकाशितो वर्तते ।

अस्य ग्रन्थस्य गणितविषयतयोदाहरणं विना गणितप्रक्रियाया दुरवगमतया च यथालाभमुदाहरणं प्रस्तुतं भवत्विति केसरपुस्तकालयस्थस्ताडपत्रे लिखितः सुमतिसिद्धान्तो[1] द्वितीयपरिशिष्टतयाऽत्र प्रकाशितः । तत्र ग्रहणविषयकाण्युदाहरणानि लभ्यन्ते । तस्य ग्रन्थस्य प्रकीर्णपत्रतया क्रमानुसारं पत्रक्रमनिर्णयोऽपि दुष्करः । मध्ये मध्ये विषयान्तरागमनेन ततोऽपि काठिन्यं वर्तते ।

तत्रैव सुमतिकरणं नाम ताडपत्रे लिखितं लघु पुस्तकं[2] चोपलब्धं, तदपि खण्डितं वर्तते । तदत्र प्रथमपरिशिष्टरूपेण निवेशितम् ।

नेपालराष्ट्रियाभिलेखालयस्थं कायगतपत्रे लिखितमतीव जीर्णं लघु पुस्तकं सुमतिकरणं[3] लब्धम् । तदपि स्थाने स्थाने नष्टं वर्तते । तदत्र तृतीयपरिशिष्टतया निवेशितम् ।

---

१. केसरपुस्तकालयस्य ८२ सङ्ख्या
पत्रसङ्ख्या ६९
१४. ७ अङ्गुलमितं दैर्घ्यं २. ३ अङ्गुलमिता विस्तृतिः

२. केसरपुस्तकालयस्य १९६ सङ्ख्या
पत्रसङ्ख्या १७
१७ अङ्गुलमितं दैर्घ्यं २.४ अङ्गुलमिता विस्तृतिः

३. वीरपुस्तकालयस्य प्रथमे विभागे ११७३ सङ्ख्या
पत्रसङ्ख्या २५
११. ३ अङ्गुलमितं दैर्घ्यं ४. ५ अङ्गुलमिता विस्तृतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सपरिशिष्टस्याऽस्य सुमतितन्त्रस्याऽवलोकनेन विद्यामग्ना विद्वांसः सुमतितन्त्रस्थं विषयं बोद्धुं प्रभवेयुः ।

लौकिकानां विदुषां सुबोधायाऽस्माभिः संशोधितः पाठस्तदुपपत्तयस्तदुदाहरणानि च सुमतितन्त्रस्य द्वितीयभागत्वेन प्रकाशमेष्यन्ति ।

सुमतितन्त्रस्य तृतीयो भागो नेपालीभाषान्तररूपेण प्रकाशमेष्यति ।

त्रिभुवनविश्वविद्यालयान्तर्गतस्य संस्कृताध्ययनसंस्थानस्याऽध्यक्षोऽधिकारिकुलप्रसूतः पण्डितोऽम्बिकाप्रसादशर्माऽस्मदीयेऽस्मिन् कार्ये सप्रयत्नं सहायतामकरोदिति तत्रभवतः प्रयत्नोऽभिनन्दनार्हः । स महाभागश्चेदस्मिन् कार्ये सहायतां नाऽकरिष्यत् तदा सुमतितन्त्रस्येदानीं प्रकाशनं नाऽभविष्यत् ।

त्रिभुवनविश्वविद्यालयान्तर्गतस्य पाठ्यक्रमविकासकेन्द्रस्य निर्देशकः श्रीराजेन्द्रकुमाररङ्गोङ्गस्तथा तत्रत्य उपनिर्देशक श्यानन्ददेवभट्टश्च धन्यवादार्हौ । यतस्ताभ्यामस्य ग्रन्थस्य प्रकाशनव्यवस्था व्यधायि ।

अस्याः प्रस्तावनाया विरचन आयुष्मता महेशराजपन्तेनाऽपि सहायता व्यधायीति सोऽपि धन्यवादार्हः ।

भवन्ति चाऽत्र श्लोकाः

धीमानार्यभटो जगाद किल यं ग्रन्थे विलुप्तेऽधुना,
सिद्धान्तेषु च पञ्चसु स्फुटतमं यं श्रीवराहो जगौ ।
स्वं सिद्धान्तमपास्य जिष्णुतनयो यं शिश्रिये वार्द्धके,
यन्मूलाङ्कसमन्विता विजयते लोकेऽधुना भास्वती ।। १ ।।

सिद्धान्त आप विलयं स, तदीयसारः
संरक्षितः सुमतितन्त्रमिति प्रसिद्धे ।
कालेन जीर्णतनुतां श्रयति क्रमेण
भ्रष्टैः पदैः कवलिते किल ताडपत्रे ।। २ ।।

प्र. ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मिन् प्रत्ने सूर्यसिद्धान्त उक्त
प्रत्नं ज्ञानं द्योततां भूतलेऽस्मिन् ।
भूयात् स्पष्टो ज्यौतिषस्येतिहास-
श्चैतौ भावौ व्यापृतं मां विधत्तः ॥ ३ ॥

मूलग्रन्थस्ताडपत्रोपलब्धः
सम्यग् नीतोऽभूद् यथास्वं प्रकाशम् ।
एतं दृष्ट्वा प्रत्नतत्त्वं विदन्तो
गोलज्ञाश्च प्रीतचित्ता भवेयुः ॥ ४ ॥

देवीप्रसादश्च दिनेशराजः
सहायतां लेखविधौ विधत्तः ।
नेपालवासी नयराजशर्मा
पञ्चर्तु ६५ वर्षो वच एतदाह ॥ ५ ॥

बाणत्रिपूर्णध्रुव २०३५ वैक्रमाब्दे
ज्यैष्ठे शशाङ्के सति पूर्णबिम्बे ।
भूपुत्रवारे शुचिसंज्ञमासे
सौरप्रमाणाद् रस ६ संमितेऽह्नि ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुमतितन्त्रस्य
ताडपत्रोपलब्धः पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१ ख पत्रे

१ ॐ नमः परतेजाय ॥
त्रैलोक्याधिपते नमः ॥

त्वं ब्रह्मा त्वञ्च रुद्र त्वं विष्णुस्त्वं च प्रजापतिः ।
सृष्टिसंहारकर्त्ता च नादबिन्दु सदाशिवः ।
सर्व्वतत्वतया देवं सर्व्वव्यापी नमो नमः ।
अक्षराक्षर त्वन्देव मन्त्रशक्तिञ्च त्वन्नमः ।
पञ्चब्रह्म त्वया देवं पञ्चभूताय त्वन्नमः ।
भोगमोक्षकरन्देवं सर्वस्व त्वं नन्नमो नमः ॥
सर्व्वाङ्गमवनि स्थित्वा भक्त्या त्वां प्रणमाम्यहम् ।
भगवन्देवदेवेश सर्वज्ञं कारणेश्वर ।
ज्योतिश्चक्रविधानन्तु ग्रहानां त्रिविधां गतिम् ।
ज्ञातुमिच्छाम्यहन्देव ज्योतिःशास्त्रसुनिश्चयम् ।
सुप्रष्णन्नैव जानामि दुर्मेध्य मूढचेतसा ।
यत्र कर्म्म प्रयुज्यन्ते अयं शास्त्रेषु तेजसा ।
मत्हितार्थाय देवेश कथयस्व प्रसादतः ॥

भगवानुवाच ॥

साधु साधु महाप्राज्ञ साम्प्रतङ्कथयाम्यहम् ।
श्रीकण्ठात्प्राप्तितो मह्यं यत्नेन त - - - म् ।
सूर्यसिद्धान्तमध्येषु दध्नो घृतमिवोद्धृतं ।
नाम्ना तु सुमतितन्त्रं सिद्धान्तस्य समद्भुतम् ।
तन्तथा कथयिष्यामि शृणु वक्ष्यामि सुव्रते ॥:॥

२ क पत्रे

कल्पन्मन्वन्तरादीनां युगाब्दं कालमेव च ।
ऋतुमासं तिथिश्चैव प्रहारं मुहूर्त्त नाडिका ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनाडी प्राणसंख्येण वक्ष्यामि कालपर्यया ।
युगाणां मध्यमानाञ्च स्फुटकर्म्म विशेषतः ।
तिथिनक्षत्रकर्म्मञ्च ग्रहचारविधानत ।
त्रिप्रश्णञ्च यथान्यायं ग्रहणं शशिसूर्ययोः ॥
सुमते कथयिष्यामि यथाश्रुतम्मया पुरा ॥

षड्भिः प्राणैर्विनाड्यैका तासां षष्टिभिर्नाडिका ।
द्विनाडिभ्याम्मुहूर्त्त स्या तत्त्रिंशैस्तु दिवानिशा ।
तिथिस्त्रिंशैस्तु मासं स्यात् द्वे मासं ऋतुमेव च ।
ऋतुद्वयञ्च कालं स्यात् कालत्रयञ्च वार्षिकम् ।
एवम्मानववर्षञ्च सुरानाञ्च दिवानिशा ।
सुराणां द्वादशं वर्षं वर्द्धैकञ्च भवेत्ततः ।
वर्द्धशतं कलिश्चैव द्विगुणं द्वापरम्भवेत् ।
त्रिगुणञ्च भवेत्त्रेत्रं चतुर्भिर्गुणितं कृतः ।
युगञ्च भवते तन्तु -- स्त्र क्रमसस्तथा ।
चतुर्युगद्विसप्तत्या मनुरेको विधीयते ।
मनुचतुर्दशेनापि शक्रमेको विधीयते ।
द्वे मिन्द्रेन तु ब्रह्मस्य अहोरात्रं पुनर्भवेत् ॥

२ ख पत्रे

एवङ्कालन्तरेणापि ब्रह्मणः प्रलयम्भवेत् ।

इहास्मि सम्प्रवर्त्तते कालं वक्ष्यामि तत्वतः ।
ब्राह्मणस्याष्टवर्षञ्च मणुषट्कन्तथैव च
— — — — — — वर्त्तञ्चतुर्भिस्तु कृतादिकं ।
यातास्त्रयो युगानाञ्च कृत तेत्त्राथ द्वापरं ।

भविष्यं संप्रवक्ष्यामि कलिकञ्च यथाक्रमं ।
जातो दुर्योधनो राजा कलि -- प्रवर्त्तते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युधिष्ठिरो महाराजो दुर्योधनस्तयोःपि वा ।
उभौ राजौ सहस्रे द्वे वर्षन्तु सम्प्रवर्त्तति ।
नन्दराज्यं शताष्टञ्च श्चन्द्रगुप्तस्ततोपरे
राज्यङ्करोति तेनापि द्वात्रिंशाधिकं शतम् ।
राजा शूद्रकदेवश्च वर्ष सप्ताब्धि चाश्विनौ
शकराजा ततो पश्चाद्वसुरन्ध्रकृतन्तथा ।
इत्येते — षितम्मह्यं ज्ञेया राजा क्रमेण तु ।
· · · कृत अम्बराग्नि - - -
—ीमानदेवाब्द प्रयुज्यमाना एतानि पिण्ड · · ·

मध्यमा संप्रवक्ष्यामि नवस्थान यथाक्रमम् ।
राशिभागकलाश्चैव विकला प्राणमेव च ।
तत्परो वित्परश्चैव रेणुश्चैव विरेणुकम् ।
नव स्थानानि एतानि षष्ठि षष्ठ्युपलक्षयेत् ।
विरेणुषष्ठिभि रेणु रेणुषष्ठि वितत्परा ।
वितत्पराश्च षष्ठिश्च त—

३ क पत्रे

त्परैकं विधीयते ।
तत्परैर्दशभिः प्राणां प्राणषड्भिर्विनाडिका
विनाडिषष्ठिभिन्नानि नाडिषष्ठ्यान्तु रंशकाः ।
अंशा त्रिंशति राश्यैकं भग्नं द्वादशराशिकम् ॥

अभिधानं प्रवक्ष्यामि मध्यमाद्या यथाक्रमम् ।

मण्डलं भगणं चक्रं धृति पूर्णाम्परन्तथा ।
प्रमाणम्भसमूहञ्च नामं द्वादशराशिकम् ।

नीडम्मन्दिर हर्म्म्यञ्च गृहं वेशाश्च वेश्मनि ।
निलयं भवनञ्चैव राशिनामा प्रकीर्त्तिता ।

५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिथिर्भाग दिनं संख्यम् । द्यु मृहम् म्य द्वारं शकम् ।
अह्नि चाष्टानि शब्दानि भागनाम विदुर्बुधा ।

लिप्ता च मौरिकाश्चैव कला च नाडिकास्तथा ।
नालिका घण्टिकाश्चैव लिप्तापर्यायवाचिका ।

विलिप्ता विकलश्चैव । विनाडि विघटि च शा
पला चापि तथा प्रोक्ता पर्यायश्च विनाडिका ।

जीवितं प्राणवातश्च कफं घ्राणश्च वर्द्धति ।
अशुश्च नादं धारश्च प्राणे तानि विदुर्बुधा ॥

नवस्थानेषु मध्येषु पञ्च स्थानानि भाषितम् ।

भुज प्रवेष्ट स्कन्धो त्रा बाहु मौर्वि - - - - ।

३ ख पत्रे

- - त भुजनामानि षडैते परिकीर्त्तिता ॥

तृभं त्र्यूनं हठ कोटि च्छेदज्या छेदकन्तथा ।
भतृज्या नाम रेतानि कोटिनाम प्रकीर्त्तिता ॥

जीवा ज्या - - - - - स्फुटङ्कर्म्य महतं हानि ।
एताभि चाष्ट नामानि ज्यानामानि विदुर्बुधा ।

अपक्रमं क्रमं क्रान्ति कारधस्कयतन्तथा ।
पुरणिखितयं यच्च क्रान्तिपर्यायवाचका ।

मध्यमं ललनं यातं गम्यगे ग्रह कौलवम् ।
यतभे सप्तधा ज्ञेया मध्यमाम्परिकीर्त्तिताम् ॥

भुक्ति भोग गतिश्चैव यान संचार कारकम् ।
प्रभव हिण्डका लब्दं भुक्तिर्नामा प्रकीर्त्तिता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शोध्य हानि ऋनोनोज्ञं मुक्तं वर्ज्यं क्षयं व्ययम् ।
अपास्य रहितं त्यागं हेया त्यक्त्वा त्यजे विना ।
एते पञ्चादशैतानि शोध्यनाम प्रकीर्त्तिता ।

युक्तं दत्तं धनम्मिश्रं क्षिप्त क्षेपान्वितार्विता ।
श्लेष पूरित विन्यस्तन्देयं उप्य स्व योजितं ।
एते पंचादश प्रोक्तं देयनाम विदुर्बुधा ।

ताडितम्भिन्न घातञ्च मर्द्दितङ्गुणितं हता ।
भ्यस्तं वर्ग्गित खातञ्च वर्द्धं मूर्द्ध प्रभूरिका ।
गुणकारस्य नामा–

४ क पत्रे

नि तृदशैते नु संख्यया ॥

छेदं भाज्यं हृतं भक्तं छिन्नमाप्त विरिक्तका ।
मथितोद्धृत्य लब्दञ्च भजेजात हरेति च ।
छेदकारस्य नामानि तृदशानि प्रकीर्त्तिता ।

गण्डीपं तृणं तं शार्ग्गम् द्रुणञ्चाज्यञ्च कर्मुकम् ।
इष्टसं धनु कोदण्डं चाप नाम्ना दश तथा ॥

वर्ग्ग नुति कृति व्याप्तं स्वङ्गुणी स्थानसर्प्पिता ।
एते तु षड्विधा चोक्तं वर्ग्गनाम प्रकीर्त्तिता ॥

स्वंह्रीनीतर स्वानोन्तु पद मूलम्तथैव च ।
तत्तुल्यम्पञ्च नामानि वर्ग्गमूल प्रकीर्त्तिता ॥

श्रवणं श्रोतञ्च कर्ण्णञ्च श्रुतिरिह्यञ्च च्छेदका ।
षड्विधानाञ्च नामानि कर्ण्णस्य च विवक्षिता ॥

आदिज्या चादिखण्डाञ्च प्रथमं चाग्रं स–ग्रतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खार्तु प्रत्ययदीया च आदिखण्डस्य नाम तौ ।

व्यास व्यासार्द्ध विष्कम्भं विष्कम्भार्द्ध स नन्तकम् ।
व्यासदलञ्च दुर्व्यासं दुर्व्यासार्द्धञ्च मन्तकम् ।
वि — रन्धि शरार्द्धञ्च विष्कम्भदलमेव च ।
विसरदल तृज्या च दुर्व्यासदल भानि च ।
सर्व्वसमूहखण्डस्य नामं चैव विदुर्बुधा ।

बिन्दु शून्य नुदन्ती च म—

४ ख पत्रे

व्योममुरु बृहत् ।
वरीय गगनाकाशं अन्तरीक्षन्नभोम्बरं ।
पृथुलं पृथुः खं नग्नं बिन्दुनामनि मेव च ।

आश्यं मुखञ्च रूपञ्च वदनं लपनस्तथा ।
भू - - पृथिवी पृथ्वी वसुधा धरणी मही ।
धरित्री कुं क्षिति क्ष्मा च । अचला मेदिनी धरा
इज्या क्षिति स्थिरं चन्द्र क्षमा गोत्रा वसुन्धरा ।
ऋक्षेशश्चन्द्रमा सोम शीताशु शशभृत् शशि ।
शशाङ्कोड्डुपतिरुर्व्या इन्दुश्च रजनीकरः ।
कलिश्चैत्येवमादीनां नामाश्चैकस्य तम्विदु ।

अंश पक्ष यमो दस्र - - बाहुकरौ ध्रुवा
यमलो स्विस्तनौ युग्म अश्वि नेत्रञ्च लोचना
दृक्दृष्टि चक्षु चाक्षी च नयनं द्विः स उच्यते ॥२॥

रामा पुष्कर लोकाञ्च गुण तेत्र हुताशनम् ।
ज्वलनो रोहिदश्चाग्नि कृशानु पावको शिखि ।
वैश्वानरानल वह्नि सप्तार्चि हव्यवाहन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनलो गिग्वज्वालश्च धामा ज्योतिद्युतिक्रमा ।
दीप्त दहन शूलञ्च त्रिः तृतीयस्त्रयस्य च ।।३।।

श्रुतिभाश्रम वेदञ्च लोकपाल युगार्ण्णवः ।
मालं समु-

५ क पत्रे

द्र तोयञ्च कृत पाल जलाम्बुका ।
आपोदधि महोम्भिञ्च चतुर्चत्वारकस्य च ।।४।।

अर्थ सायक भूतेषु अक्षेन्द्रियविषया शरः ।
बान कत्रे धृष भूत लेय कम्बाद श्लीमुखम् ।
खगपक्षिपतङ्गा च बद्धं मूकाञ्च भेदका ।
विशिख पञ्चम पञ्च अभिधानान्तु पञ्चन ।।५।।

षट् कोष स्कन्द स्वादार्तुः कुमारो शक्ति कार्त्तिकाः
शिशु चरक सेनां च मक्षि चक्रार्द्ध कृर्त्तिका ।
तर्क चमू रसेलाला । स्वादु षडह्वयं विधानतः ।।६।।

गिरि पर्व्वत शैलाद्रिः घोटाश्व तुरगो हरि
वह्नी वाजि हयो वात गन्धर्व वायु तापसम् ।
स्वरः समीरणो यासा । शिलाचल नगो स्थिरम्
मरुत समिरो गेयम् सप्तनः पार्यवाचका ।।७।।

गजो द्विरद मातङ्गः कुण्जरो करि वारणा
दन्ती नाग द्विपा यूथ । पद्द्मी करेणु मङ्गलं ।
व — — कम्प्रधानाञ्च मृर्त्ति पसव पीलुका
भद्र श्रियम्वसुमन्तो वनं गहन गह्वरम् ।
अष्टनः पर्यवाचका ।।८।।

अन्तरं विवरं छिद्रं कूप गम्भीर—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५ ख पत्रे

ग्रहा ।

तामिश्र नन्द द्वारा ठ कपाटा त्वक्षतं वदा ।
अङ्काभ्ररवट यन्त्र नवानां पर्यवाचका ॥९॥

आभा ककुभ आशाश्च दिश दिग्वहि यदि
- - च्छ्र - - नाय च दशमः पर्यवाचका ॥१०॥

महेश्वरो महादेव भवो भग हरो शिवः ।
पिनाकी त्र्यम्बको रुद्रसर्वश्रीकण्ठसङ्कराः ।
गिरीशेश भुशुण्डी च ज्ञेया ह्येकादशस्य च ॥११॥

आदित्यस्तपन पूषा भानुमां शविता रवि ।
विवश्वा सिहिरो हन्स पतङ्गोऽर्क्क दिवाकरम् ।
मण्डलं भगनञ्चक्र मासनामन्तथैव च ।
येनाभिधानो भानोस्तु । द्वादशम्परिकीर्त्तिता ॥१२॥

बन्धू जयञ्च विश्वञ्च इत्याद्या तृदश स्मृतः ॥१३

इन्द्र कौशिक शक्रश्च अहिधिष्ण पुरन्दर ।
शचीपति मनुश्चैव चतुर्दश विधानतः ॥१४॥

अंह्नि सन्ध्याष्टतिथ्या च तिथि पञ्चदशस्य च ॥१५॥

नन्तमष्टि रिथ मासं ज्ञेया षोडशनामत ॥१६॥

एनाम्मेघ बलाहश्च घट सप्तादशस्य च ॥१७॥

तत्पर धृति तीर्थञ्च विद्या स्मृति दशाष्ट च ॥१८॥

६ क पत्रे

सामा कटवघागोक ज्ञेया च ऊनविंशति ॥१९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माहे नखाङ्गुला नीसा कृतिमर्हतु विंशति ॥२०॥
मूर्च्छ मखक्रतुयज्ञा मठाध्रो चैकविंशति ॥२१॥
करन्दादेदमकाल द्वाविंशस्य विदुर्बुधा ॥२२॥
अज्य माया ज्यह्न मेपा त्रयोविंशतिसंज्ञिता ॥२३॥
अन्ध बुधजिनौ धर्म्म चतुर्विंशश्च सिद्धय तु ॥२४॥
पृष्ठ ज्ञानञ्च तत्वञ्च यासञ्च पञ्चविंशति ॥२५॥
अनुचेली विलूधीत एते षड्विंशकस्य च ॥२६॥
तारा नक्षत्र खज्योत उडु भानिञ्च तारका
रणो धूधेन नविञ्ज सप्ताविंशति विदुर्बुधा ॥२७॥
पिण्ड देहाः फला लोध्रौ अष्टाविंशतिसंज्ञिता ॥२८॥
तुष्टि कुच धना ह्याम ज्ञेया चैकोनत्रिंशति ॥२९॥
शंश्च शशञ्च शाध्वी च जटा त्रिंशतिसंज्ञिता ॥३०॥
केतमनामर सेघो एकात्रिंशति विदुर्बुधा ॥३१॥
रददशनदन्ताश्च मेला द्वात्रिंशति विदुर्बुधा ॥३२॥
रवै बोध्यं सुरा देवा त्रयोत्रिंश विदु बुधा ॥३३॥
पंक्तिशब्द यदुक्तञ्च चत्वा–

६ ख पत्रे

रिंशविधि स्मृता ॥४०॥

मुष्ठिञ्च पञ्चपञ्चैष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टपञ्चाश चेटका ।।५८

काचः पातः तरोः वर्त्ते ज्ञेया चेकूनषष्ठिका ।।५९।।

मुष्टि क्रोष्ठ तरु ै व षष्ठिनामा विजानये । ६०

कास्थोष्ठ पटहो यच्च द्वाषष्ठिञ्च विदुर्बुधा ।।६२

कुरुना च कलश्चैव चतुषष्ठिञ्च नामत ।।६४

पुष्ठिञ्च पञ्चष—का ।६५ अङ्कं ज्ञातव्यम्बुद्धिमान् ।।०।।

ग्रहानामभिधानञ्च सूर्यादीनां यथाक्रमम् ।

आदित्यस्तपनाः पूषा भानुमान्भानुरार्यमा ।
विश्वकर्म सहस्रांशु सूर्य सूर्योंऽशुमां खग ।
विवश्वो मिहिरो हन्सः पतङ्गोऽर्क तमोपहा
मार्त्तण्डो सविता ब्रध्नश्चित्रभानु हरी रविः
मित्रो दिनकृदुष्णांशुः सप्तसप्ति प्रभाकरः
गोपति हरिताश्वश्च निशारि द्वादशात्मनि ।।०।।

ऋक्षेशश्चन्द्रमाश्चन्द्र शीतांशु क्षणदाकरः ।
सोमो द्राक्षायनीनाथो मृगलक्ष्मौषधीपति
शशि शशाङ्क शशभृदब्ज कुमुदाबन्धवः
विधुश्चोडुपतिश्चैन्दु कथ्यते तारकापति ।।०।।

उच्च चलांशु

७ क पत्रे

मन्दोच्च हारि शोध्य विमध्यमा ।
ऊनता ह्रीयभागश्च उच्चनामेति विश्रुता ।।०।।

राहूपराग स्वर्भानु तमश्च . पात सैंघिकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूच्छाय कृष्ण — राङ्ग अर्द्धकाय विधुन्तुद ।
दैत्य पन्नगलाङ्गूल राहुनामेति कीर्त्तिता ॥०॥

लोहिताङ्गारको भौमः इष्यते कुज सूरिभिः ।
भूसुत पृथिवीपुत्र आराश्च कुमारो कृति
धरणीतनयादीनान्नाम चाङ्गारकस्य च ॥०॥

प्रबुधो ज्ञा स्मृति बुधः धीमति सौम्यश्चन्द्रज ।
रोहिणेश्चेन्दुपुत्रश्च मृगलक्ष्मीसुतो धरि
शशाङ्कतनयादीनान्नामञ्चैव बुधस्य च ॥०॥

धिषणस्त्रिदशाचार्यो गुरु जीवो बृहस्पति ।
बुधैरङ्गिरशश्चेति स्मृतश्चित्त्रखखण्डजः
यत्र देवगुरोर्नामः नामाश्चैव बृहस्पते ॥०॥

उशना भार्गवः काव्यः भृगु दैत्यगुरु सितः
शुक्रस्य नाम विज्ञेया एता प्रभृतिरन्य च ॥०॥

आर्क्कि सौर शनि वृद्ध रविसूनुश्च मन्दगा
भानि पतङ्गपुत्त्रश्च । वक्रपादश्च भानुजः
सूर्य —

७ ख पत्रे

तनय कृष्णी च अर्कसुत शनैश्चर ॥०॥

ऋक्ष तारक नक्षत्रं उडु ज्योति खबिन्दुका
धिष्ण खज्योतिक वेशा नामान्नक्षत्त्रकस्य च ॥०॥

आभाः ककुभ आशाश्च काष्ठाश्चेति दिशः स्मृताः॥०॥

इयं शास्त्रे प्रयुज्यन्ते अभिधानाञ्च भाषितम् ।

तम्प्रवक्षामि सूत्रार्थं ज्योतानाञ्च क्रियासु च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खखखखार्क्कस्वादाष्टत्र्यष्टस्वादाद्रिगोकृतम् ।
ब्रह्मजाताब्दकादीनां गताब्दञ्च विधीयते ।
शून्याष्टभिर्युत ह्यष्टं नखदस्रसै हृतं ।
फलं ब्रह्मस्य वर्षाणि शेषङ्कल्पम्प्रवर्त्तते ।
कल्पन्तु चतुर्युगे भक्तं तं फलं युगसंज्ञया ।
युगसंज्ञया युगसंज्ञ द्विसप्तत्र्यैः भक्तं मनु विधीयते ।
शेषं युगङ्गणन्त स्यात् कालम्पर्यायते सदा ।
खखखखगजाकाष्ठैः भक्तं लब्ध कृतादिकम् ।
एवङ्काल विजानीया गणिता कारयेन्सुधी ।

अस्य सूत्रस्याङ्क

गताब्द ४९७६८३८६१२०००० तस्य भाग ६२२० ८००००००० फलम्ब्रह्माण वर्ष शेष भाग ४३२०००० फल युगसंज्ञ युगसंज्ञ भाग ७२ फल मन्वन्तरा पूर्व्वशेष भाग १०८०००० फल कृतादि युग ।

ब्रह्मजातप्रभृत्ये वा कल्पम्वा मनुरेव वा
युगसंज्ञयगम्वाथ भविष्ये तु कालौपि वा
यं—

८ क पत्रे

लञ्च प्रवर्त्तन्ते तङ्कालाप्तञ्च साधयेत्

गताब्दं रविभि घातं चैत्रादिमाससंयुतं
द्विस्थं दस्रतुरङ्गर्तुकोषतीर्थगुणैर्वधं
खाभ्रव्योमखभ — ङ्गलोकशून्यमुखैर्हृतं
क्षेप्य ह्यधिकमासैस्तु । खतृघ्न तिथिसंयुतम्
द्विस्थ घ्ना खरसेष्वब्धिकोषरूपखपञ्चभिः ॥
भक्तं खाष्टिखशून्याभ्र — षखद्विहुताशनैः
शोध स्या वमलब्धेन भार्गवादि च हर्गणम् ॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्याङ्कटीकाः

गताब्द गुण १२ मासयुत द्विधाधरि गुण ३१८६६७२ भाग १०३६८०००० फल ऊर्द्धे योज्यः तद्गुण ३० तिथियुत द्विधा गुण ५०१६४५६०। भाग ३२०६०००१६० फलं उपरिम-राशौ शोध्य शेषा शुक्रादि द्यु गणः ॥०॥

सुमते महातन्त्रे प्रथमार्हर्गण समाप्तः ॥०॥

कल्याब्ध सन्ताडित दस्ररूपा — त्रादिकम्मासयुतं द्विसंस्थं
सङ्गुण्य कूपाष्टगुणाङ्गस्वादैः खखाभ्रशून्याष्टियमैर्विभक्ता
लब्धाधिमासैस्तु विमिश्रराशौ त्रिंशङ्गु–

८ ख पत्रे

ण —क्लतिथिविमिश्रैः
द्विस्थ घ्न लोकाद्रिरसाङ्कस्वादैः। भक्तङ्गजाद्यू डुशराब्दिवेदैः
लब्दावम शोध्य तदूर्द्धराशौ ॥ सप्ताप्तशेषान्तु सितादि – म्॥०॥

अस्य सूत्रस्याङ्क

गताब्द गुण १२ चैत्रादिमासयुत द्विधाधरि गुण ६६३८९ भाग २१६०००० फल उपरिमराशौ योज्य -- ३० द्विधा गुण ६९६७३ भाग ४४५२७७८ फल ऊर्द्धे शोध्य। शेष सितादि द्युगण ॥०॥

अब्दगतं गुणितं यमरूपैः चैत्रसितादियुतङ्गतमासम्।
द्विस्थ हतं खखखंखकुरामैः। वर्षगतं दशभिर्गुणयित्वा ॥
रूपयमेन्दुभिर्भाजित शोध्या। भाज्य गजाभ्रखषड्वनखा ैः॥
सोधिकमासविमिश्रितमूर्द्धे॥ त्रिंशगुणा सतिथि प्रतिराशिम्।
घात खखाभ्रखरूपमुखैश्च। वर्षगत खयमै हृत शोध्या
तृरशखख – खसप्तभिर्भक्ता तदवमहीनमहर्गणमाहु।
वार सितादि नगै हृत शेषा ॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य सूत्रस्याङ्क
गताब्द गुण १२ चैत्रादिमासयुत द्विधा –

९ क पत्रे

— रि गुण ३१०००० गतवर्ष गुण १० भाभ १२१ फल शोध्य भाग १००८६००८ फलाधिमास उपरिमराशौ योज्य । गुण ३० तिथियुत द्विधा अधरि गुण ११०००० गताब्द भाग २० फल शोध्य भाग ७०३००६३ फल हीन शुक्रादि ॥०॥

सुमते महातन्त्रे तृतीयाहर्गण समाप्ता ॥०॥

कल्याब्द रविभिर्घातं चैत्रादिमाससंयुतं ।
द्विस्थ त्रिंशगुणं कृत्वा भूय ताञ्च द्विधा कृतां ।
पञ्चाब्दिरन्ध्रशक्राप्ता मध्यराशौ विशोधयेत् ।
भाजये स्वादसप्ताङ्कैः तलब्दमधिमार्षकम्
ऊर्द्धराशौ नियोज्यानि त्रिंशघ्नं तिथिसंयुतं
द्विस्थ रुवधन्द्विस्थं लोकाद्रितिथित्र्यम्बकै
फलं मध्ये विहीनां च लोकाभ्रसप्तभिर्हृतम्
फलावमेन पिण्डौणां शुक्रादि द्युगणो मत ॥

अस्य सूत्रस्याङ्क ।

गताब्द गुण १२ चैत्रादिमासयुत । द्विधा अधरि गुण ३० तं भूय द्विधा भाग १४९४५ फल मध्ये शोध्य भाग ९७६ । फला उपरिमराशौ योज्य । गुण ३० द्विधा अधरि गुण ११ भूय द्विधा भाग

९ ख पत्रे

१११५७३। फल मध्ये शोध्य भाग ७०३ फल हीन शुक्रादि ॥

सुमते महातन्त्रे चतुर्थोहर्गण समाप्ता ॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कलिवर्षगतम्पिण्डम्मर्कघ्ना मासंयुतम् ।।
द्विधाधो द्विगुणं कृत्वा भूयो ताञ्च द्विधा कृतं
अष्टयाङ्कै भाग लब्धैस्तु मध्यराशौ विशोधयेत् ।
पञ्चाङ्कै भाग लब्धैस्तु योजयेच्चोर्द्धराशिके ।
त्रिंशघ्नं तिथिसंयुक्तं द्विस्थं दस्रैर्वधन्द्विधा ।
सप्तशून्याद्रिभिर्भक्त मध्यराशौ विमिश्रयेत् ।
भक्तं भद्राश्विरूपैस्तु फलं चोर्द्धे विशोधयेत् ।
द्युगणो भवते तत्रा दिनेशादि शितादिकम् ।।

अस्य सूत्रस्याङ्क

गताब्द गुण १२ चैत्रादिमासयुत त द्विधाधरि गुण २ भूय द्विधा भाग ९१६ फल मध्ये शोध्य भाग ६५ फला उपरिमराशौ योज्य तङ्गुण ३० द्विधा गुण २ भाग ७०७ फल मध्ये योज्य भाग १२८ फल फला उपरिमराशौ शोध्य शुक्रादि द्युगण ।।

सुमते महातन्त्रे पञ्चमाहर्गण समाप्त ।।०।।

गताब्द रविसङ्गुण्यं चैत्राद्यामासमिश्रितम्

१० क पत्रे

त्रिस्थं तु खाद्रिभिर्भक्तं मध्यराशौ नियोजयेत् ।
सुरैर्भक्तां फलोप्योर्द्धे त्रिंशघ्नं तिथिसंयुतं ।
त्रिस्थं खाद्रिस्वरैर्भक्तं मध्यराशौ प्रयोजयेत् ।
कालैर्भक्तं फलोनोर्द्धे शुक्रादि द्युगणो भवेत् ।।

अस्य सूत्रस्याङ्क

गताब्द गुण १२ चैत्रादिमासयुत । तृधा भाग ७० फल मध्ये योज्य भा ३३ फल ऊर्द्धे योज्य । तङ्गुण ३० तृधा अधरि भाग ७०७ फल मध्ये योज्य भाग ६४ लब्दि ऊर्द्धे शोध्य शुक्रादि द्युगण ।।

सुमते महातन्त्रेहर्गणायनं समाप्त ।।०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतगम्म्ये विशोध्यानि भाजयेद् गुणकारकैः
फलम्मासा दिनां लिप्ता विघटी प्राणमेव च ।
तथैव न्यूनरात्रञ्च दिनादीनां यथाक्रमम् ।
गतगम्म्ये तु ज्ञातव्ये अधिमासोनरात्रिकौ ॥
इष्टकाले द्युपिण्डञ्च कर्तुमिच्छति धीधनः ।
यस्मिं काले तु कर्त्तव्यं तस्मिङ्काले तु सङ्ग्रहे ।
अधिमासोनरात्रञ्च संविशेषञ्च ग्राहयेत् ।
अधिमासावशेषञ्च साधिमासं प्रयोजयेत् ।
ऊनरात्रिक-

१० ख पत्रे

शेषञ्च आवमेषु प्रयोजयेत् ।
पूर्वोक्तेन तु कर्त्तव्यं गुणकारञ्च च्छेदकम् ।
एवञ्च विधिना कृत्वा इष्टाहर्गण सिध्यति ॥०॥

खपञ्चवेदै द्युगणं विशोध्य । चक्रंशकैर्ऋतुभिस्सप्तभिश्च
तृधा कृतं छिन्न यथाक्रमेण खङ्गाग्निभिर्भाज्य फलाप्त वातैः ।
त्रिंशैर्फलं भाजित सप्तभिश्च वर्षाधिप मासप्रति दिनेषाम् ।
वर्षाधिप भानुबुधशनैश्चभौमसितचन्द्रबृहस्पतीनाम् ।
मासाधिपार्क्कौ कुजजीवसौरिशशाङ्कसोमात्मजभार्ग्गवानां ।
दिनाधिप भास्करचन्द्रभोम । बुधश्च जीवश्च सित शनिश्च ॥

अस्य सूत्रस्याङ्क

द्युगण तृधा ३ स्थाप्य अधरि भाग ३६० फल भाग ७ शेष वर्षाधिपतिर्भवति । मध्ये भाग ३० फल भाग ७ शेषा मासाधिपतिर्भवति । उपरिमभाग ७ शेषा दिनाधिपतिर्भवति ॥

------ पिण्ड सप्तर्तुयमयोजितं ।
तानेन भाजितं पिण्डं लब्दाश्विन्यादितारका ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्तर्षिश्चारमाख्यातार्लुघुकरा स्फुटं भवेत् ॥

सुमते महातन्त्रे प्रथम धूलिकर्म्म समाप्त ॥०॥

मध्यमञ्च भवेत्तत्र सूर्यादीनां यथाक्रमम् ।

आदित्यस्य खशून्याभ्रवेम–

११ क पत्रे

पिण्डबलाहकैः

चन्द्रस्याब्धियुगाग्न्यग्निरूपखैकगुणास्त्रिभिः ।

चन्द्रोच्चस्य रसाष्टाष्टदस्रभूतवटंकुभिः

कोषाग्निरन्ध्रमातङ्गपक्षकू – तमस्य तु ।

अङ्गारस्य रसाङ्काश्विसप्तनागमहीवटैः ।

ज्ञस्य व्योमखशून्याष्टवेदसप्तभुविस्वरैः ।

वाक्षतेर्नभनागाष्टकोषपञ्चनदीकुभिः ।

भार्गवस्य यमाक्षेषुच्छिद्रभद्रखपिण्डकैः ।

सौरस्यर्तुशरोपक्षाकोषयूथपपञ्चभिः ।

भागैर्शून्यखसूर्याद्रिकोषरुद्रगुणार्तुभिः ।

तस्य सूत्रस्याङ्क
भानोर्द्युगण गुण १७२८०००
इन्दोर्गुण २३१०१३३४४
चन्द्रोच्चस्य गुण १९५२८८६
पातस्य गुण ९२८९३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अङ्गारस्य गुण ९१८७२९६
ज्ञस्य गुण ७१७४८०००
जीवस्य गुण १४५६८८०
शुक्रस्य गुण २८०८९५५२
सौरस्य गुण ५८६२५६
सर्वग्रहमध्यमसाधने भागाहार ६३११६७१२०० ॥

द्युगणं सङ्गुणीकृत्य स्वं स्वन्तु गुणकारकैः ।

११ ख पत्रे

एकच्छेदक सर्व्वेषाम्प्रत्येक गुणकारकं
प्रथमम्भाजितं भग्न तच्छेषमर्कसङ्गुणं ।
अनया भाजितं राशि तच्छेष घात खाग्निभिः ।
तस्य च्छेदित भागानि शेषञ्च षष्ठिभिर्वधं ।
षष्टिभिर्गुणितं भक्तं लिप्तं भवति तस्य च ।
शेषं तु षष्ठि सङ्गुण्य तञ्च भक्त विलिप्तिका ।
तत्परा वित्परा स्थानं रेणो त्रिरेणु चाष्टम ।
षष्ठि षष्ठिभिः सङ्गुण्य तेनैव भाजयेत्क्रमम् ।
एवन्तु चाष्टमस्थानं मध्यमम्भवते क्रमात् ॥

सुमते महातन्त्रे प्रथम ग्रहमध्यम ॥०॥

ताडये द्युगणम्भानौ खखखाभ्रखरूपकैः
भग्नाद्याप्त शराद्यष्टतत्वपञ्चरसाग्निभिः ॥

चन्द्रस्य कूपभद्राग्निस्वादपक्तिकरैर्वधम् ।
भग्नाद्याक्षाद्रिपञ्चाङ्गवेदाद्रिपुष्टिभिर्हृतम् ।

चन्द्रोच्च घात रामाब्धिवेदकोषगिरिपटैः ।
भक्तं खखरसेष्वग्निचेटबानमहीक्रमैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्तरुद्राष्टिरूपैस्तु पातस्य द्युगणं वधम् ।
भाजयेत् खखकूपाष्टपञ्चाङ्काष्टाष्टसप्तभिः ॥

१२ क पत्रे

भौमोहर्गण सङ्गुण्य कभ्राद्रिविषयग्रहैः
भग्नाद्याक्षाद्रिपञ्चाङ्गवेदाद्रिपुष्टिभिर्हृतं ॥

ज्ञस्य द्युगण मर्द्दित्वा पञ्चकोषनवक्षतैः ।
भग्नादि मूर्च्छनाङ्गर्तुसप्तभद्रैर्विभाजयेत् ॥

जीवस्य द्युगणम्भिन्नं रुद्रदस्राष्टरूपकैः ।
भग्नादि खाङ्कभद्राक्षगोगजाष्टनगैर्हृतम् ॥

भार्गवस्य दिनं घातं गोगोकक्षाष्टपञ्चभिः ।
भग्नादि खेषुरूपाग्निच्छिद्रशक्रजयैर्हृतं ॥

सौरस्य द्युगणमाहत्य कुवेदाङ्गरसाग्निभिः ।
भग्नाद्याप्त खपञ्चाब्दिगोद्रिवेदाब्धिगोतृभिः ॥

अस्य सूत्रस्थाङ्क

भानोर्द्युगणं गुण १००००० भाग्नादि भाग ३६५२५८७५

चन्द्रस्य द्युगण गुण २४०६३८९ भाग्नादि भाग ६५७४६५७५

चन्द्रोच्चस्य द्युगणं गुण ९७६४४३ भाग्नाद्या भाग ३१५५८३५६००॥

पातस्य द्युगण गुण ११६११७ भग्नाद्या भाग ७८८९५८९००

कुजस्य द्युगण गुण ९५७०१ भग्नाद्या भाग ६५७४६५७५

ज्ञस्य द्युगण गुण ९९६५ भग्नादि भाग ८७६६३१

जीव–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२ ख पत्रे

स्य द्युगण गुण १८२११ भग्नादि भाग ७८८९५८९०

सितस्य द्युगण गुण ५८५१९९ भाग्नादि भाग १३१४९३१५० ॥

शनिश्चरस्य दिन — ण गुण ३६६४१ भग्नादि भागहार ३९४४७९४५० ॥

द्वितीय ग्रहमध्य ॥०॥

सूर्येन्दुचन्द्रसोच्चन्तमकुजशशिजं जीवशुक्रार्कजाना ।
खं खाश्वीरूपरूपं कलिशरयमलं कूपरूपैर्गुणित्वा ॥
प्रत्येकैकस्य पादं ग्रहगणसकलं छेदकारम्प्रवक्ष्यते ॥

लोकाश्वीपञ्चकाष्ठं मुनिशिखिरसकं रूपलोकाभ्रवातैः ॥

वर्माभ्रव्योमशून्यं रसयमतुरगा ; कूपपञ्चाश्विबाणैः ॥

स्वादाग्नित्र्यद्रिवेदं मुनिशिखिगगनं सामदस्त्रद्विकोशैः ॥

शून्याभ्रस्वादगोर्तुद्विखनखगगणं भद्रशून्याग्निसोमैः ॥

नन्दाभ्रह्यन्तरीक्षतृशरशिवशरं तत्वदस्त्राग्निचन्द्रैः ॥

पञ्चाभ्रस्वादयुग्मं यमनखविशिखं लोकनन्दर्त्तुरूपैः ॥

शुंन्याब्दीतीर्थकोषं वनवसुविवरं कभ्रवेदाग्निभद्रैः ॥

पञ्चैषूभूयमाष्टन्नववसवरसो या[1]

१४ क पत्रे

— द्वयश्विभिर्गताब्दघ्नं भागाहारमिदम्भवेत् ।

---

१. अतः परमेकं पत्रं त्रुटितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागेन द्युगणं भक्तञ्चन्द्रस्य लिप्तके हरेत् ॥०॥

अहर्गणं घात खशून्यनागैः शैलाभ्रदस्रध्रुवनन्दपक्षैः ।
भग्नादिकम्भाज्य यथाक्रमेण रात्यर्द्धकम्मध्यमभास्करस्य ॥

चन्द्रस्य शून्याभ्ररसैः प्रगुण्य भग्नादिकन्त्र्यङ्कतृस्वादरूपैः ।
व्योमाभ्रगोत्रैर्दिनसङ्गघातं । रुद्राष्ठितारैर्हृत शोध्य लिप्ते ॥

उच्चं खखैकघ्न भग्नादि भाज्यं मातङ्गगोरूपशिखाश्विरामैः ।
शतैर्वधं भाज्य फलोप्य लिप्ते पञ्चाष्टकोषाभ्ररसाब्दिबानैः ॥

शतेघ्न पातस्य विभाजयित्वा दस्रेषुवेदाङ्कतुरङ्गषट्कैः
भक्तं कृताङ्काभ्रशरेषुकोशैः । लब्दं कले योज्य विशोध्य चक्रे ॥

उर्वासुतस्य द्युगणं विभक्ता भग्नादिकं स्यात्मुनिभद्रकोशैः ।
कूपाक्षदस्राण्णवसप्तरूपैः विभक्त लब्दं घटिके प्रयुक्तं ॥

अहर्गणं घात खशून्यरूपैः । भग्नादिकं सप्तनवाद्रिनागैः

१४ ख पत्रे

वेदाभ्रवर्णैकहयैर्विभक्ता लब्दं कले योज्य बुधस्य शीघ्रं ॥

खैकैर्दिन घात विभाजयित्वा भग्नादि लोकाश्विगुणाग्निवेदैः ॥
दिग्घ्नाप्त शक्राग्नियमाश्विवर्णैं । लब्दं कले शोध्य सुरेन्द्रमन्त्री ॥

आकाशरूपैर्द्युगणम्प्रगुण्य भग्नादि भाज्या मुनिबुद्धदस्रैः ।
खघ्नन्तु पिण्डाब्दिखसप्तवातैः। भक्तांशके योज्य सितस्य शीघ्रं ॥

अहर्गणं भानुसुतस्य भग्ना भक्तन्तु कोषर्तुनगाभ्ररूपैः ।
भाज्यन्तु न—ब्दिजलाब्दिनागैः। तम्भक्त लब्दे रविशोध्य लिप्ते ॥

अस्य सूत्रस्याङ्क ।
भानो गुण ८०० भग्नादि भाग २९२२०७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रस्य गुण ६०० भग्नादि भाग १६३९३ भूय द्युग १०० भाग ४९२९११ फल लिप्ते शोध्य ।

उच्चस्य गुण १०० भग्नादि भाग ३२३१९८ भू गुण १०० भाग ५४६०८५ फल कल योज्य ॥

पातस्य गुण १०० भग्नादि भाग ६७९४५२ भूय भाग ६५५०९४ फलङ्कले योज्य ॥

कुजस्य भग्नादि भाग ६८७ भूय भाग १७४–

१५ क पत्रे[२]

२५९ लब्दा

माध्यम्प्रयोज्य ॥

बुधस्य गुण १०० भग्नादि भाग ८७९७ भूय भाग ७१४०४ फलं कले योज्य ॥

गुरोर्गुण १० भग्नादि भाग ४३३२३ भूय गुण १० भाग ४२२३१४ फलं कले शोध्य ॥

शुक्रस्य गुण १० भग्नादि भाग २२४७ भूय गुण १० भाग ७७०४२८ फलांश— योज्य ॥

सौरस्य भग्नादि भाग १०७६६ भूय भाग ८०४४९ फल लिप्त शोध्य ॥

चतुर्थ मध्यम ॥०॥

त्रिस्थं ह्यधो योजित पंच -- नागाश्विरूपैर्विभजोप्य मध्ये ।
शून्याद्रिभिर्भाज्य हरेग्रराशौ । भागादिकं मध्यमभास्करस्य ।

शून्यर्तुरामैर्विभजे तु भग्ना- - स्तु त्रिंशैर्विभजेच्च राशिः ।
शेषाङ्कलिप्तविलिप्तकासु ॥ एवां कृतांशादिक मध्यमानां ॥

---

२. मध्ये विषयान्तरसम्बद्धं पत्रत्रयं लभ्यते । तच्च पत्रत्रयमन्त्ये भागे प्रकाशयिष्यते । अस्मिन् पत्रे पत्रसङ्ख्या न दृश्यते, विषयानुरोधेन पत्रसङ्ख्या स्थापिता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वोर्हत द्विस्थ नगैः प्रगुण्य भूय -- घात — शून्यरूपैः
त्र्यद्रये कखाङ्कैकजलैर्हृतोनम । स्वादैकभूतैर्हृत योज्यमिन्दोः ॥

द्विस्थाध भिन्न विवरैर्द्युपिण्डम् द्विस्थाप्त लो-

१५ ख पत्रे

-- कु - - - मैः ।
मध्ये युता ह्याग्नियमर्तुलोकैः । ऊद्बोध्य नन्दैर्हृत चौच्चभागा ॥

त्रिस्थं द्युपिण्डं दशभिः प्रगुण्य । द्वाराश्विसिद्धैर्हृत योज्य मध्या
शू— — रूपे विभजोप्य चोर्द्धे ॥ गोरूपकेर्भक्त तमस्य भागा ।

दिग्भिः प्रगुण्य द्युगणं तृसंस्थं ॥ खत्र्यभ्रवेदाश्विभिर्भाज्यं हेयम् ।
गोश्विध्रुवैर्भक्त फ — — हीनम् । सामैर्विभक्त द्यु कुजस्य भागा ।

वेदैर्वधं द्विस्थ हतं तु रामैः । द्विस्थाद्रिताराष्टनगैर्हृतोन्नम्
शून्याग्निरूपैर्विभजेद्युतोर्द्धे ॥ — शादिक सोमसुतस्य शीघ्रम् ॥

घातं खरामैः प्रतिराशि दिग्घ्नम् भाज्यं तु दशेन्द्रसराग्निरूपैः ॥
फलोन चोर्द्धे हृत कर्तुरामैः । जीवस्य भागादिक मध्यमञ्च ॥

द्विग्घ्नं द्विधा घात खशून्यखेकैः द्विस्थाप्त भान्वर्तुकुदस्त्रभूतैः ।
मध्ये हरे तारखभूत भाज्यम् उर्द्धक्षयं भाग सितस्य शीघ्रं ।

द्विस्थं खशून्यघ्न पुनर्द्विधा च भक्तङ्खखाङ्काङ्कमहीभुजैश्च ।
हीनम्विभक्तार्क्षनगैकलोकै ॥ योज्यं खरामैर्हृत योज्य सौरः ॥

अस्य सूत्रस्याङ्क ।

१६ क पत्रे

आदित्यस्य द्युगण त्रिधाधरि योज्य ८५ भाग १२८ फल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्यराशौ योज्य भाग ७० फल ऊर्द्धराशौ शोध्य भागादि रवि मध्यम ॥

इन्दोर्द्युगण १३ द्विधाधरि गुण ७ भूय द्विधा गुण १०० भाग ४१९०१७३ फल मध्ये शोध्य भाग ५१६ फल उपरिमराशौ योज्य । भागादि चन्द्र मध्यमः ॥

उच्चस्य द्युगण द्विधाधरि गुण ९ भूय द्विधा भाग ३६१३३ फल मध्ये योज्य भाग ३६२३ फल ऊर्द्धे राशौ योज्य भाग ९ भागादि उच्च मध्यम ॥

पातस्य द्युगण त्रिधाधरि गुण १० भाग २४२९ फल मध्ये युत भाग १५० फल ऊर्द्धे देया भाग १९ फलांशादि मध्यम चक्रे संशोध्य पात ॥

कुजस्य द्युगण गुण १० तृधाधरि भाग २४०३० फल मध्ये हेया भाग २२९ फल ऊर्द्धे हीन भाग १९ फलांशादि कुज मध्यमः ॥

बुधस्य द्युगण गुण ४ द्विधाधरि गुण ३ भूय द्विधा गुण १ भाग ७८२७७ लब्दि मध्ये शोध्य भाग १३० फल ऊर्द्धे युत भागादि बुधस्य शीघ्रः ॥

गुरोर्द्युगण गुण ३०

१६ ख पत्रे

द्विधाधरि गुण १० भाग १३५१४२ फल ऊर्द्धे हीन भाग ३६१ फलांशादि गुरोर्मध्यमः ॥

शुक्रस्य द्युगण गुण २ द्विधाधरि गुण १००० भू द्विधा भागाहार ५२१६१२ फल मध्ये शोध्य भाग ५०२७ फल ऊर्द्धे हरे भागादि शुक्रशीघ्रः ॥

सौरस्य द्युगण द्विधाधरि गुण १०० भू द्विधा भाग २१९६०० फल मध्ये हीन भाग ३१७२० फल ऊर्द्धे योज्य भाग ३० फल भागादि सौर मध्यमः ॥

नवराशियुते तेत्त्रे द्वापरे स्वादराशिकं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कलौ राशित्रयं युक्तं चन्द्रोच्चे राशिके क्रमं ॥
यं युगे सम्प्रवर्त्तन्ते युगयुक्तेन कारयेत् ।
त्रेत्त्रे कलियुगे चैव पाते षड्राशि शोधयेत् ॥
एवं संस्कारितं पातं चक्रे संशोधये सदा ॥
चक्र संशोध्य शेषञ्च स्फुटम्भवति सैङ्घिकम्
चक्र १२ ० ० ०

पञ्च मध्यम ॥०॥

केन्द्रोत्पति मध्यमं प्रवक्ष्ये ॥
रूपाष्ट शोध्य खरशैर्द्दिनसङ्घघातं
तृस्थन्तु खघ्नं हृत भद्रनगेषुविशैः ।
लब्धोप्य मध्ये त्रिनवाब्धिभिर्च्छिन्न मिस्रं

१७ क पत्रे

क्वङ्गौर्विभक्त फल भाग निशारिकेन्द्रं ॥
लोकैकभिन्नं नवभद्र विशोध्य पिण्डं ।
द्विस्थं तु काष्ठैर्गुणे तं प्रतिराशि कुर्यात् ॥
नन्दाग्निदस्रकनलैर्हृत शोधयेत
कभ्राभ्रदस्रैर्हृत योज्य शशाङ्ककेन्द्रम् ॥
पञ्चैकभद्रं द्युगणै सहितं तृधा च ।
काष्ठैर्ह्यधघ्नं हृत संप्तयमाष्टवर्णैः
लब्दन्तु मध्ये युत च्छिन्न शराभ्रवेदैः ।
ऊर्द्धोप्य नन्दैर्हृत चांश निशाकरोच्चम् ॥
खघ्नञ्च लोकाद्रिकपाटसुरैर्विशोध्याः ।
द्विस्थं खखघ्नं विभजेर्तुयुगाष्टिवातैः ।
ऊर्द्धे फलं योजित भाजित रन्ध्रतीर्थैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लब्दञ्च भागादिक सैङ्किक मध्यमञ्च ॥

द्विधाध दस्राष्टशराब्धिना षडघ्नं ।
द्विस्थन्तु खघ्नाप्त रसाङ्गरसतृरूपैः ।
मध्ये फलं योजित भक्त शराश्विचन्द्रैः ।
ऊर्द्धे युतार्द्धञ्च कुजस्य च केन्द्रभागाः ॥

लोकाश्विदस्रोण दिनन्तृशतैः प्रगुण्य ।
तृस्थन्तु खघ्नं हृत भद्रनगेशुविशैः ।
लब्धोप्य मध्ये तृनवाब्धिभिर्छिन्न मिश्रम्
पञ्चाभ्ररामैर्हृत भाग बुधस्य केन्द्रम्

तत्वाङ्क— — — — — — — —

१७ ख पत्रे

प्रगुण्य ।

द्विस्थन्तु खघ्नं द्विध भाज्य नगाभ्रतिथ्या ।
मध्ये विहीनं मनुपञ्चगुणैर्विभक्ता ।
हीनाग्रराशौ हृत खाङ्ग गुरोश्च केन्द्र ॥

वक्त्राष्ट - - भिन्न घात खदस्ररूपैः ।
तृस्थं शरै गुण्य भजे नवपिण्डकाष्ठैः ।
मध्ये युतं भाजित लोकनवकृतैश्च ।
ऊर्द्धे युताप्ता यमदस्रकुभिस्सितस्य ॥

सप्ताद्रिचन्द्राद्रि हरेर्दिन भिन्न दस्रैः ।
द्विस्थं शतैघ्नाप्त नखाश्विनगैकलोकैः ॥
लब्धाग्रराशौ सहितम्विभजेभ्रकोशैः ।
तं लब्ध भागादि शनैश्चरकेन्द्र सिद्धम् ॥

अस्य सूत्रस्याङ्क _

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदित्यस्य द्युगणे शोध्य ८१ गुण ६० तृधाधरि गुण १० भाग २०५७८ फल मध्ये योज्य भाग ४९३ फल ऊर्द्धे योज्य भाग ६१ फल भागादि रविकेन्द्रम्भवति ॥

चन्द्रस्य द्युगण गुण १३ शोध्य ८९ द्विधाधरि गुण १० भूय द्विधा भाग. ३१२३९ फल मध्ये शोध्य भाग २००१ फल ऊर्द्धे योज्य भागादि चन्द्रकेन्द्रम्भवति ॥०॥

चन्द्रोच्चस्य द्युगणे योज्य ८१५ तृधा–

१८ क पत्रे

धरि गुण १० भाग ४८२७ फल मध्ये युत भाग ४०५ फल ऊर्द्धे योज्य भाग ९ फल भागादि चन्द्रोच्चको भवति ॥०॥

पातस्य दिन गुण १० शोध्य ३३९७३ द्विधाधरि गुण १०० भाग ७१६४६ फल ऊर्द्धे योज्य भाग १८९ फलांशादि पात मध्यमो भवति ॥०॥

कुजस्य दिन द्विधाधरि शोध्य ४५८२ गुण ६ द्विधाधरि गुण १० भाग १३६६६ फल मध्ये योज्य भाग १२५ फल ऊर्द्धे योज्य दलीकृत्य अंशादि कुजस्य केन्द्रो भवति ॥०॥

बुधस्य द्युगणे सोध्य २२३ गुण ३०० तृधाधरि गुण १० भाग २०५७८ फल मध्ये योज्य भाग ४९३ फल ऊर्द्धे योज्य भाग ३०५ फलांशादि बुधस्य केन्द्रो भवति ॥०॥

गुरोर्द्युगणे शोध्य १९२५ गुण ५ द्विधाधरि गुण १० भूय द्विधाधरि भाग १५०७ फल मध्ये शोध्य भाग ३५१४ फल ऊर्द्धे शोध्य भाग ६० फलाशादि गुरोः केन्द्रम्भवति ॥०॥

१८ ख पत्रे

शुक्रस्य दिने शोध्य ८१ गुण १२० तृधाधरि गुण ५ भाग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding; MIDF

१०२८६ फल मध्ये युत भाग ४६३ फल उपरिमराशौ योज्य भाग १२२ फल भागादि शुक्रकेन्द्रम्भवति ॥०॥

शौरस्य द्युगणे शोध्य ७१७७ गुण २ द्विधाधरि गुण १०० भाग ३१७२७ फल अग्रराशौ योज्य भाग ६० फलांशादि शौरकेन्द्र-म्भवति ॥०॥

सर्व्वग्रहाणाम्मन्दकेन्द्रोत्पत्ति षष्ठ परिसमाप्तः ॥॥

अपरञ्च प्रवक्ष्यामि सुमते सारमुत्तम ।
इष्टकाले द्युपिण्डञ्च कर्तुमिच्छन्ति धीमता ॥
अधिमासावमौ तीतौ भागशेशौ च संग्रहे ।
वर्त्तमानं प्रयुक्तानि अधिमासाधिमासके ।
अवमा समेव संयुक्त च्छेद्ययोः तौ विचक्षणैः ।
पूर्वोक्तगुणच्छेदाभ्याङ्कर्त्तव्यञ्च यथाक्रमम् ।
यस्मिं वर्षे प्रवर्त्तन्ते वारं ज्ञात्वा क्रमेन तु ॥०॥

इष्टमध्यम कर्त्तव्य भास्कराद्या यथाक्रमम् ।
अतीतमध्यमानाञ्च चांशामालञ्च कारयेत् ।
त–

१९ क पत्रे

म्मिष्टाहर्गणे योज्य स्वां स्वां गुणैश्च सङ्गुणं ।
लिप्ता तथैव सङ्गुण्य षष्ठयाप्ता योज्य चांशके ।
स्वां स्वां भागै भजेताञ्च भग्नाद्या च क्रमेण तु ।
एवञ्च कारयेद्धीमामिष्ट मध्यम सिध्यति ॥

अथ सक्षेपतो वक्ष्ये स्वल्पकर्म्मेण सिध्यति ।
पूर्वोक्तेन विधानेन इष्ट मध्यम साधयेत् ।
अतीता मध्यमानाञ्च संयोज्यमिष्टमध्यमं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिध्यते नात्र सन्देहो इष्टमध्यमकर्म्मणि ॥॥

दिनभोगम्प्रवक्ष्यामि भास्कराद्या यथाक्रमम् ।
स्वां स्वां गुणैश्च सङ्गुणम्
द्वादशादि गुणं कृत्वा स्वां स्वां भागैर्विभाजयेत् ।
यत्र स्थाने लभे भागन्तदधो कल्पये गतिम् ।
मासभोग तथैव स्या वर्षभोग तथैव च ।
दशवर्षं सहस्रम्वा । तथैव कारये सदा ।
यदि मण्डलसंप्राप्तं मण्डलं त्यजते ग्रहम् ।
क्रमेण कारयेच्चैवम्भोगकर्म्म विधानत ॥

अथवा गुणकाराणां स्वां स्वां सूर्यादिकं क्रमम् ।
शैलविंशद्विगोदस्रैः भक्तम्मध्यमभुक्तिका
त्रिंशघ्नेन तु मासं स्यात्

१६ ख पत्रे

ता रविघ्नन्तु वर्षिका
एवं क्रमेण बोधव्य दिनम्मासञ्च वार्षिकं ॥

अतः परम्प्रवक्ष्यामि दिनभोगादिसंज्ञयाः ।
लिप्ताधो षट्सु स्थानानि यथाक्रमेण पूर्व्वष ॥

छिद्रपञ्च कला भानोः विकलाष्टकमेव च ।
तत्परे शून्यरूपञ्च दशश्चैव वितत्परे ।
सप्तत्रिंशति रेणुं स्याद्विरेणो भद्रचार्ण्णवा ॥
रविभोग इति ॥

लिप्ते खङ्काद्रि चन्द्रस्य विकले वेदवह्नय ॥
दस्रेषु तत्परेश्चैव कोषश्चैव वितत्परे ।
रेणौ गगणबानञ्च सप्तपञ्च विरेणुके ।
चन्द्रदिनभोग इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रोच्चस्य षट लिप्ते विकले शून्यसागरा
छिद्रेषु तत्परेश्चैव रन्ध्रदस्र वितत्परे ।
रेणौ शशाङ्कभूतञ्च विरेणौ शुन्न्यचन्द्रमा ।
चन्दोच्चस्य दिनभोग इति ॥

सर्भानोः लिप्तके त्रीणि विलिप्ते दशमेव च ।
तत्परे वेदसामुद्र रूपराम वितत्परे ।
रेणो शशाङ्कदस्रञ्च शून्यरूप विरेणुके ।
सर्भानो दिनभोग इति ॥

लिप्ते रूपाग्नि भौमस्य स्वादपक्ष विलिप्त–

२० क पत्रे

के ।

तत्परे सप्तदस्रञ्च सप्तवेद वितत्परे ।
स्वादलोकञ्च रेणौ तु वेदपञ्च विरेणुके ।
भौमस्य दिनभोग ॥

ज्ञस्य लिप्तेषुवेदाश्विः दस्रवह्नि विलिप्तंक ।
तत्परे सप्तरूपञ्च भूतवेद वितत्परे ।
वैश्वानराश्वि रेणो तु विरेणौ च हुताशनम् ॥
बुधस्य दिनभोग इति ॥

जीवस्य लिप्ते चत्वार च्छिद्रपञ्च विलिप्तके ।
वारुण रुत्परेश्चैव गजवेद वितत्परे ।
रेणो तु स्वादलोकञ्च स्वादभूत विरेणुके ॥
जीवस्य दिनभोग इति ॥

सितस्य लिप्त स्वादाङ्क विलिप्ते सप्तमेव च ।
तत्परे वेदवेदञ्च लोकरूप वितत्परे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रेणो तु मुनयश्चैव लोकपञ्च विरेणुके ॥
सितस्य दिनभोग इति ॥

सौरस्य च कले दस्र विकले शून्यमेव च ।
दस्राग्नि तत्परेश्चैव रूपवेद वितत्परे ।
रेणो चर्तुहुतासञ्च विरेणौ कोषवह्नय ।
सौरस्य दिनभोग इति ॥

दिनभोगम्भवेत्तत्र मासभोगं ततोपरि ।
सर्व्वाषां दिनभोगानां लिप्ताद्याधो द-

२० ख पत्रे

लीकृतां ।
लिप्ता भागं प्रकल्पित्वा मासभोग भवेत्ततः ।

दिनमेकस्य भोगञ्च सर्व्वत्र षड्गुणीकृतम् ।
लिप्ता भागम्प्रकम्पित्वा वर्षभोग भवेत्ततः ।

दिनभोगस्य लिप्ता तु द्विगुणङ्कारये ततो ।
तं लिप्तं कल्पयेच्चाशं दशाब्दभोगमेव च ।

एवं क्रमेण कर्त्तव्य शतं वाथ सहस्रकम् ॥०॥

चन्द्रकेन्द्रस्य भोगानि प्रवक्ष्याम्यनुपूर्व्वस ।
कले त्र्यष्टमुनिश्चैव विकल लोकपञ्चक
तत्परे दस्रभूतञ्च स्वादाग्निञ्च वितत्परे
रेणो कपाटाभूतञ्च विरेणो सप्तचार्ण्णवा ॥

अस्य सूत्रस्य सूर्यादिदिनभोगस्याङ्कं प्रत्येकं लिखितम् ॥

मन्दोच्चकम्प्रवक्ष्यामि भास्कराद्या यथाक्रमम् ।

राशौ द्वौ साम चांशं तु खेषु लिप्ते पले नखः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रस्य चलते नित्यं गनितं कारयेत्सदा ॥

तृ राशौ चांशक वीश लिप्ते चाग्नि फले नभः ।

सप्त राशौ कपाटांशेद्य्राब्धि लिप्ते पले मतिः ।

पञ्च राशौ नवांशे तु लिप्तेद्य्राक्ष पलेर्तुदः

द्वि राशौ च च्छिद्रैक

२१ क पत्रे

आदीत्यभोग	चन्द्रभोग	उच्चभोग	पातभोग
०	०	०	०
०	०	०	०
५९	७९०	६	३
८	३४	४०	१०
१०	५२	५९	४४
१०	६	२९	३१
३७	५०	५१	२१
४८	५७	१०	१०

अङ्गारभोग	बुधभोग	बृहस्पतिभोग	शुक्रभोग
०	०	०	०
०	०	०	०
३१	२४५	४	९६
२६	३२	५९	७
२७	१७	८	४४
४७	४५	४८	१३
३६	२३	३६	७
५४	३	५६	५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शनिभोग	चन्द्रकेन्द्र
०	०
०	०
२	७८३
०	५३
२२	५२
४१	३६
३६	१९
३६	४७

आदित्यमन्दो	चन्द्रमन्दो	अङ्गारमन्दो	बुधमन्दो
२	०	३	७
१९	०	२०	९
५०	०	३	४७
२०	०	०	२२
गुरुमन्दो	सितमन्दो	शनिमन्दो	
५	२	७	
९	१९	२९	
५७	५०	५९	
३६	२	१२	

२१ ख पत्रे

खेषु लिप्ते पले यमः ।

सप्त राशौ नवद्यांशे लिप्ते गोक्षा पले रविः ।

अस्य सूत्रस्याङ्क ॥

भान्वादीनां मन्दोकस्याङ्क पृथत्पृथक् लिख्यन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूय मन्दोच्चकम्वक्ष्ये भागमेकन्तु केवलम् ।
आशीतिरंशकै भानोरिन्द्रो प्रोक्तम्विजानयेत् ।
खरुद्रा भाग भौमस्य खाश्विदस्र बुधस्य च ।
खाष्टि भागे तु जीवस्य खगज भार्गवस्य च
खाब्धिदस्रांश सौरस्य सूर्याद्यामनुपूर्वशः ॥

अस्य सूत्रस्याङ्क

भानो मन्दोचांश ८०
कुजस्य मन्दोचांश ११०
बुधस्य मन्दोचांश २२०
गुरो मन्दोचांश १६०
सितस्य मन्दोचांश ८०
सौरस्य मन्दोचांश २४०॥

देशान्तकम्

ततो विशुवरेखम्वक्ष्ये

भूमध्ये पतिता विशुवरेखा याम्योत्तरसंस्थिता ॥
हिमवन्तस्थानेश्च कोलगिरिमलयसमरेखा ।

विशुवरेखात्पूर्वायां दीशान्तरं सोधयेत् ।
परे विमिश्रयित्वा तु ग्रहानां मध्यमे क्रमम् ।

पूर्व्वम्वा पश्चिमम्वाथ यत्र योजन-

२२ क पत्रे

मन्तरं ।

तत्र भोगेन सङ्गुण्य ग्रहानां स्वेन स्वेन तु ।
दस्राभ्राष्टद्विभिर्भक्तं फलं शोध्यानि योजयेत् ।

एव मध्यमसंस्कारा स्फुटञ्च कारयेत्ततो ॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुमतितन्त्रस्य
ताडपत्रोपलब्धः पाठः

ताडपत्रोपलब्धस्य सुमतितन्त्रस्यैतावान् भागो ग्रहाणां
मध्यमस्थानसाधनायोपयुज्यते । अतः परं
ग्रहाणां स्पष्टस्थानसाधनोपयुक्तो
भाग आगच्छति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्दवृत्तिम्प्रवक्ष्यामि यथावदनुपूर्व्वसः ।
भास्करस्य कुपञ्चाग्नि मिन्दो पाञ्चाद्रिसप्त च ॥०॥
कुजस्य खेषुसप्तैकः बुधस्य खाभ्रपर्व्वतः
जीवस्य व्योमशून्याष्ट । सितस्य खार्थवह्नय
सौरस्य खखपञ्चैक । इत्येते परिधिर्भवेत् ।

शीघ्रवृत्तिम्प्रवक्ष्यामि कुपुत्राद्या यथाक्रमम् ।
खेष्वष्टप भौमस्य । खखदेव बुधस्य च ।
खशून्याष्ट जीवस्य । खखपुष्टि सितस्य च ।
खैकशून्यैक सौरस्य शीघ्रवृत्ति भवेत्क्रमम् ।

मन्दे वा यदि ना शीघ्रे नवसाहस्रकैर्हृतम् ।

अस्य सूत्रस्याङ्क ।

भानो मन्दवृत्ति ३५१
इन्दो मन्दवृत्ति ७७५
कुजस्य मन्दवृत्ति १७५०
बुधस्य मन्दवृत्ति ७००
जीवस्य मन्दवृत्ति ८००

२२ ख पत्रे

शुक्रस्य मन्दवृत्ति ३५०
सौरस्य मन्दवृत्ति १५००
भागहार ९०००

कुजस्य शीघ्रवृत्ति ५८५०
बुधस्य शीघ्रवृत्ति ३३००
गुरो शीघ्रवृत्ति १८००
सितस्य शीघ्रवृत्ति ६१००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौरस्य शीघ्रवृत्ति १०१०
भाग ६०००

प्रथम हावृति ॥०॥

प्रत्येकेन प्रवक्ष्यामि भास्कराद्या यथाक्रमम् ।
गुणकार छेदकारञ्च मन्दशीघ्र तथैव च ।
भानो शराश्विभिर्घातम् कुवेदाङ्गैर्विभाजयेत् ।
चन्द्रस्य क्वाग्निभिर्गुण्य खर्तुरामैर्विभाजयेत् ।
भौमस्य सङ्गुण्य वातैः स्वादलोकैर्विभाजयेत् ॥
बुधस्य सप्तभिर्घातं शून्यकूपैर्विभाजयेत् ।
गुरो वेदेन सङ्गुण्य शरवेदैर्विभाजयेत् ।
शुक्रस्य सप्तभिर्गुण्य शून्यतीर्थैर्विभाजयेत् ।
शौरस्य च गुणन्नास्ति स्वादैर्तज्या विभाजयेत् ।
इत्येते म-

[२३ क पत्रे

न्दकर्म्मञ्च शीघ्रकर्म्मन्ततोपरि

विश्वै घ्नं नखभिर्भक्तं रुद्रै घ्न त्रिंशभिर्हृतं ।
निर्गुणं पञ्चभिर्भक्तं जयैर्घ्नं धृतिभिर्हृतम् ।
निर्गुणं नवभिर्भक्तं शीघ्रकर्म्म कुजदय ॥

अस्य सूत्रस्याङ्क ॥
आदित्यस्य मन्दगुण २५ भाग ६४१
इन्दो मन्दगुण ३१ भाग ३६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुजस्य	मन्दगुण	७ भाग	३६
बुधस्य	मन्दगुण	७ भाग	६०
गुरो	मन्दगुण	४ भाग	४५
शुक्रस्य	मन्दगुण	७ भाग	१८०
सौरस्य	मन्दगुण	० भाग	६।

इत्येते मन्दकर्म्म ॥

ततो शीघ्रकर्म्म ।

कुजस्य	शीघ्रगुण	१३ भाग	२०
बुधस्य	शीघ्रगुण	११ भाग	३०
गुरो	शीघ्रगुण	० भाग	५
शुक्रस्य	शीघ्रगुण	१३ भाग	१८
सौरस्य	शीघ्रगुण	० भाग	६ ॥०॥

द्वितीय वृति ॥०॥

ग्रहाणाङ्गुणकारञ्च तस्यैकं गुणकारकम् ।
मन्दे वा यदि वा शीघ्रं शून्याभ्रखाश्विभिर्वधम् ।
प्रत्येकं छेदकारञ्च सूसूर्यादीनां यथाक्रमम् ।
भानोः खाङ्का–

२३ ख पत्रे

श्विरूपाक्षा रिन्दोः तत्वरदाश्विनौ ।
कुजस्य शरपिण्डाशं ज्ञस्यार्काद्यृक्षलोचना
जीवस्य खखतत्वाश्वि तत्वेन्द्राक्षा सितस्य च
सौरस्य खखखाश्व्यैका मन्दकर्म्मेषु च्छेदकाः ।

शीघ्रच्छेदं कुजादीनां सप्ताद्रिखाग्नि भूमिजे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शराक्षाब्दिशरो बुधा खखखखेक वाक्पते ।
शुक्रस्य गोर्तुसप्ताश्वि ् खखखाष्टैक सूर्यज ॥

अस्य सूत्रस्याङ्क
मन्दकर्म्मे वा शीघ्रकर्म्मे वा । सर्व्वग्रहगुणकार २०००।

भानोः मन्दच्छेदक ५१२९०
इन्दोः मन्दच्छेदा २३२२५ ।
कुजस्य मन्दच्छेद १०२८५
बुधस्य मन्दच्छेद २५७१२
गुरोः मन्दच्छेद २२५००
सितस्य मन्दच्छेद ५१४२५
सौरस्य मन्दच्छेद १२००० ॥

कुजस्य शीघ्रच्छेद ३०७७
बुधस्य शीघ्रच्छेद ५४५५
जीवस्य शीघ्रच्छेद १००००
सितस्य शीघ्रच्छेद २७६९
सौरस्य शीघ्रच्छेद १८००० ॥

तृतीय वृति ॥०॥

२४ क पत्रे

पुन प्रत्येककर्माणि सूर्याद्या मन्दशीघ्रयोः ।
भानोः नखैस्तु सङ्गुण्य तृरूपाक्षै विभाजयेत् ।
सप्ताक्षै सङ्गुणमिन्दोः दस्राङ्गर्तुभि च्छेदयेत् ।
भूमिजस्य वधन्तानैः युग्मपञ्चाश्विभिर्हृतम् ।
वेदरूपैर्वधं ज्ञस्य भक्तं शून्याष्टरूपकैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवस्य वारणैर्घातं व्योमच्छिद्रैर्विभाजयेत् ।
शराग्निभिर्हत शुक्रः शून्यखाङ्कैर्विभाजयेत् ।
सौरस्य पञ्चभिर्भिन्नं भाजयेत् शून्यवह्निभिः ॥
इत्येते मन्दवृत्तीना गुणैर्भागैर्यथाक्रमम् ।
शीघ्रवृत्ति कुजादीनां गुणकारं छेदकारकां
कुजस्य खेषुभिर्भिन्नं सप्तसप्तभिरुधृता
यमाश्विभिर्वधण्ज्ञस्य शून्यकोषैर्विभाजयेत् ।
जीवस्य च नखैर्भिन्न खशून्यैकैर्विभाजयेत् ।
शुक्रस्यार्तुयमैर्भिन्नं स्वाद-

२४ ख पत्रे

रामैर्विभाजयेत् ।

दस्रघ्नं सूर्यपुत्रञ्च नागरूपैर्विभाजयेत् ।

अस्य सूत्रस्याङ्क

भानो	मन्दगुण	२०	भाग ५१३
चन्द्रस्य	मन्दगुण	५७	भाग ६६२
कुजस्य	मन्दगुण	४६	भाग २५२
बुधस्य	मन्दगुण	१४	भाग १८०
जीवस्य	मन्दगुण	८	भाग ६०
शुक्रस्य	मन्दगुण	३५	भाग ६००
सौरस्य	मन्दगुण	५	भाग ३० ॥
कुजस्य	शीघ्रगुण	५०	भाग ७७
ज्ञस्य	शीघ्रगुण	२२	भाग ६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवस्य शीघ्रगुण २० भाग १००
शुक्रस्य शीघ्रगुण २६ भाग ३६
सौरस्य शीघ्रगुण २ भाग १८ ॥०॥

चतुर्थ वृति ॥०॥

गुणैक मन्दशीघ्रे वा शतैर्भिन्नं यथाक्रमम् ।
भागाहारञ्च प्रत्येकं सूर्यादीनां यथाक्रमम् ।
वेदार्तुतत्व सूर्यस्य इन्दो कर्तुकुरूपकं
भौमस्य वेदरूपाक्षा सप्ताष्टार्क्क बुधस्य च
जीवस्य तत्वरूपैका कृताद्रयक्षाश्चि भार्ग्गवः
शौरस्य व्योमशून्याङ्गा मन्दकर्म्मेषु च्छेदका ॥

शीघ्रच्छेदङ्कुजादीनां यथाकमणि पूर्व–

२५ क पत्रे

वत् ।
भौमस्य वेदपञ्चैका लोकातार बुधस्य च ।
जीवस्य खखभूतञ्च भद्रलोकैक भार्ग्गवः ।
सौरस्य व्योमशून्याङ्क शीघ्रच्छेद रिति स्मृतः ॥

अस्य सूत्रस्याङ्क ।
आदित्याद्या सर्व्वग्रहा गुणकार १००

आदित्यमन्दभाग २५६४
चन्द्रस्य मन्दच्छेद ११६१
कुजस्य मन्दभाग ५१४
बुधस्य मन्दभाग १२८७
जीवस्य मन्दभाग ११२५
शुक्रस्य मन्दभाग २५७४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौरस्य मन्दभाग ६००

मन्द इति ॥ ॥

कुजस्य शीघ्रहृत १५४ ।
बुधस्य शीघ्रहृत २७३
जीवस्य शीघ्रहृत ५००
सितस्य शीघ्रहृतं १३८
सौरस्य शीघ्रहृत ९००
शीघ्रकर्म्मे हृतकार इति ॥०॥

पञ्चमश्च वृतिका

संहित भूषणार्थेन विविधा कर्म्म कल्पिता ॥०॥
खण्डञ्च संप्रवक्ष्यामि संख्याञ्च नवति स्मृत ॥
खर्तु खसूर्य खभद्रशशाङ्का _ खान्ध _ खखत्रय _ खर्तुहुताशा _
गोकलिवेद _ गजाद्रिकृताश्च । सप्तगुणार्थ _ रशाङ्कशराश्च _
पञ्चशराङ्ग कृतैकतुर–

२५ ख पत्रे

ङ्गा _ लोकशिलाचल _ कग्निकरिन्दा ॥
गोगजभद्र _ नगार्णवरन्ध्रा _ वेदखखैक _ कुस्वादखरूपा ॥
तीर्थमुखैक _ शराद्रिभवाश्च _ दशगुणार्क _ गजाष्टयमैका ।
त्र्यब्धिगुणैक _ गजाङ्कशिखीन्दु _ त्र्यक्षकृतैक _ गिरिखशरैक ।
कर्तुशरैक कृतैकरसैका । सप्तरसाष्टि _ नवैकमुनीन्दु ।
खाद्रिस्वरैक _ कुदस्त्रवनैक । द्वेनगतीर्थ । द्विदशवटैका ।
द्वयद्रिनवैक _ कुदस्त्रखनेत्रा । गोरसखाश्वि _ रसैककुदस्त्रा ।
त्र्यर्तुकुदस्त्र नवाभ्रद्विदस्त्रा । मुष्टियमाश्वि _ खखत्रयपक्षा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदकृताज्य _ गजाष्टगुणाश्वि । कग्निकृताश्वि _ तृसप्तजिनञ्च ।
शक्रशराश्वि शरेन्द्रियतत्वा । पञ्चठतत्व _ कृताग्निरसाश्वी ।
द्वयद्रिरसाश्वि _ कपाटखतारा । पण्चकृतोडु _ शशीवनतारा ।
अष्टिगजाश्वि _ खपञ्चवनाश्वि । त्र्यष्टगजाश्वि _ रसैकनवाश्वि ।
सप्तजलाम _ शिलाद्रिकुचाश्च । स्वादखखाग्नि _ शराग्निखलोका ॥
त्र्यङ्गखराम _ खच्छिद्रख–

२६ क पत्रे

लोका । अष्टिकुलोक _ महीमनुराम ।
वेदरिथाग्नि _ स्वराष्टकुलोका । भद्रनखाग्नि _ नवाश्विरदाश्च ।
तानकराग्नि _ नवर्तुयमाग्नि । सप्तफलाग्नि कृताम्बरदेवा ।
भूध्रुवदेव _ रसाग्निसुराश्च _ स्वार्थतृलोक _ गुणर्तुसदेवा ।
चहयदेव शराष्टगुणाग्नि ॥ पञ्चठदेव _ कृताभ्रकृताग्नि ।
सूर्यकृताग्नि । नवैककृताग्नि । बुद्धकृताग्नि _ वटाश्विकृताग्नि ।
देवकृताग्नि _ शराग्निकृताग्नि । द्यूग्निजलाग्नि _ गजाग्नियुगाग्नि ॥॥

सर्व्वग्रहाणां नवतिस्तु सखण्डाः ॥०॥

अस्य सूत्रस्याङ्क

सर्व्वग्रहाणां तस्यैव खण्ड अङ्ककृत लिखितम् ॥

६०।	१२०।	१८०।	२४०।	३००।	
३६०।	४१९।	४७८।	५३७।	५९६	॥१०॥
६५५।	७१४।	७७३।	८३१।	८८९॥	
९४७।	१००४।	१०६१।	१११८।	११७५	॥२०॥
१२३२।	१२८८।	१३४३।	१३९८।	१४५३।	
१५०७।	१५६१।		१६६७		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

				।१७१९	॥३०॥
१७७०।	१८२१।	१८७२।	१९२२।	१९७२।	
२०२१।	२०६९।	२११६।	२१६३।	२२०९॥	॥४०॥
२२५५।	२३००।	२३४४।	२३८८।	२४३१।	
२४७३।	२५१४।	२५५५।	२५९५।	२६३४॥	॥५०॥
२६७२।	२७०९।	२७४५॥	२७८१।	२८१६।	
२८५०।	२८८३।	२९१६।	२९४७।	२९७७	॥६०॥
	३०३५॥	३०६३।	३०९०।	३११६।	
३१४१।	३१६४।	३१८७॥	३२०८।	३२२९	॥७०॥
३२४९।	३२६९।	३२८७।	३३०४।	३३२१।	
३३३६॥	३३५०।	३३६३।	३३७४।	३३८५	॥८०॥
३३९५।	३४०४।	३४१२।	३४१९।	३४२४।	
३४२९॥	३४३३।	३४३५।	३४३७।	३४३८	॥९०॥

अस्य सूत्रस्यांक
सर्वग्रहाणां तस्यैव खण्डाङ्का कृत लिखितं

ॐ सर्व्वग्रहाणा देशान्तरलिप्तादिक्रमः ॥

आ	चं	उ	अं	बु	बृ	शु	श	रा
०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०
१	२६	०	१	८	०	३	०	०
५८	२०	१३	२	१०	१०	१२	४	६
१	३	२	५	५	०	१	१	२

देशान्तरनाडी योजन १६० बुनज्य योजन ९६०० भाग

२८८१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विक्षेपक्रान्ति अयनान्सञ्च तेन कारयेत् ।
सर्वकर्म्मिकखण्ड इति ।।०।।

मन्दचारम्प्रवक्ष्यामि भास्कराद्या यथाक्रमं ।
इष्टभागं नवत्याशं पञ्चस्थानेषु स्थापयेत् ।
यत्र संस्थाप्य भागस्य विदित्वा खण्ड तस्य च ।
स्वकीयमन्दकर्माणि पूर्व्ववत्कारयेत्पृथक् ।
स्वं स्वं यत्र फलम्प्राप्य शोधयेत परस्परम् ।
ततोप्य क्रमं पञ्च पुन स्थाप्योत्क्रमन्तथा ।
एवञ्चार विदित्वा तु क्रमस्थाने धनं भवेत् ।
उणं चोत्क्रमस्थाने तु स्या तु चार धनर्ण्णयोः ।

भानो धृत्यांशकं शोध्य पञ्चस्थाने तु स्थापयेत् ।
फल कन्धि गजाग्निञ्च गाश्वि च्छिद्रैक मारुतम् ।।०।।

तथैव रिन्दोः शोध्यांश धृत्यांशा पञ्चस्थानके ।
फलं मुखान्ध रोमाष्ट शरार्तु द्विजलन्तिथि ।।

लोहितस्याष्टि मेघञ्च जय तीर्थ रसाश्विनं
फल रामाग्नि दस्रञ्च नेत्रं सपादमेदिनी ।।०।।

बुधस्य विश्व वेदैक तिथि दस्राश्वि षट्करं
फलमेकञ्चतुःस्थाने पञ्चमे चार्द्ध रंशकम् ।।०।।

गुरो रुद्रार्क विश्वञ्च स्वादैक वसुवंह्नयः ।
फलं शशाङ्क शीतांशु शशि सोम निशाकरम् ।।०।।

शुक्रस्य सूर्यचारेण मन्दकर्म स्फुटीकृतः ।

सौरस्य धृति वेदैक तिथि खैका दिवौकसः ।
फलं रामाश्वि नेत्रञ्च धरणी सार्द्धचन्द्रमा ।।०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२७ ख पत्रे

शीघ्रचारं तथैवञ्च शीघ्रकर्मेण कारयेत् ।
धनर्ण्णौ चांशकौ ज्ञात्वा ततः कर्म्माणि कारयेत् ।
धनर्ण्णांशौ न तुल्यानि फलतुल्य धनार्ण्णयोः
इष्टधा स्थाप्य भागञ्च कृत्वा तु भजकोटना ।
निष्पन्नन्धनलब्धञ्च ततः शोध्य परस्परे ।
ततो शोध्य फल यच स्थापयित्वा स्व चांशकात् ।
एवं तु धनकर्माणि तथैवन्तु मृणस्य च ।
इष्टेष्टभाग संशोध्य चक्रार्द्धराशिकांशके ।
यत्र मृणंशकं मस्ति तत्र तस्मिम्विशोधयेत् ।
सर्व्वत्र फल निष्पन्नं चमे चमे विशोधयेत् ।
एवम्मृणफलम्विद्या शेष स्थाप्य स्व चंशकात् ।

धनर्ण्णांशका पिण्डानि विशेषेण प्रवक्ष्यते ।
भौमस्य धन शोध्याशा पञ्चत्रिंशोत्तरं शतं ।
विंशोत्तरशतं ज्ञस्य अष्टोत्तरशतं गुरोः ।
सितस्य भूमिशक्रञ्च षट्नवत्या शनैश्चरः ।

कुजस्य	१३५
ज्ञस्य	१२०
गुरो	१०८
शुक्रस्य	१४१
शनि	९६॥०॥

कुजस्य मृण शोध्यांशा विशया तु महोर्म्मिका ।
बुधस्य शून्यकोशञ्च यमशैल बृहस्पतेः ।

२८ क पत्रे

शुक्रस्य च्छिद्ररामञ्च सौरस्य कृतमङ्गलं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अङ्गारस्य	ऋण शोध्यङ्श	४५
बुधस्य	ऋण शोध्यंश	६०
गुरो	ऋण शोध्यंश	७२
शुक्रस्य	ऋण शोध्यंश	३६
शनैश्च	ऋण शोध्यंश	८४

एते ऋणंशका ॥०॥

पञ्चताराग्रहानाञ्च शीघ्रचार धनर्णयोः ।
सप्तधा धनचाराणि ऋणचारन्तु सप्तधा ।
धनचारादि विज्ञेया ऋणचार तन्तान्तके
शोध्य फलं धनर्णाञ्च स्वं स्वं स्थानेषु स्थापयेत् ।
तम्प्रवक्ष्यामि चारं तु भौमाद्या चानुपूर्व्वशः ।

भौम पिण्ड जय साम मेघ त्रैकोल्वनो मनुः ।
फलम्भवाक्ष सप्तर्तु वेदाद्रि ह्यर्द्ध रशकम् ।
ऋणांशाशाग्नि रुद्रार्थ रन्ध्रवेदहुताशनैः ।
फल यमैक स्वादर्तु जयाद्रि सार्द्धश्लीमुखम् ।

भौमस्य इति ॥०॥

ज्ञस्य तीर्थाष्टि सप्तैक साम सामाङ्गुला शिव ।
फलम्पञ्चाब्धि तोयाम्बु वह्नि रूपार्द्ध रंशकम् ।
ऋणांशा भद्र स्वादाङ्क वह्नि पञ्च भवोपघैः ।
फल मुखैक दस्रैक यमार्थ सार्द्धच्छिद्रकम्

बुधस्य इति ॥०॥

गुरोर्क्क साम रूपाब्धि भद्रशम्भुघटा नखः ।
फलन्दस्राग्नि लोकैन्दु क्षिति रूप ह्यर्द्ध रंशकम् ।
ऋणांशा रन्ध्र त्र्यांशेन्द्र रुद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गाम्भीर ह्यष्टभिः ।
फलं त्र्यंश षडंशञ्च कु द्वि द्वि यम चार्णवः ।

गुरो इति ॥०॥

सितस्य सिद्ध दुर्व्वाष्टि मेघाशा ह्यङ्गुला तिथि ।
फलं काष्टाष्टि स्वादर्तु त्रिस्सपादाब्धि मेदिनी ।
ऋणं सप्तर्तुरुद्रार्थ वह्निवेदहुताशनैः ।
फलं सपादरूपाग्नि दिशष्टत्वाशमङ्गलम् ॥

शुक्रस्य इति ॥ ॥

शने गोशा भवार्कञ्च गुणेन्दु नख मूर्च्छना ।
फलं कु रूप चन्दैक शशि सोमार्द्ध रंशकम् ।
ऋणांशा भद्र सप्तार्थे मेघार्क दश पृष्टकैः ।
षट्भगांश तृधा स्थाप्य मुखरूपैकवह्नयः ।

सौरस्य इति ॥ ॥

पञ्चतारकाग्रहानाञ्चार इति ॥

धनांशापिण्ड प्रत्येकं पञ्चविंश खभाष्करम् ।
भद्राशा क्वब्धिरूपञ्च स्वादकूप कुजादय ॥

ऋणम्पञ्चाब्धि शून्यर्तु द्वयद्रि गोग्नि कृताष्ट च ।

धनर्णयोर्फलं तुल्यं सार्द्धखाब्धि कुजस्य च ।
बुधस्य सार्द्धरूपाब्धि सार्द्धरुद्र बृहस्पते ।
सितस्य पादकोषाब्धि सौरस्य सार्द्धकृत्तिका ॥ ० ॥

अतिचारा मध्यचाराणि धनचारवशेन तु ॥
मन्दवक्रातिवक्रञ्च ऋ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णचारवशान्तथा ॥

अपरञ्च प्रवक्ष्यामि उदयास्तमनयोर्यथा ।
अनुलोम धनांशां च भुक्तं तु भूसुतादिकं ।

पिण्ड क्वर्थ मनु सिद्ध नख चैवोदयांशका ॥
कुजजीवार्कि पूर्व्वायां पश्चिमे बुधशुक्रयोः ॥

उदयांशकदिशञ्च इति ॥०॥

ऋणांश सप्तधा मध्ये वक्रम् भवति निश्चयं ।

स्व ऋण पञ्चत्रिंशांशं भुक्त्वा ज्ञेस्तमिते परे ।
तथैव स्तमिते शुक्र षट्त्रिंशञ्च मृणंशकम् ।

बुधशुक्रौ पश्चास्तमन इति ॥

विलोमेण मृणाद्यादौ भुक्त्वा तत्वांशकं यदि ।
पूर्वायामुदितो सौम्य तृभिरंशे तु भार्गवः ।

बुधशुक्रौ पूर्वोदय इति ॥०॥

कुजजीवशनीनाञ्च यच्च रंशोदयेति च ।
तस्मिं ह्यंशेस्तमेतञ्च पश्चिमायां न संशय ॥

प्राक्तरे वा बुधशुक्रौ उदयन्ति स्तमान्ति च ।
शेषा ग्रहोदितं पूर्व्वं पश्चिमायास्तमन्ति च ॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२९ ख पत्रे

१८	४१
१८	३८
१८	२९
१८	१९
१८	७
सूर्यस्य धनचार	

१८	७
१८	१९
१८	२९
१८	३८
१८	४१
सूर्यस्य ऋणचार	

१८	९१
१८	८३
१८	६५
१८	४२
१८	१५
चन्द्रस्य मन्दचार धन	

१८	१५
१८	४२
१८	६५
१८	८३
१८	९१
चन्द्रस्य मन्दचार ऋण	

१६	३
१७	३
१३	२
१८	२
२६	१
	१५
भौमस्य मन्दचार धन	

२६	१
	१५
१८	२
१३	२
१७	३
१६	३
भौमस्य मन्दचार ऋण	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१३	१
१४	१
१५	१
२२	१
२६	०
	३०
बुधस्य मन्दचार धन	

२६	०
	३०
२२	१
१५	१
१४	१
१३	१
बुधस्य मन्दचार ऋण	

११	१
१२	१
१३	१
१६	१
३८	१
गुरो मन्दचार धन	

३८	१
१६	१
१३	१
१२	१
११	१
गुरो मन्दचार ऋण	

१८	३
१४	२
१५	२
१०	१
३३	१
	३०
शनिमन्दचार धन	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३० क पत्रे

३०	१
	३०
१०	१
१४	२
१५	२
१८	३
शनिसन्द्चार ऋण	

१०	२
३	१
११	६
५	६
९	१३
४	७
३	५
	३०
ऋण	

२८	११
१३	५
१९	७
१७	६
१३	४
३१	७
१४	०
	३०
धन	

८	१
६	१
९	२
३	१
५	२
१–	५
१९	९
	३०
ऋण	

१८	५
१६	४
१७	४
१९	
१९	३
२०	१
११	०
	३०
कुजचार धन	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२	२
१९	३
२१	३
१८	१
११	१
७	१
२०	०
	३०

बुधचार

९	२०
	०
३	१०
१०	१
१४	२
११	२
९	२
१६	४

२४	१०
३९	१६
१६	६
१७	६
१०	३
२०	४
	१५
१५	१

गुरुचार

७	१
	१५
६	३
११	१०
५	८
३	६
४	१०
३	८

ऋण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९	१
१०	१
११	१
१२	१
१३	१
२०	१
२१	०
	३०
शुक्रचार	

८	०
	१०
७	०
	१०
५	०
	१०
१७	१
१२	१
१०	१
२५	३
शने ऋणचार	

३० ख पत्रे

षट्कर्माणि प्रधानानि ग्रहाणां स्फुटकर्म्मणि ।
प्रथमे केन्द्रकर्म्माणि द्वितीये भुजकर्म्मणि ।
तृतीये लिप्तपिण्डञ्च खण्डकर्म्म चतुर्थके ।
पञ्चमं क्षयक्षेपञ्च षष्ठे च भुक्तिकर्म्मणि ।
रविन्दोश्च विशेषेण दशकर्म्म प्रशस्यते ।।
सप्तमाञ्चाशपिण्डञ्च अष्टमान्तिथितारयोः ।
नवमं घटिकङ्कुर्याद् दशमञ्चाशप्राणयोः ।।
तन्तथा कथयिष्यामि यथावदनुपूर्व्वशः ।

स्वोच्चं स्वमध्यमे शोध्य विज्ञेया केन्द्रकर्म्मणि ।।

त — न्द्रेण भुजं कृत्वा प्राप्ते प्राप्ते निरीक्षितं ।
शून्यैकद्वितृराशौ वा केन्द्रराशि यदिर्भवेत् ।।
भुजञ्च भवते तत्र त्र्यूणम्वा त्रयपूर्णकम् ।।
त्र्यधिके वेदभूतञ्च षड्राशौ तं विशोधयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि स्वादाद्रिभद्रञ्च केन्द्रं षड्राशि वर्जयेत् ।
यदि रन्ध्राशरुद्रञ्च चक्रे संशोधयेत्ततो ॥
भुजकर्म्म भवेस्यैव तं कृत्वा लिप्तपिण्डकम् ।
राशि त्रिंशगुणं कृत्वा भागेन सह योजयेत् ।
तञ्च षष्ठिगुणङ्कृत्वा लिप्तेन सह योजयेत् ।
लिप्तापिण्डेभिसं–

३१ क पत्रे

ज्ञेया तेन खण्डन्तु कारयेत् ।

लिप्तापिण्डं भजे खाङ्गैः गतखण्ड फलं भवेत् ।
गतखण्डञ्च संस्थाप्य गम्यखण्ड सहस्य च ।
गम्म्यखण्डे गतं शोध्यमन्तज्याया भवेत्तत ।
खण्डशेषञ्च या पिण्डमन्तज्यायां गुणीकृतम् ।
भाजये चादिखण्डेन फलं खण्डेषु योजयेत् ।
शेषा विलिप्तका तञ्च पृथक् स्थाने प्रस्थापयेत् ।

मन्दवृत्तेन तौ घातं लिप्ताविलिप्तकौ पृथक् ।
विलिप्ता षष्ठिभिर्भक्तं फलं लिप्ते विमिश्रयेत् ।
स्वं स्वं छेदेन भक्तञ्च फल षष्ठिघ्न भाजयेत् ।
फलं लिप्त विलिप्ता च खण्डकर्म्म भवेत्ततो ।

शून्यैकद्वित्रचत्वारपञ्चा राशौ यदिर्भवेत् ।
मेषादौ तत्र जानीया अर्थोर्द्धञ्च तुलादिकम् ॥
स्वादाद्रिभद्रगोकाष्टरुद्र राशौ तुलादिकं ।

यदि मेषादिके केन्द्रे फलं शोध्य स्वमध्यमे ॥
यदि केन्द्रे तुलादि स्यां फल योज्य स्वमध्यम ॥
क्षयक्षेप रिति ज्ञेया तत्परं भुक्तिकर्मणि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वन्तज्याया स्वभुक्तिघ्ना आदिज्याया विभाजयेत् ।
मन्दवृत्तेन सङ्गुण्य स्वं छेदेन विभाजयेत् ।
तत्फल योज्य शौध्यञ्च

३१ ख पत्रे

स्वकेन्द्रञ्च निरीक्षितं ॥

तृचतुर्पञ्चषट्सप्त चाष्ट राशौ यदिर्भवेत् ।
ततो कर्ज्यादिकं विन्द्या परतो च मृगादिकं ।
नवांशरुद्रशून्यञ्च रूपदश् यदिर्भवेत् ।
ततो मृगादि संज्ञेया बोधव्य सर्व्वकर्म्मषु ।

यदि कर्क्यादिके केन्द्र फलं योज्य स्वभुक्तिके ।
यदि मृगादिके केन्द्रे फलं शोध्य स्वभुक्तिके ॥

षट्कर्म्माणि ह्येतानां ग्रहानां स्फुटकर्म्मणि ॥

भास्करं स्फुटनिष्यूतं स्फुटचन्द्रे विशोधयेत् ।
तञ्चन्द्रं राशि त्रिंशघ्नं भागेन सह योजयेत् ।
तत्तु षष्ठिगुणम् कृत्वा लिप्तेन सह संयुतं ।
पुन षष्ठिगुणं कृत्वा विलिप्तं सह संयुतम् ।
चाशपिण्डेति तं ज्ञेया स्वं छेदेन भजेत्ततो ।
फलम्प्रतिपदादीनां तिथिर्भवति वै क्रमं ।
तिथिभक्तावशेषाञ्च च्छेदके तम्विशोधयेत् ।
भुक्त्यान्तरेण तौ भक्तं नाडिको गतगम्ययोः ।
भागावशेषौ षष्ठिघ्नौ तेनैवाप्ता विनाडिकौ ।
तौ शेषौ षड्गुणीकृत्यौ तेनैवाप्ता पलासवौ ।

निष्यूतस्फुटचन्द्र च कृत्वा विलिप्तपिण्डकम् ।
तम्विभक्तं स्वच्छेदेन फलाश्विन्यादितारकम् ।
तारच्छित्वाव–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३२ क पत्रे

शेषाञ्च तथैव च्छेदके हरे
तौ भक्तौ स्वभागेन नाडीविनाडिकासर्वौ ।
अग्रराशिगतम्विन्द्या नाडीविनाडिकासर्वाः ।
गम्म्येश्चैवाधराशि स्यान्तथा लिप्तपलासवाः ॥
इत्येते दशकर्म्माणि प्रधानानि रविन्दवोः ॥
सर्वासां प्रधान स्फुट सूर्य इति ॥०॥

अस्य सूत्रस्याङ्क

अंशापिण्ड लिप्तापिण्ड विलिप्तापिण्डकाञ्च ॥ राशि गुण ३० भागेन सह योज्या तञ्च अंशापिण्डम्भवति । तदांशापिण्ड गुण ६० लिप्तका सह योज्या तदा लिप्तापिण्डम्भवति । तं लिप्तापिण्ड गुण ६० विलिप्तका सह योज्य विलिप्तपिण्डम्भवति ॥ एवन्त्रयपिण्ड जानीया ॥०॥

अपरे भुक्तिकर्म्मेषु ह्यन्ताज्याकर्म्म पञ्चधा ।
गुणका च्छेदकानाञ्च मन्दवृत्ति पृथक् पृथक् ।

गुणकाराष्ट भानोस्तु स्वादाग्निनेत्र चन्द्रमाः ।
अङ्गारस्य शशाङ्काश्वि स्वादरूप बुधस्य च ।
हुताशनञ्च जीवस्य नागन्तु भार्गवस्य च ॥
शनिश्चरस्य दस्रेण सङ्गुणञ्च यथाक्रम ।
सर्व्वेषां भागहारञ्च भद्रव्यो-

३२ ख पत्रे

मधुवैर्हृतं ।
स्वं स्वं लब्धि स्वभोगे च योज्य शोध्यञ्च कारयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य सूत्रस्याङ्क
भानोर्गुण ८
इन्दे गुण २३६
कुजस्य गुण २१
ज्ञस्य गुण १६
जीवस्य गुण ३
शुक्रस्य गुण ८
सौरस्य गुण २

सर्वेषां भागहार २०८

भोगकर्म्म प्रथम वृत्तिका इति ॥०॥

द्वितीयां सम्प्रवक्ष्यामि भोगकर्म्म विधानत ।
निशारिकस्य चन्तज्या । कोषपक्षैर्विभाजयेत् ।
इन्दोस्सुरैश्च सङ्गुण्य रन्ध्रदस्रैर्विभाजयेत् ।
कुजान्तज्या दशघ्नञ्च भद्रच्छिद्रैर्विभाजयेत् ।
ज्ञस्यन्तज्या जयै भक्तं गवाङ्गैर्भाजयेद् गुरोः ।
शुक्रस्य तारकैर्भक्तं शनै खाङ्कै विभाजयेत् ।

अस्य सूत्रस्याङ्क
भानोर्च्छेद २६
इन्दोर्गुण ३३ भाग २९
कुजस्य गुण १० भाग ९८
बुधस्य भाग १३
गुरोर्च्छेद ६९
सितस्य च्छेद २७
सौरस्य च्छेद ९०

भोगकर्म्मे द्वितीय वृत्तिको ॥०॥

तृतीय सम्प्रवक्ष्यामि गुणरैकमेव च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्तज्या ग्रहा सर्वेषाम्पञ्चविंशैस्तु सङ्गुणम् ।
भागाहारञ्च प्रत्येकं भानो खैषुरसैर्हृतम् ।
इन्द्रोर्दस्राश्विभि भक्तं कुजस्य तृकृताश्विभिः ।
ज्ञ-

३३ क पत्रे

स्य तत्वाग्निभिर्भक्तं खाश्विसप्तमुखैर्गुरोः ।
क्वत्तास्वादैस्तु शुक्रस्य शने खेषुयमाश्विभिः ।

अस्य सूत्रस्याङ्क ।
सर्व्वेषां गुणकार २५

भानोर्हृत ६५०
इन्दोर्हृत २२
कुजस्य हृत २४३
ज्ञस्य हृत ३२५
गुरोर्हृत १७२०
शुक्रस्य हृत ६५१
सौरस्य हृत २२५० ॥

भोगकर्म्मे तृतीय वृत्तिका ॥०॥

चतुर्थं सम्प्रवक्ष्यामि भोगकर्म्मसु निश्चयम् ।
भानोन्तज्या तृभिर्हृत्वा भद्रवातैर्विभाजयेत् ।
इन्दोन्तज्या हतं गोक्षैः नेत्रपञ्चभिर्भाजयेत् ।
कुजन्तज्या हतं स्वादैः रन्ध्राक्षैस्तु विभाजयेत् ।
बुधान्तर्ज्या वधन्दस्रैः कोषयुग्मैर्विभाजयेत् ।
गुरोन्तज्या हतन्दस्रैः भक्तम्भद्राग्निरूपकैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सितन्तर्ज्या तृभिर्घातं कूपसप्तभिर्भाजितम् ।
सौरन्तर्ज्या यमैर्भिन्नं खाष्टरूपैर्विभाजयेत् ।

अस्य सूत्रस्याङ्क ।

भानोर्गुण	३ भाग	७८
इन्दोर्गुण	५९ भाग	५२
भौमस्य गुण	६ भाग	५९
बुधस्य गुण	२ भाग	२६
गुरोर्गुण	२ भाग	१३८
सितस्य गुण	३ भाग	७९
सौरस्य गुण	२ भाग	१८०

३३ ख पत्रे

॥ भोगकर्म्म चतुर्थ वृत्तिका ॥०॥

पञ्चमं संप्रवक्ष्यामि ग्रहाणां भोगकर्म्मणि ।
भानोन्तज्या हतं वेदैः धितिरूपैस्तु चन्द्रमाः ।
भूमिजस्य हतं रुद्रैः बुधान्तज्या गजेन तु ।
गुरो दस्रैर्वधं तज्या शुक्रास्याब्धिभि सङ्गुणं ॥
शनै रूपैस्तु सङ्गुणं वेदकाष्ठैर्विभाजयेत् ।

अस्य सूत्रस्याङ्का ।

भानोर्गुण	४
चन्द्रस्य गुण	११८
कुजस्य गुण	११
बुधस्य गुण	८
गुरोर्गुण	२
शुक्रस्य गुण	४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौरस्य गुण १

भाग १०४

भुक्तिकर्म्मे पञ्चम वृत्तिका इति ॥०॥

तिथितारककर्म्मेषु प्रवक्ष्ये छेदकारकम् ।
प्रथमे तु युगानाञ्च च्छेदये तिथितारकौ ।
पलेनापि द्वितीये तु लिप्तघेन तृतीयके ।
चतुर्थे लिप्तकेनापि अंशाघेन तु पञ्चमे ॥

खखखखाश्विलोकाब्धि युगन्तत्र प्रकीर्तिता ।
पलं खखरदावेदं खखखाष्टाब्धि तारकम् ।
लिप्तघा खखखर्त्वग्नि तिथितारकच्छेदका ।
लिप्तका खद्विसप्ता च खखाष्टा तारकस्य च ।
अंशघा खाश्विरूपा च तिथितारक च्छेदका ॥

युगस्याङ्क ४३२००००
ति–

३४ क पत्रे

थिपलस्याङ्क	४३२००
नक्षत्त्रपलस्याङ्क	४८०००
लिप्तघास्याङ्क	३६०००
तिथिलिप्तकास्याङ्क	७०२
नक्षत्रलिप्ता अस्याङ्क स्याङ्क	८००
अंशघास्याङ्क	१२० ॥०॥

मध्यमञ्च द्विधा स्थाप्य स्वाचं मेके विशोधयेत् ।
केन्द्रञ्च भवते तत्र तत्केन्द्रञ्च भुजीकृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शून्यैकद्वितृराशौ वा तत्केन्द्रेण भुजम्भवेत् ।
त्र्यधिके वर्ण्णपञ्चं तु षड्राशौ तम्विशोधयेत् ।
स्वादसप्ताष्टराशिं च केन्द्र द्विस्थम्भषट् त्यजेत् ।
नवदिग्रुद्रराशी च चक्रे तञ्च विशोधयेत् ।

लिप्तापिण्डन्तु तं कृत्वा आदिंज्यया विभाजयेत् ।
लब्धन्तुल्येन ज्याखण्डम् स्थापयेत्स्वन्तखण्डयो ।
अथवा राशि त्रिंशघ्नं भागञ्च सह संयुतम् ।
भागस्य स्वेन खण्डञ्च स्थापयेत्स्वान्तखण्डयोः ।
शोध्यन्तज्या पृथक् स्थाप्य खण्डशेषां हतन्तज्या ॥
विलिप्त षष्ठिभिर्भक्तं फलं योज्यानि लिप्तके ।
आदिज्यया विभक्तञ्च लब्धं खण्डेषु योजयेत् ।
शेषम्विलिप्तक स्थाप्य मन्दवृत्तेन चाहतम् ।

भानोः रूपात्तरामेन । इन्दो पाञ्चाद्रिसप्तभिः ।
भाजये–

३४ ख पत्रे

त्खखखाङ्कैस्तु लब्धं लिप्तविलिप्तकं ।

मेषादौ वर्त्तते केन्द्रे फलं शोध्य स्वमध्यमे ।
केन्द्रे राशि तुलादौ च फलं योज्य स्वमध्यमे ॥

रविन्दौः मध्यमे भागं द्विस्थानञ्च प्रकीर्त्तितम् ।
ऊनषष्ठि कला भानोः विकलाष्टकमेव च ।
शून्यच्छिद्राद्रि चन्दस्य विकले शरवह्नय ।

स्वंतज्याया स्वभोगघ्नं आदिज्यया विभाजयेत् ।
फलं घात स्ववृत्तेन खखखाङ्कैस्तु भाजयेत् ।
फलं लिप्तविलिप्ता च स्वं स्वं मध्यमभुक्तिके ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केन्द्र कर्क्यादिके क्षेपो मकरादौ विशोधयेत् ।।

सूर्यान्तज्याष्टभिर्घातं इन्दो स्वादशिखाश्विभिः ।
भद्रशून्याश्विभिर्भक्तं स्वं स्वं मध्यमभुक्तिके ।।
योज्या कर्क्यादिके केन्द्रं मकरादौ वियोजयेत् ।
एवं कृत्वा रविन्दोस्तु स्फुटभुक्तिस्तथा भवेत् ।

लिप्ता रविफलेनाघ्नं स्वं स्वं तु स्फुटभुक्तिकांम् ।
चक्रलिप्तैर्हृत स्वं स्वं रविवत् हानिवृधिकृत् ।।

चन्द्रे विशोधयेत् सूर्यां कुर्या विलिप्तपिण्डकं
तं शतैर्घ्नं युगैर्भक्तं शुक्लाद्यास्तिथयो भवेत् ।
शेषां छेदे विशोध्यानि गतेष्यं–

३५ क पत्रे

अ्र भवेत्ततो
भुक्त्यन्तर शतैर्भिन्नं । तेनाप्तङ्गतगम्म्यकौ
नाडी विनाडि प्राणञ्च च्छेदयित्वा यथाक्रमं ।।

कुर्या चन्द्रविलिप्तञ्च खाङ्कै घ्नं भाजयेत् युगैः ।
फलञ्च भवते तारामश्विन्याद्यानि मण्डलम् ।
छेद्यच्छेदे विशोध्यानि उभौ तौ गतगम्यकौ ।
स्वभोगङ्गुणयेत्खाङ्कैः गतेष्यौ तैस्तु भाजयेत् ।
फलन्नाडि विनाडी च प्राणाञ्च कारयेत्क्रमम् ।।

अस्य सूत्रस्याङ्क
आदिज्या ६०
आदीतस्य मन्दगुण ३५१
चन्द्रस्य मन्दगुण ७७५
तौ भाग ९०००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भुक्तिकर्म्मे च

रवे मध्यमभोगा ५९।८

इन्दो मध्यमभोगा ७९०।३५ ॥

भानोन्तज्या गुण ८

इन्दोन्तज्या गुण २३६

तौ भाग २०८

रविशुद्ध चन्द्रपिण्ड गुण १००

चन्द्र पिण्ड गुण ९०

त्रयोः भाग युग ४३२००००

भुक्तन्तर गुण १००

स्वं भोग गुण ९०

प्रथम ॥०॥

स्वेचे विशोध्यानि स्वमध्यमेन केन्द्रम्भवे तेन कृतानि कर्म्म ।

त्र्यानाश्विरूपाभ्र भुजं स्वकेन्द्रं । षट्कम्विशोध्या त्र्यधिकाब्धिबाणं

३५ ख पत्रे

स्वादाद्रिनागञ्च विहाय षट्कं । चक्रे विशोध्या विवरांशरुद्रं

तत्केन्द्रबाहुञ्च कलम्प्रकुर्यात् ।

भाज्यादिखण्डेन फलन्तु खण्डं । शुद्धान्ताखण्डेन वधं तु शेषा-
न्ताञ्चादिखण्डेन विभक्तयित्वा । तं लब्धखण्डेषु विमिश्रयित्वा ।

स्वं स्वं फला घात दिवाकरेन्द्वोः । तत्वैस्तु घातं फल भास्करस्य ।
रूपाब्धिकोषैर्हृत लब्धि लिप्तं । इन्दो फलां घात शशाङ्करामैः
व्योमार्तुरामै विभजे तु यञ्च । शेषाञ्च सा कुर्य यथोक्तपूर्व्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केन्द्रे च मेषादिकवर्तमाने स्वमध्यमे स्वं फल योजयित्वा।
तुलादिके शोध्य स्वमध्यमेषु एव रविन्द्वोः स्फुट मध्यमाञ्च ।

स्ववातखण्डेन हृत स्वभोगां तं चादिखण्डेन विभक्त लब्धं
स्वां स्वां परिध्यंशकया निहत्यः स्वं स्वं तु भागैर्व्विभजे फलञ्च ।
संयोज्य भोगे यदि कर्कटादौ संशोध्य भोगेषु मृगादिकेन्द्रे ॥
भानोन्तजीवा हृत कोपनेत्रैः ॥ इन्दोन्तजीवा गुणितं तु देवैः
द्वाराश्विभिर्भाजित लब्धिकञ्च । योज्यं हरे केन्द्रवशां स्वभोगे ॥

भानो फलं स्वस्फुटभो-

३६ क पत्रे

गघातं खखाष्टिदस्रै विभजेत्फलञ्च ।
भानो वशा क्षेप क्षय ग्रहाणां

दिवाकरं शीतकरे विशोध्या । शेषाञ्च कुर्यात्तु विलिप्तपिण्डं ।
शून्याभ्रदस्राग्निकृतैर्व्विभक्ता लब्धं सिताद्या तिथयो भवेषु ।
शेषं तु संशोध्य सच्छेदकारे भुक्त्यन्तरेर्भाज्य गतेष्य तौ च
नाडीवलाप्राण क्रमेण कुर्यात् ।

निशाकरं कुर्य विलिप्तपिण्डं तं भाजयित्वा खखखाष्टवेदैः ।
लब्धाश्विनी चादिश तारकानां छेदावशेषेण विशोध्य च्छेदे ।
स्वभुक्तिभिर्भाज्य गतेष्यनाडी ॥०॥

अस्य सूत्रस्याङ्क ।
रविमन्दगुण २५ भाग ६४१
इन्दो मन्दगुण ३१। भाग ३६०
तथा भोगकर्म्मे च
भूय भोगकर्म्मे रविअन्तज्या गुण नास्ति भाग २६
चन्द्रन्तज्या गुण ३३ भाग २९।
तिथिच्छेदकपल ४३२००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तारच्छेदकपल ४८००० ॥

द्वितीय ॥ ० ॥

केन्द्रं सह स्थाप्य समध्यमञ्च स्वकेन्द्रजीवा नभ रूप पक्ष
रामार्ण्णवाक्षा क्षयमर्द्धचक्रे । स्वदास्वराष्टौ भवने विषट्कं
चक्रे शोध्य विवरांशरुद्रां

तत्केन्द्रवंशं स भवेत्तु खण्डं

३६ ख पत्रे

स्वचान्तखण्डं सह स्थापयित्वा
विशोध्य खण्डं तु स्वचास्तखण्डे ॥ शेषान्तजीवा गुणकारकञ्च ॥
स्या - - शेषाञ्च कलाविलिप्तौ अन्तज्याया सङ्गुणितं क्रमेण ।
भाज्यादिजीवे फल योज्य खण्डे । शेषां विलिप्ता च पृथक्स्थितञ्च ।

लब्धं फलौ सूर्यशशाङ्कयोस्तु । खखाभ्रदस्रैर्गुणयेत्क्रमेण
खाङ्कार्कभूतैर्विभजेत्तु भानोः । चन्द्रस्य पञ्चाश्वियमाग्निदस्रैः
विभक्त लब्धं रविचन्द्रयोस्तु । केन्द्रे च मेषादिक वर्त्तमाने
स्वमध्यमे स्वं फल शोधयित्वा तुलादिके योज्य स्वमध्यमे तु ॥

अन्तज्याया सूर्यशशाङ्कयोस्तु तत्वैर्हतम्भाग खपञ्चकोषैः
चन्द्रस्य सम्भाजित नेत्रदस्रैः । स्वमध्यभोगै युत कर्कटादौ
मृगादिके शोध्य समध्यभोगे ।

दिवाकरं शीतकरे विशोध्या कुर्यात्कलापिण्ड हतं खभूतैः ।
शुन्न्याभ्रशुन्न्यार्तुङ्गुणैर्विभक्ता लब्धं तिथि शुक्लप्रतिपदादीन् ।
शेषाञ्च च्छेदे रहितं षडघ्नं भुक्तन्तरं पञ्चगुणैर्विभक्ता ।
लब्धा ततो नाडिविनाडिप्राणं

शशाङ्कलिप्ता खशरैर्प्रगुण्य । भक्तन्तु शून्याभ्रखखकृतैश्च
लब्धाश्विना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीनि भमण्डलानि । शेषेन च्छेदे गुणितन्तु कोषैः ।
स्वभोगभूतैर्गुणितैर्विभक्ता । नाडी विनाडी च भवे क्रमेण ॥ ० ॥

अस्य सूत्रस्याङ्क ।
भाग ६०
रविन्द्रो मन्दगुण २०००
सूर्यस्य भाग ५१२६०
चन्द्रस्य भाग २३२२५२५
भानोर्भाग ६५०
चन्द्रस्य भाग २२
कर्कशुद्धलिप्तापिण्ड गुण ५० भाग ३६०००
विचन्द्रलिप्तापिण्ड गुण ५० भाग ४००००
गतेष्य तौ गुण ६
भुक्त्यान्तर गुण ५ तेन च्छेदयेत् ।
स्वभोग गुण ५ ॥

तृतीय ॥०॥

स्वाच्चंश मध्यमं स्थाप्य तत्केन्द्रं कर्म्म कारयेत् ।

न्यूनराशि यदि केन्द्रं खण्डं क्रमेण कारयेत् ।
न्यधिके तृभवर्ज्यञ्च लिप्तापिण्ड कारयेत् ।
खखाब्धिभूते तां शोध्य तञ्च ज्यामानयेत्क्रमं ।
एवञ्चक्रार्द्धपूर्व्वे तु परे षड्राशि वर्ज्जयेत् ।

पूर्व्वेव विधिना कृत्वा जीवानुमानयेत्ततो ॥
आदिज्याया हृतं तञ्च स्थाप्ययेत् स्वन्तखण्डयोः ।
शोध्यन्तज्या पृथक् स्थाप्य खण्डशेषं त्याजाहतम् ।
आदिज्याया विभक्तञ्च लब्धं खण्डेषु योजयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलं लिप्ताविलिप्ता च मन्दवृत्तेन चाहतम् ।

भानोस्तु खाश्विभिर्घातं रामैकपञ्चभिर्हृतम् ।
इन्दो सप्तशरैर्घातं दस्रकोषार्तुभिर्हृतम् ।

३७ ख पत्रे

फल लिप्तविलिप्ता च रविन्द्वोस्तु फलं भवेत् ।
केन्द्रे चक्रोर्द्धपूर्व्वे तु फलं स्वोच्चे विशोधयेत् ।
चक्रार्द्धपरतो केन्द्रे फलं स्वोच्चे नियोजयेत् ।
स्वोच्च स्वकेन्द्रे संयुक्तं स भवेत्स्फुट मध्यमाम् ।

विकले पञ्चतेजसम्

भानोन्तज्या हतं रामैः भद्रसप्तभिरुद्धृता ।
इन्दोरङ्केषुभिर्घातन्दस्रभूतैर्विभाजयेत् ।
स्वं स्वं मध्यमभोगेषु धनहानिञ्च कारयेत् ।
केन्द्रे कर्क्कादिके क्षेपो मकरादौ विशोधयेत् ।

चन्द्रे सूर्यं त्यजे लिप्ता खद्विसप्तनिरुधृता ।
शुक्लाद्यास्तिथयो लब्धं शेष च्छेदे विशोधयेत् ।
षष्ठिगुणैर्विलिप्ता च पूर्व्वे क्षेपो परे क्षयम् ।
भुक्त्यन्तरहृते लब्ध नाडी विनाडिकाशव

सर्व्वग्रहलिप्ताष्टशताप्ता लब्धाश्विन्यादितारका ।
तिथिवश्च स्वभोगेन च्छित्वा नाडिविनाडिका ॥

अस्य सूत्रस्याङ्क ।
प्रथम भाग ६०
रविगुण २० भाग ५१३
इन्दोः गुण ५७ भाग ६६२
रविअन्तज्या ३ भाग ७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्दो अन्तज्या गुण ५६ भाग ५२
तिथि भाग ७२०
नक्षत्र भाग ८०० ॥

चतुर्थः ॥ ० ॥

मन्दोचके शोध्य समध्यञ्च केन्द्रं भवेत्तेन भुजं प्रकुर्यात् ।
मेषादिकं राशि भुजन्त्रय स्यु ॥ षड्राशिके शोध्य कुलीरकादौ ॥
षड्राशि वर्ज्यानि तुलादिकेन्द्रम् ।

३८ क पत्रे

चक्रे विशोध्या मकरादिकेन्द्रं

भागञ्च कुर्याद् भुजराशिकन्तु । भागं यतस्तत्र भवन्ति खण्डं ।
खण्डञ्च संस्थाप्य स चन्तखण्डयोः खण्डावशेषां हृत चान्तज्याया
तञ्चादिखण्डेण विभक्त लब्धं लब्धोप्य खण्डो विकरञ्च शेषां

स्व स्वं परिध्यंशकया निहन्य । शतैर्वधं भास्करचन्द्रयोस्तु
भानोर्विभक्ता कलपञ्चदस्रैः । चन्द्रस्य रूपाङ्गभवैर्विभक्ता ।
चक्रार्द्धपूर्वे यदि केन्द्रराशौ । स्वमध्यमे स्वं फल योजयित्वा ।
केन्द्रे च चक्रार्द्धपरे यदि स्यात् । स्वं मध्यमे स्व फल शोधयित्वा

सूर्यस्य चन्तज्य कृतैः प्रगुण्य । चन्द्रस्य घात गजरूपरूपैः
भागं रविन्द्वोः कृतशून्यरूपैः । कर्क्यादिके योज्य फल स्वभोगे ।
मृगादिकेन्द्रे च विशोध्य भोगे । एवं रविन्द्वो स्फुटकर्म्म सिद्धम् ॥

ऊना विवश्वं हिमरस्मिभागं खार्कैक भिन्नं हृत खाब्धिशक्रैः ।
लब्धं तिथि शुक्लप्रतिपदाद्यात् । शेषांणच्छेदे गुणितं शरेण ।
खघ्नं कलोप्या ग्रहषम्परे च । भुक्त्यन्तरं स्वादभजेन भक्तम् ।
लब्धञ्च नाडीविकलासवाञ्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शशांकभागा हत खाश्विरूपैः खखार्तुरूपैः हृत तारकाणाम् ।
शेषोनच्छेदेषु तिथी च कुर्या । स्वादाप्त भोगेन भजेत्कला स्यु ॥

अस्य सूत्रस्याङ्क
भाग ६०

३८ ख पत्रे

रविचन्द्रयोर्गुण १००
रविभाग २५६४
चन्द्रस्य भाग ११६१
रवे अन्तज्या भाग ४
इन्दोः अन्तज्या गुण ११८
भाग १०४
रविशुद्धचन्द्रभाग गुण १२० भाग १४४०
चन्द्रभाग गुण १२० भाग १६००
गतगम्यौ गुण ५
लिप्त गुण १०
भुक्त्यन्तर भाग ६
भोग भागाहार ६ ॥ ❀ ॥

पञ्चम तिथ्यानयनम् ॥०॥

पञ्चधा च प्रमानानि तिथिनक्षत्रयोस्तथा ।
संहित भूतनाथेन विविधा संप्रकल्पिता ॥०॥
मध्यमं शोधयेत् स्वोच्चे मन्दकेन्द्र स उच्यते ।
अंशामालानि तं कुर्यात् चारं विशोधयेत्क्रमम् ।
षड्राशि ह्यधिके यच्च । तदा षड्राशिवर्ज्जितम् ।
अंशामालानि कर्त्तव्यं उत्क्रमेण विशोधयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यं यं संशोध्य संशुद्धं फलं पिण्डीकृतानि तु ।
अविद्यमाने यत्रस्थे फलैर्घातैर्हृतंशकैः ।
लब्धन्तु स्वं फले योज्य धने वाथ मृणेपि वा ।
धनर्णयो फलौ कृत्वा तौ च रन्तरितं कृतं ।
त्वयोरन्तर शेषाञ्च ध–

३९ क पत्रे

न योज्यमृणं हरेत् ।
ज्ञात्वा चारवशं लब्धं योज्य शोध्यं स्वमध्यमे ।
गम्यफलेन सङ्गुण्य स्वं स्वं भुक्ति ग्रहस्य च ।
गंम्यंशकेन संयुक्तं ग्रहमध्यमभुक्तिषु ।
धनचारस्य योज्यानि ऋणचारस्य संहरेत् ।
एवन्तु मन्दचारेण मध्यमं भुक्तिकं स्फुटं ।

चन्द्रे विशोधयेत्सूर्यं अंशामालानि कारयेत् ।
तदाशादय गुणीकृत्य । खाश्विरूपैर्विभाजयेत् ।
लब्धं प्रतिपदादीनि शुक्लादि तिथिमेव च ।
गतं गम्म्ये विशोध्यानि अर्द्धं कृत्वा तु नाडिका ।
इन्दो स्फुटा स्फुटो भुक्तिः विवरा कारये द्वयोः ।
तत्फलं दिग्भि भक्तं च तिथितारकभक्तयोः ।
स्फुटभुक्त्याधिके शोध्य मध्यभुक्त्याधिके धनं ।
अर्द्धे चार्द्धेन संयुक्तं पादे पादञ्च योजयेत् ।

चन्द्राशा विवरैर्भिन्नं खाश्विचन्द्रेण भाजयेत् ।
लब्धा शुन्न्याधितारागां गतगम्म्ये विशोधयेत् ।
तयो चार्द्धकृतं यच्च नाडीका भवति तस्य च ॥

अस्य सूत्रस्याङ्क ।
रविशुद्धचन्द्राशा गुण १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३९ ख पत्रे

भाग १२०

चन्द्र गुण ६ भाग १२०
भुक्तिशेष गुण १०
चारेण स्फुटकर्म्म

षष्ठ तिथ्यानयन ॥७॥

महार्थयोगम्प्रवक्ष्यामि व्यतीपातस्य वैधृते ।
रात्रे वाथ दिने वाथ यस्यासन्न निरीक्षयेत् ।
यदि दिनस्य चाशानां कुर्यात्मध्याह्निकात्ततो ।

मध्याह्निकाम्प्रवक्ष्यामि भास्करादौ च सैद्धिकम् ।
चतुर्णाम्मध्यमानाञ्च साधयेत्सुप्रयत्नता ।
ततो मध्यमभोगार्द्धं भविष्ये योजयेत्सदा ।
अतीते शोधयेत्तस्मिं स्वभोगार्द्धं स्वमध्यमे ।
स्फुटं कृत्वा रविंद्वोस्तु भुक्तिकर्माणि कारयेत् ।
पूर्ववत्कारयेत्कर्म मन्दोचांशादि वृत्तिकाम् ।
मध्याह्निका स्फुटार्क्केन्दो भवति नात्र संशय ॥

अथ संक्षेपतो वक्ष्ये मध्याह्ने रविचन्द्रयोः ।
स्फुटभोगदलं कृत्वा भविष्ये योज्य स्वं स्फुटे ॥
अतीते शोधयेत्तस्मिं तदा मध्याह्निकाम् स्फुटौ ।
मध्याह्ने चार्द्धरात्रे वा तुल्यकर्म्मेण साधयेत् ।
तत्तो सविष्किकं कुर्याद्विमिश्रं रविचन्द्रयोः ॥

करणं सप्रवक्ष्यामि दश चैकाधिकास्तथा ।

४० क पत्रे

स्थिरानि तानि चत्वारि सप्तानाञ्चलितानि च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थिराणि संप्रवक्ष्यामि श्रीकण्टस्य वचो यथा ॥
कृष्णचतुर्द्दशन्ते च शकुनि करणानि ।
अमावासे च पूर्व्वार्द्धे करणानि चतुष्पथम् ।
तत्वमावासिपश्चार्द्धे नागञ्च करणम्बिदु ॥
किन्तुघ्न नन्दपूर्व्वार्द्धे चत्वारि करणानि च ॥
सप्तानां सम्प्रवक्ष्यामि बवाद्यानि यथाक्रम ।
बवञ्च बालवञ्चैव कौलवं तौतिलन्तथा ।
गरो वणिज विष्टिञ्च सप्तैते गणितम्भवेत् ।

रसं योज्या स्फुटाक्कांशे तं स्फुटेन्दौ विशोधयेत् ।
लिप्तापिण्च तङ्कुर्यात् चक्रलिप्तैस्तु भाजयेत् ।
फलं नगाप्त लब्धञ्च करणानाम्बवादिकम् ।
शेषां छेदे विशोध्यानि गतगम्म्यानि तस्य च ।
भुक्तथन्तरे हृतं लब्धं नाडीविनाडिका स च ॥०॥

स्फुटार्क्कांशे त्रयां शोध्य स्फुटंद्वांशे त्रयं हरेत् ।
तं सूर्यं शोध्य तञ्चन्द्रे लिप्ता खेषुभि सङ्गुणम् ।
खखखाष्टादशैर्लब्धं तन्नगाप्तम्बवादिकम् ।
गत गम्म्यो विशोध्यानि

४० ख पत्रे

तौ च षड्भि गुणीकृतं ।
खाक्षै भुक्त्यन्तरे घातेः तेनाप्तं घटिकम्भवेत् ॥८॥

स्फुटाक्कोणां स्फुटो चन्द्रे भागे षट्कम्विशोधयेत् ।
लिप्तापिण्ड - - - - तम्भिन्न दस्नरूपकैः ।
भक्त शून्याग्निवेदैस्तु तं लब्धं सप्तभिर्हृतम् ॥८॥

यन्तिथ्यां पतितं करणं पूर्व्वार्द्धे वाथ पश्चिमे ।
तन्तिथिघटिकेनापि करणच बिदुर्बुधा ॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करण पञ्चधा

अस्य सूत्रस्याङ्क ।

प्रथमे विलिप्तपिण्ड भाग २१६००

द्वितीये लिप्तापिण्ड गुण ५० भाग १८००० गतेष्यौ गुण ६ भुक्त्यन्तर गुण ५०

तृतीय लिप्तापिण्ड गुण १२ भाग ४३२० गतेष्यौ गुण ५

चतुर्थे लिप्तापिण्ड भाग ३६०

सर्व्वेषां भुक्त्यन्तर भागाहार ।

पञ्चमञ्च आगमोक्तं ॥ ० ॥

विष्कम्भादीनि योगानि वक्ष्यामि गणितन्तथा ।
सूर्याद्वोर्योजयित्वा तु कुर्या विलिप्तपिण्डकम् ।
खखखाष्टाब्धिभिर्भक्तम् फलम्विस्कम्भमादिकं ।
शेषां छेदे विशोध्यानि भुक्तिमिस्तैर्विभाजयेत् ।
नाडीविनाडि–

४१ क पत्रे

प्राणञ्च क्रमेण भाजयेत्ततो ॥

भास्करेन्दोर्विमिश्रानि लिप्ता खैषुभिः सङ्गुणं ।
भक्त खखखखवेदैः विस्कम्भादि फलम्भवेत् ।
गतेष्ये शोधयित्वा तु तौ च षड्भि गुणीकृतम् ।
पञ्चघ्नम्भुक्तिमिश्रेन्तु तेनाप्तन्नाडिकम्भवेत् ॥०॥

मिश्रीकृतं रविन्दोस्तु लिप्तापिण्डञ्च कारयेत् ।
भक्त शताष्टकैर्लब्धं विष्कम्भादीनि तस्य च ॥
गतेष्यौ शोध्य षष्टिघ्नम्भुक्तिमिश्राप्तनाडिका ॥०॥

रविचन्द्रौ नियोज्यानि अंशापिण्डञ्च कारयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदांशं फ नन्दैश्च खाश्विरूपैर्विभाजयेत् ।
विष्कम्भाद्या भवेल्लब्धं गता गये विशोधयेत् ।
शून्याभ्रवेदै तौ भिन्न भुक्तिमिश्रैर्हृतङ्कृत्वा ॥०॥

अस्य सूत्रस्याङ्क ।
प्रथमे विलिप्तपिण्ड भाग ४८०००
द्वितीये लिप्तापिण्ड गुण १० भाग ४०००० उभौ गुण ६
भुक्तिमिस्र गुण ५
तृतीये लिप्तापिण्ड भाग ८००
चतुर्थे अंशापिण्ड गुण ६ उभौ गुण ४००
सर्व्वेषां भुक्तिमिश्रै भाग ॥

रविन्दो तारकं भुक्त्वा । तौ तारञ्च नियोजयेत् ।
तारकं तारके योज्या लिप्तपि–

४१ ख पत्रे

ण्डे नियोजयेत् ।
एवं तं भवते योगं विष्कम्भादीनि मेव च ॥०॥

षञ्चमं योगमित्युक्तं विष्कम्भादीनि योगत ॥०॥

मिश्रीकृत्य स्फुटार्केन्द्वो – – – ट्कं यदिर्भवेत् ।
व्यतीपातं विजानीया समशुद्धषाञ्च वैधृति ॥

किञ्चिमूनाधिकन्तस्य षड्राशि चक्रराशिकम् ।
भविष्यातीतयो तौ च कर्म्म पक्षामि तत्वत ।

यदि षड्राशिहीने तु षड्राशो तं विशोधयेत् ।
चक्रराशि यदि हीने चक्रे विशोधयेत्तदा ।
शोध्य शेषं समाकृष्य पृथक् स्थानेषु स्थापयेत् ।
षड्राशिचक्रराशी च ह्यधिके तु यदिर्भवेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यतोधिक तदा ग्राह्य स्थापये च पृथक् दिशिम् ।
उन्ने वा मधिके वाथ पृथक् स्थाने च स्थापितम् ।
तञ्च लिप्तीकृतं चैव स्वं स्वं भोगेन सङ्गुणं ।
भाजयेद् भुक्तिमिश्रेन फलं सूर्येन्दुसेद्विकम् ।
सूर्येन्द्वोस्तु फलं स्व स्वं ऊने तु योजयेत्सदा ।
अधिके शोधयित्वा तु पाते चैव विपर्ययेत् ।
एवं सूर्येन्दुपातानां संविष्टिञ्च तदा भवेत् ।
तत्स्फुटार्केन्दुपातश्च ततो कमाणि कारयेत् ।
पातं शोध्य

४२ क पत्रे

स्फुटो चन्द्रे तञ्च जीवा तु मानयेत् ।
तं ज्या त्रिशगुणं कृत्वा द्व्यष्टरामैर्विभाजयेत् ।
विक्षेपं भवते लब्धं दिशे त्तस्योपलक्षयेत् ।
पातसंशुद्धचन्द्रञ्च षड्राश्यूने यदिर्भवेत् ।
तदा चोत्तरविक्षेपमधिके दक्षिणं ततो ।
ज्यामानीयं स्फुटार्केण परमापक्रमेर्वधं ।
व्यासार्द्धेन हृतं लब्धं सूर्यस्यापक्रमम्भवेत् ।
विक्षेपश्च शशाङ्कश्च भिन्नदेशे यदिर्भवेत् ।
विक्षेपापक्रमौ योज्या वियोज्यो दिक्त्रमे यदि ।
तानि व्यासार्द्धविघ्नानि परमापक्रमैर्हृतम् ।
लब्धं चापीकृता लिप्ता षष्ठ्याप्तमंशके हरेत् ।
तद्कालेन्दु भवेत्तत्र
यदि त्र्यूने स्फुटा शशी ।
तृराश्यूर्द्धस्फुटेन्दु स्यात् तत्कालं षड्भ शोधयेत् ।
षड्ऊर्द्धञ्च स्फुटेन्दु स्यात् तत्काले षड दापयेत् ।
नवाधिके स्फुटे चन्द्रे चक्रे तात्काल शोधयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेन कर्म्मना सिद्धं तात्कालेन्दु भवेत्ततो ।

स्फुटतात्कालिकौ तौ च विश्लेषञ्च यतन्तरम् ।
सूर्यभोगेन संगुण्य चन्द्रभागेन भाजयेत् ।
यदि स्फुटेन्दु – ल्पञ्च फ–

४२ ख पत्रे

ल योज्य दिवाकरे ।
यदि तात्कालकेन्द्वल्पे फलं संशोध्य भास्करे ।
एवं तात्कालिकार्क स्यात्

पूर्व्वेव विधिनार्केन्द्वोः ह्यविशेषानि कारयेत् ।
तात्कलार्कस्फुटर्कौ च विश्लेषञ्च यतन्तरम् ।
सूर्यभोगेन तम्भिन्न षष्ठिभिर्भाज्य यत्फल-
म्पर्व्वमध्यन्ततो नाडी व्यतीपातस्य वैधृते ।

रात्रौ वाथ दिने वाथ विदित्वा पर्व्वनाडिका ।
स्फुटे चन्द्राधिके यस्य व्यतीपातस्य वैधृते ।
मध्याह्ने चार्द्धरात्रे वा पूर्व्वायां पर्व्विकाम्भवेत् ।
अपरे तु भवेत्पूर्व्वं यदि तात्कालिकाधिकाम्

स्थित्यर्द्धं साधये श्चैव येन वेला विजानयेत् ।
भुक्तिमिश्रञ्च पञ्चघ्नं व्यासार्द्धेन विभाजयेत् ।
स्थित्यर्द्धं भवते लब्धं पर्वनाड्यां क्षय क्षिपेत् ।
निशार्द्धे वा दिनार्द्धे वा यदि प्राक्पर्व्वनाडिक
तदा संयोजितां चादि विशोध्यञ्चान्तनाडिका ।
तन्निशार्द्धे च मध्याह्ने परतो तु यदिर्भवेत् ।
युताञ्च ह्यादिनाडि स्यां विशोध्याञ्चान्तनाडिका ।
एवम्वेला विदित्वा तु व्यतीपातस्य वैधृते ॥

७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४३ क पत्रे

दिवा वा यदि वा रात्रौ वेलं संविष्टिकां तथा ।
पूर्व्वैव विधिना कुर्या व्यतीपातञ्च वैधृती ।
पातां विशोध्य चन्द्रेण ज्यामानीय शतेर्वधं ।
तीर्थबानैर्हृतं लब्धं लपनं स्थाप्य स्वां दिशं ।
सूर्येण माणये जीवा ता ज्यादिश्चन्द्रदिग्वशा
सूर्यज्यालपनौ तौ च दिगैकञ्च विशोधयेत् ।
योजये भिन्नदेशे तु चापङ्कुर्या तु स्थापयेत् ।
ततो तात्कालेन्दु स्या त्र्यूने राशि यदि
स्फुटेन्दुराशिकं ज्ञात्वा चापि ताञ्च विशोधयेत् ।
त्र्यधिके शोध्य षड्राशौ षड्राधिके तु षट् त्यजे
नवाधिके त्यजे चक्रे शुद्धन्तत्कालचन्द्रमा ।

स्फुटतात्कालिकौ तौ च विशेषन्तु यदन्तरम् ।
सूर्यभोगेन सङ्गुण्य चन्द्रभोगेन भाजयेत् ।
संविष्टि ह्यधिके शोध्य तात्कालाधिक योजयेत् ।
एवन्तात्कालिकार्क्क स्या स्थिरीकृत्य पुनः पुनः ।

स्थिरत्वञ्च यद्यार्क्केन्द्वोः पर्व्वन्तत्साधयेत्तदा ।
स्फुटतात्कालिकौ चन्द्रौ विश्लेषन्तरलिप्तका ।
षष्ठिघ्नं शशिभोगाप्तं दलस्यार्द्ध ---- ।

४३ ख पत्रे

व्यासार्द्ध शतगुणीकृत्य भुक्तिमिश्रैर्हृतम्भजैः ।
खखपञ्चभजै च्छित्वा लब्धं स्थित्यर्द्धनाडिका ॥

पातं संशुद्ध चन्द्रज्या ज्ञात्वा चोत्तरदेशे -
--- गुणितं तज्या स्वादकोशजलैर्हृतम् ।
विवस्वाम्मानये जीवा दिसं ज्ञात्वा पृथक् न्यसे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पातोनेन्दु स्वयञ्चेन्दु दिग्भेदे तु यदिर्भवेत् ।
ततो तौ योज्या विमिश्रित्वा वियोज्यां समदिग्यदिः।
ततो चापञ्च क्रष्ठोत भवे तात्कालचन्द्रमा ।
कुर्या तात्कालिदित्य पर्व्वं स्थित्यर्द्ध नाडिका ।
विदित्वा दिनरात्राणि कर्माङ्कुर्याद्यथापुरात् ॥०॥

अस्य व्यतीपात वैधृति त्रयानां क्रमेण सूत्रानुसारेण लिख्यते ।

प्रथम व्यतीपात वैधृते वङ्कतो रविचंद्रौ मिश्रीकृत्य ऊने शोध्य शेष अधिके तोधिका तञ्च । ऊने वा अधिके वा लिप्तापिण्डं कृत्वा॥ स्वां स्वां तु स्फुटभोग्नेन गुणं कृत्वा भुक्तिमिश्रेण भाग लब्धं स्वां स्वां फलञ्च । भविश्ये योज्य अतीते शोध्य पाते विपरीतेन शोध्य योज्यं कारयेत् । एवं संविष्ठिर्भवति ।

ततो चन्द्रम्पातेन शोध्य । षड्राशि-

४४ क पत्रे

ऊने उत्तर विक्षेपः षड्राश्याधिके दक्षिण विक्षेप । तञ्च ज्यामानीय तं ज्या गुण ३० भाग ३८२ ततो लब्धि विक्षेपं भवति ।

सूर्येण ज्यामानीय तज्य गुण १३६८ भाग ३४ ८ फल अपक्रमम्भवति।

पातम शोध्य चन्द्रस्य यतो दिशं भवति । ततो अपक्रमस्य दिशिर्भवति । तदा विक्षेपाक्रमयोः दिशि समौ शोध्य विदिशौ योज्य

योजितो वा शोधितो वा तञ्च गुण ३४३८ भाग १३६८ फल चापं कृत्वा तात्कालिकम्भवति ।

तदांशं विचन्द्र तृराशिदूनो भवति । तदांशं एव चापांशं तात्कालचन्द्रम्भवति । यदि स्फुटचन्द्र तृराशि अधिको भवति । तदा चापां शध्य ६ शेष तत्कालचन्द्रम्भवति । यदि स्फुटचन्द्र षड्राश्याधिके भवति तदा चापंशका योज्या ६ तस्य तात्कालचन्द्रम्भवति । यदि स्फुटचन्द्र नवराश्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धिकाम्भवति । तदा चापांशक शोध्य १२ शेष तत्कालचन्द्रम्भवति ।
तात्कालिकाचन्द्रस्फुटचन्द्रयोः विश्लेष शेष । गुण ६-

४४ ख पत्रे

विलिप्तकन्दत्वाः
गुण रविभोग भाग तत्फलञ्च यदि स्फुटचन्द्र अधिको भवति तदांश एव फल । स्फुटदित्य द्विधा स्थाप्य तौ शोधयेत् तात्कालिकादित्यो भवति । यदि तात्कालचन्द्र अधिको भवति । तदांश एव फल स्फुटादित्ये योज्या तात्कालिकादित्यो भवति ।

ततो तात्कालिकादित्यस्फुटादित्यौ विवरं कृत्वा शेष गुण ६० विलिप्तकन्दत्वा गुण रविभोगेन भाग ६० फल पर्वन्तनाडी भवति

रविचन्द्रयो स्फुटभोगमिश्रं गुण ५ भाग ३४३८ फल स्थित्यर्द्धनाडी भवति ॥

प्रथमस्य इति ।

द्वितीयस्य पात सशोध्य चन्द्रज्या गुण १०० भाग ११८ फल रविज्यायां समदिशे योध्य विदिश्य योज्य । चापं कृत्वा तात्कालिकं भवति ।

पूर्ववत्तात्कालिकादित्य साधयेत् । स्फुटचन्द्रतात्कालविलिप्तकन्दत्वाः गुण रविभोग भाग चन्द्रभोग । तत्फलञ्च यदि स्फुटचन्द्र अधिको भवति । तदा स एव फल

४५ क पत्रे

– – दित्य द्विधा स्थाप्य शोधयेत् । तत्र तात्कालिकादित्ये भवति। यदि तात्कालचन्द्र अधिको भवति । तदा स एव फल स्फुटादित्ये योज्या तात्कालिकादित्यो भवति ॥

ततो तात्कालिकादित्यस्फुटादित्यौ विवरं कृत्वा । शेष गुण ६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विलिप्तकं दत्वा गुण रविभोगेन भाग ६० फल पर्व्वंतनाडी भवति ।

रविचन्द्रयो स्फुटभोगमिश्र गुण ५ भाग ३४८ फल स्थित्यर्द्धनाडी भवति ।

प्रथमस्य इति ॥

द्वितीयस्य ॥ पात सशोध्य चन्द्र गुण १०० भाग ५१८ फल रवि-ज्याया समदिशे योध्य पिदिश्य योज्य । दया कृत्वा तात्कालिकम्भवति ॥ पूर्व्वेवत्तात्कालिकादित्य साधयेत् । स्फुटचन्द्रतात्कालचन्द्रौ अन्तरितं कृत्वा शेष गुण ६० विकलं दत्वा गुण ६० भाग चन्द्रस्फुटभोगेन । फल पर्व्वन्त-नाडी भवति ॥

व्यासार्द्ध गुण १०० भाग भुक्तिमिश्र । लब्धिना भाग भागय्य ५०० फल स्थित्यर्द्ध नाडी भवति

द्वितीय इति ।

४५ ख पत्रे

तृतीयस्य । पातोनचन्द्रज्या गुण ९० भाग ४६६ फल रविज्या सह समदिशे शोध्य विदिशे योज्य । अन्यत्र पूर्व्व कार्य ।

तृतीयस्य इति ॥०॥

स्फुटार्क्कजीवा हत त्र्यग्निदस्रैः । लोकाद्रिबानैर्हृत लब्धि कान्ति ।
तस्यर्द्दिशं चन्द्रदिशो वशेन । पातोनचन्द्रस्य च कृपजीवा ।
वेदैर्घ्न रूपेषुभि भाज्य लब्धं । व्यपातचन्द्रस्य वशेन भान्दिम् ।
लब्धञ्च कान्ते च युतं दिगन्त्ये यदि दिगैकं विवरञ्च कुर्यात् ।
योज्यन्तरं तञ्च हतं सहस्रैः सप्ताभ्रवेदैर्हृत लब्धि चापं
यदा स्फुटेन्दु त्रयराशिमूनां । चापंश तात्कालिकाचन्द्रमाहु ।
तृराशिकोर्द्धञ्च यदि स्फुटेन्दुोः तात्कालके – ञ्च हरेत्षट्के ।
षड्राशिकोर्द्धञ्च यदि स्फुटेन्द्वोः तात्कालिकं षड्भवनं प्रयुक्तं ।
स्फुटेन्दुराशौ नव चाधिक स्यात् । तात्कालचन्द्रन्तु हरे भचक्र ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लिकादिन्य स पर्व्वनाड्याम् स्थित्यर्द्ध नाडी च विभाचेलम् ।
एताञ्च पूर्व्वैव कृतञ्च कर्म्म ।

अस्य सूत्रस्याङ्क ॥

सूर्य्या गुण २३३ ॥

४६ क पत्रे

भाग ५७३ ॥

पातोनचन्द्रज्या गुण ४ भाग ५१

योज्यन्तर गुण १००० भाग ४०७ ॥

चतुर्थ इति ॥०॥

स्परस्परग्रहानाञ्च व्यतीपातञ्च वैधृतिः ।
प्रवक्ष्यामि यथातथ्यं सूर्यादीनां यथाक्रमं ।

वेलानुमानसंविष्टि पर्व्वस्थित्यर्द्ध नाडिका ।
पूर्व्वेव विधिना कुर्यात् ग्रहाणां सुप्रयत्नतः ।

बृहभोगेन्दुवत्कुर्यात् स्वल्पभोग रवे यथा ।
स्वं पातोन बृहद्भोगज्यामानीय तयो यथा ।
बृहद्भोगो ग्रहो यस्य तज्ज्या पञ्चाब्धिभिर्हतम् ।
भाज्य लोकाग्निनेत्रैश्च लब्धं स्थाप्य यथादिशम् ।
स्वल्पभोगस्य यो जीवा बृहद्भोगफलस्य च ।
भिन्नदिग् योजयो तौ च वियोज्यन्दिग्समे यदि ।
रविवच्चन्द्रवत्कुर्यात् तात्कालं बृहत्स्वल्पिका ।
चापकर्म्मञ्च शोध्यञ्च कृत्वा पूर्व्वेव तस्य च ।

अस्य सूत्रस्याङ्क ।

बृहद्भोगस्य ज्या गुण ४५ भाग २३३ फलञ्च स्वल - भोगज्या च विदिशे योज्य समदिशो शोध्य तञ्च चापां कुर्यात । पूर्व्वज्ञायेन शोध्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४६ ख पत्रे

भवति । स्फुटतात्कालिकान्तरं पूर्व्वं – – न – – व्या ॥०॥

सुमते महातन्त्रे प्रथमपर्व्वे समाप्तः ॥०॥

पञ्चताग्रहानाञ्च स्फुटकर्म्म प्रवक्षते ।

कुजजीवशनीनाञ्च शीघ्र स्या रवि मध्यमा ।
बुधस्य भृगुपुत्रस्य रवि मध्यम मध्यमा ।

मन्दोच्चकां शोध्यः स मध्यमेन । स्यान्मन्दकेन्द्र भवते ततस्तु ।
शीघ्रोचके शोध्य स मध्यमाञ्च । तं शीघ्रकेन्द्रेण कृतानि कर्म्मम् ।

भुजन्त्रिराशौ परिशोध्य कोटिं पृथक् पृथक् स्थाप्य ततस्तयो ज्यम् ।
शीघ्रोचवृतेन हतन्त योज्यम् । कुजस्य शुन्न्याक्षगजार्थमादिं
शुन्न्याभ्रखाङ्कैर्व्विभजे तु लब्धम् । भुजश्च कौटिश्च फले भवेतां
केन्द्रे यदा कर्कटकादिकः स्यात् । ज्यार्द्धे तु तङ्कोटिफलम्विशोध्यात् ।
नियोजयित्वा मकरादिकेन्द्रे । वर्ग्ग क्षिपे बाहुफलस्य – र्ग्गम् ।
मूलं श कर्ण्णम् ।

प्रतिराशि कर्ण्णम् । स्वशीघ्रवृत्तेन नित्य भोगं ।
ज्यार्द्धे न भक्तं श्रवणस्य वृत्तम् । कर्ण्णस्य वृतांशकलिप्तकाभिः ।
सङ्गुण्य

४७ क पत्रे

– – भुजकोटिकज्यां । विभाजयेत्मण्डललिप्तकाभिः ।
भुजश्च कोटैश्च फलं पुनश्च । यावन्न कर्ण्णं स्थिरतं प्रयाति ।
ज्यार्द्धेन माहत्य भुजज्यया – । कर्ण्णेन भक्तं फलमस्य चापं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेषादिका स्या यदि शीघ्रकेन्द्रे ॥ फलं नियोज्यानि स मन्दकेन्द्रे ।
तुलादिके तं फल शोध्य तस्मिम्

जीवा तु मानीय स मन्दकेन्द्रे
स्वमन्दवृतेन हतं तु तज्या । शुन्न्याभ्रखाङ्कैर्विभजे फलञ्च।
चापञ्च कुर्या फलमस्य चार्द्धम् मेषादिके यस्य स मन्द्रकेन्द्रम् ।
फलं क्षिपे तस्य च मन्दकेन्द्रे । लब्धन्तुलादौ च विशोध्य तस्मिं ।
जीवा प्रकुर्या पुन मन्दकेन्द्रं सुमन्दवृतेन हतन्तु तज्या ।
शुन्न्याभ्रखाङ्कैर्विभजे फलञ्च । स्या चाप कुर्याच्च फलन्न चार्द्धं ।
केन्द्रं च स क्षेपक्षयङ्ग्रहे च । स्वे शीघ्रकेन्द्रे धनहानि व्यस्तम् ।

पूर्व्वेव कुर्या स्थिर तञ्च कर्ण्णम् । बाहो फल व्यासदलेन भिन्नं
स्थिरेण कर्ण्णेन विभज्य लब्धम् । चापं तु कुर्या मदलं फलञ्च ।
ता शीघ्रकेन्द्रस्य वशेन कुर्यात् । तां मध्यमे – – क्षय

४७ ख पत्रे

फलञ्च ।

चतुर्थक्रर्म्म स्फुट सिद्ध

म – – – – र ज्ञस्य सितस्य कर्म्मं ।

चतुर्थसिद्धन्तु बुधञ्च द्विस्थं । आशीतिभागै भुवि शोध्य सुर्य
– – – कर्म्मञ्च कृतानि ताञ्च । केन्द्रञ्च संक्षेपक्षय बुधस्य ।
ज्यार्द्धन्दशघ्न हृत शक्रबानैः । लब्धञ्च लिप्ता दिशि शोध्य शुक्रं ॥
एवं स्फुट सिध्यति मध्यमानम्

स्वशीघ्रभोगे क्षय मध्यभोगम् ।
ज्यार्द्धेन निघ्नं श्रवनेन भक्तं । लब्धं त्रिभिर्भाज्य युतोनक स्यात् ।
तं शीघ्रकेन्द्रे यदि कर्कटादौ । युतोनकं योज्य स मध्यभोगे ।
केन्द्रमृगा भुवि शोधयेत् । द्वितीय चन्तज्य हतानि तञ्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदिज्ययाप्ता निहतंश्च मन्दैः शुन्न्याभ्रखङ्कैर्विभजे फलार्द्धम् ।
तम्मन्दकेन्द्रस्य वशञ्च कुर्यात् क्षेपोन संस्कारकृतञ्च भोगे ।
तृतीयकेन्तज्य निहत्य तञ्च । द्वितीयवत्कुर्य फलान्न चार्द्धम् ।
-न्दञ्च संक्षेप क्षयं स्वभोगे । तद्भोग संशोधित शीघ्रभोगे ।
ज्यार्द्धघ्न भाक्तान्तु चतुर्थकर्णैः लब्धम्विशोध्यानि स शीघ्रभोगे ।
अविमानेपि – – – – शोध्या । वक्रो गतीनां भवति ग्रहाणाम् ।

अर्कस्य य क्षय भोज्यलिप्तैः ् घातां ग्रहाणां स्फुटभोग स्वं स्वं

४८ क पत्रे

विभाजये मण्डललिप्तकेन । अर्कवश क्षेपक्षयं ग्रहेषु ॥

अस्य सूत्रस्याङ्क ।
भुजकोटौ शीघ्रगुण ।

कुजस्य गुण	५८५०
बुधस्य गुण	३३००
गुरो गुण	१८००
सितस्य गुण	६५००
सौरस्य गुण	१०१०
सर्व्वेषाम्भागहार	९०००

मन्दगुण

कुजस्य	१७५०
बुधस्य	७००
गुरो	८००
शुक्रस्य	३५०
सौरस्य	१५००
भागाहार	९०००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भुजशुध गुण ३४३८ भाग कर्ण्ण ।
भुक्तिकर्म्मे अन्तज्या गुण ।। चक्रलिप्तौ नाम २१६००

प्रथम ग्रहस्फुट ।। ।।

पूर्व्वोक्तमन्दशीघ्रञ्च गुणकार च्छेदकारकम् ।
ग्रहाना स्फुटकर्म्मेषु यथासंख्येना योजयेत् ।
प्रथमं प्रथमे योज्य द्वितीयञ्च द्वितीयके
तृतीयञ्च तृतीये तु चतुर्थञ्च चतुर्थके ।
पञ्चम पञ्चमे योज्य षष्ठं षष्ठे नियोजयेत् ।
एकङ्क्रमं विदित्वा तु स्फुटकर्म्म विशेषत ।।

द्वितीय सम्प्रवक्ष्यामि स्फुटकर्म्म सुनिश्चयम् ।

रवि शीघ्रारजीवार्क्कि बुधशुक्रो ग्रहो रविः ।

स्वमध्यमं स्वशीघ्रोच - - - - - ो भुजम् ।
त्रिराशौ शोध्य कोटिः स्यात्तज्यान्तु पृथक् न्यसेत् ।

स्वशीघ्रोच्च धरि घातो गुण

४८ ख पत्रे

भक्त स्वच्छेदकैः ।
लब्धं लिप्ता विलि - - भु - कोटिफलं भवेत् ।

ज्यार्द्धे कोटीफलं शोध्य केन्द्र कर्क्कटकादिके ।
मृगादौ योज्य - - - - - - - - तिं क्षिपेत् ।

पूलं कर्ण्णः पृथक् स्थाप्य ज्यार्द्धेनाघ्नं भुजं फलं ।
कर्ण्णभक्तफलञ्चापं ताच्च रर्द्धन्तु कारयेत् ।
मेशादौ शीघ्रकेन्द्रस्य मन्दोच्चे शोध्य त फलम् ।
तुलादौ शीघ्रकेन्द्रस्य मन्दोचे तं फलं क्षिपेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं शोध्य क्षिपे यस्य मन्दोचमेकसंस्कृतम् ।
एकसंस्कृतमन्दोचे द्विस्थ शोध्य स मध्यमं ।
शेषङ्केन्द्र भुजन्तज्या स्वमन्दवृत्तसंगुणं ।
स्वच्छेदश्च हृत चापं तस्यार्द्धं चेकसंस्कृते ।
क्षयधनानि कर्त्तव्य मन्दकेन्द्रवशा तन्नो ।

तं द्विसंस्कृत मन्दोच संशोध्य द्विस्थ मध्यमे ।
पुनः केन्द्रभुजज्याश्च मन्दवृतेन चाहतम् ।
स्वं छेदैर्हृत्य चापञ्च न चार्द्धं मध्यमे ग्रहे ।
मन्दकेन्द्रवशे लब्धं क्षयं क्षेम स्फुटं भवेत् ।

स्फुटमध्यमद्विस्थे च, शीघ्रोच शोध्य पूर्व्वेवम् ।
शीघ्रकर्णफलं चापम् सकल स्फुटमध्यम ।
फल क्षयक्षेपङ्कार लब्धं शीघ्रकेन्द्रवशन्ततो ।
चतुर्थसाधनं सिद्धो

तत्परं बुधशुक्रयोः ।
अर्कोचं बुधशीघ्रोच्चे शोध्य ज्याघ्नं शराश्विभिः ।

४९ क पत्रे

भक्तं रूपाब्धिकोशैस्तु, क्षयक्षेपं बुधस्फुटे ।
व्यासार्द्धं दशभिर्भिन्नं शक्रबानैर्विभाजयेत् ।
भानो भूप्रतिचक्रार्द्धे स्फुट शुक्रे विशोधयेत् ।

स्वं स्वञ्च शीघ्रभोगेषु मध्यभोगम्विशोधयेत् ।
व्यासार्द्धघ्नं भजेत्कर्णैः फलञ्च भाजयेत्त्रिभिः ।
लब्धं केन्द्रवशाद्भोगे योज्य शोध्यञ्च कारयेत् ।
द्वितीयान्त्यज्यया घातं आदिज्याप्तं फलञ्च यत् ।
मन्दवृत्तेन संगुण्य स्वच्छेदेन विभाजयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकसंस्कृतभोगे च योज्य शोध्यञ्च पूर्व्ववत् ।
तृतीयांत्यज्यया हत्वा आदिज्याप्तञ्च पूर्व्ववत् ।
न चाद्धन्तु स्वभोगे च केन्द्रपृष्ठा क्षिपेत्क्षयं ।
तं शोध्य शीघ्रभोगे च त्रिज्याघ्नं श्रवणैर्हृतम् ।
शीघ्रभोगे विशोध्यानि नशुद्धे प्रतिशोधयेत् ॥

स्वस्फुटभोगे लिप्तघ्ना भानो क्षयधनकला ।
चक्रलिप्तै हृ स्वं स्व सूर्यवत्हानि वृध कृत्तत् ॥

अस्य सूत्रस्याङ्क ।
कुजकोट्यं शीघ्र कुजादीनां गुणच्छेदका ।
कुजस्य गुण १३ भाग २०
बुधस्य गुण ११ भाग ३०

४९ ख पत्रे

गुरो गुण नास्ति भाग ५
शुक्रस्य गुण १३ भाग १८
सौरस्य गुण नास्ति भाग ६ ।
कुजादिमन्दवृत्ति च्छेदकारयोः
कुजस्य गुण – भाग – –
बुधस्य गुण ७ भाग ६०
गुरो गुण ४ भाग ४५
शुक्रस्य गुण ७ भाग १८०
सौरस्य गुण नास्ति भाग ६
व्यासार्द्ध ३४३८ ॥
बुधसस्कारे मन्दगुण २५ भाग ६४१
शुक्रसंस्थारे गुण १० भाग ५१४
चक्रलिप्त २१६०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहाणां द्वितीय स्फुट ॥२॥

मन्दोच मध्यमे शोध्य मन्दकेन्द्र स उच्यते ।

शीघ्रोच मध्यमेपास्य शीघ्रकेन्द्र ततो भुजम् ।
त्रिराशौ तम्भुज शोध्य तङ्कौटिज्याभुज्ययोः ।
शीघ्रवृतेन संगुण्य स्वं स्वं छेदेन भाजयेत् ।

कोटीफलन्तु व्यासार्द्धे कर्कटादौ विशोधयेत् ।
मन्दरादौ क्षिपेद्वर्ग्गं तम्बाहुफलवर्ग्गयोः ।
मिश्रमूलञ्च कर्त्तव्यं श्रवणञ्च भवे ततो ।

व्यासार्द्धेन भुजज्याघ्नं श्रवणेन हृत फलं ।
ततो चापञ्च कर्त्तव्यं अर्द्धं कृत्वा तु तं फलम् ।
मेषादौ शीघ्रकेन्द्रस्य

५० क पत्रे

मन्दकेन्द्रफलं हरेत् ।
तुलादौ शीघ्रकेन्द्रस्य मन्दकेन्द्रे फलं क्षिपेत् ।

तङ्केन्द्रस्य भुजज्या च तं गुणैस्तु गुणीकृतं ।
स्वं स्वं छेदै विभक्तानि फलां चाप दलीकृतम् ।
स्वकेन्द्रस्य वसं तत्र मन्दकेन्द्रे क्षयादिकम् ।

ततो कैन्द्रभुजज्या च पूर्व्वैव गुणच्छेदकम् ।
चापं कृत्वा न चार्द्धं स भवे क्षयवृधिकृत् ।
मन्दकेन्द्रवशे तत्र शीश्रकेन्द्रे क्षयाधिकाम् ।
तत्केन्द्रेण यथापूर्व्वम् कर्ण्णं कुर्या यथाविधिम् ।
स्वकेन्द्रस्य वशेनापि तस्मिन्नेव क्षयाधिकाम् ।
स्वशीघ्रोचेन सन्मिश्र सिद्धञ्चतुर्थसाधनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थसाधनं सिद्धो तत्परं बुधशुक्रयोः ।

अर्क्कवद् बुधसस्कारं मन्दोचं मन्दवृतिकम् ।
भागेकं सप्तलिप्तञ्च शोधये भार्ग्गवस्य च ।
एवं पञ्चमसंस्कारं बुधशुक्रौ स्फुटं भवेत् ।

ग्रहाणां मध्यमभोगं तृतीयं तज्याया हतम् ।
आदिज्याया हृत लब्धं तं गुणेन गुणीकृतम् ।
स्वं स्वं छेदेन भक्तञ्च ग्रहमध्यमभुक्तिषु ।

५० ख पत्रे

केन्द्र कर्क्कादिके क्षेपो मकरादौ विशोधयेत् ।
शीघ्रोच भुक्तै ततो शोध्या विष्क -- मगुणं ।
कृत्वा -------- शीघ्रोचभुक्तिषु ।
न शुघे प्रतिशोध्यानि वक्रभुक्ति विनिर्दिशेत् ।

नासो क्षयधनं
लिप्तैः स्फुटभोग गुणीकृतम् ।
चक्रलिप्तैर्हृत ल ------ बृधकृत् ॥

अस्य सूत्रस्याङ्क ।
भुजकौटि शीघ्रे वा मन्दकर्म्मे वा सर्व्वत्र गुणकार २०००
कुजादीनां शीघ्रच्छेदकार ।
कुजस्य च्छेद ३०७७
बुधस्य च्छेद ५४५५
गुरो भाग १००००
शुक्रस्य भाग २७६९
सौरस्य भागहार १८०००
मन्दच्छेदकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुजस्य १०२८५
बुधस्य २५७१२
गुरो २२५
सितस्य ५१४२५
सौरस्य १२००७ ॥

ग्रहानां तृतीय स्फुटकर्म्म ॥०॥

मन्दोच्चम्मध्यमे शोध्य मन्दकेन्द्रं तु तद्भवेत् ॥

मध्यमं शोधयो शीघ्रे पूर्व्ववद् भुजकोटिकम् ।
मेषादौ शीघ्रकेन्द्रस्य मन्दकेन्द्रे फल क्षिपेत् ।
तुलादौ शोधये तस्मिन्केन्द्रं ज्या तु पूर्व्ववत्
मेषादौ मन्दकेन्द्रस्य फलं तस्मिम्विशोधयेत् ।
तुलादौ योज्यये तञ्च तज्ज्येव पूर्व्ववत्कृतम् ।
मन्दकेन्द्रवशे तत्र मध्यमेषु क्षयाधिकम् ।
पूर्व्ववत्क्षयक्षेपञ्च फलं

५१ क पत्रे

--- त्रमेव च ।
शीघ्रकेन्द्रवशेनापि मध्यमेषु यत क्षयं ।
पूर्व्ववद् बुधसंस्कारमेव च
भुक्तिकर्म्मञ्च पूर्व्वेव यथा ज्ञायेन कारयेत् ॥०॥

अस्य सूत्रस्याङ्क
कुजादि शीघ्रकर्म्मे ।
कुजस्य गुण ५० भाग ७७
बुधस्य गुण २२ भाग ६०
गुरो गुण २० भाग १००
शुक्रस्य गुण २६ भाग ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौरस्य गुण २ भाग १८
मन्दवृति
कुजस्य गुण ४२ भाग २५२
बुधस्य गुण १४ भाग १८
गुरो गुण ८ भाग ६०
भृगो गुण ३५ भाग ६००
सौरे गुण ५ भाग ३० ॥
चतुर्थस्फुट समाप्तः ॥०॥

अत परम्प्रवक्ष्यामि ग्रहाणाङ्गतिनिश्चयम् ।
सप्तति लिप्तकं शोध्य शुक्रशीघ्रे तु नित्यशः ।
सर्वेषां चक्रभोगार्धं स्वधनांशै गुणीकृतं ।
ऋणांशेनाप्रलब्दञ्च निष्कृत स्फुटमध्यमे ।
कुजजीवार्कि संशोध्य योजयित्वा तु ज्ञसितौ ।

न देया यस्य कस्यापि प्रयोगशुद्धमुत्तमम् ।
ग्रहाणाम्महामूर्च्छण इति ॥ ॥

चारेण स्फुटकर्मञ्च प्रवक्ष्यामि सुनिश्चयम् ।
मन्दोच्चे मध्यमं शोध्य मन्दकेन्द्र स उच्यते ॥

शीघ्रोच्चे मध्यमं शोध्य शीघ्रकेन्द्र

५१ ख पत्रे

विधीयते ।

यदि शोधयितुं नास्ति राशौ द्वादश योजयेत् ॥
मेषादौ शीघ्रकेन्द्रन्तु भागपिण्डञ्च कारयेत् ।
क्रमेण शोधयेद्धारं धनाद्यावमृनन्तकम् ।
तुलादौ शीघ्रकेन्द्रञ्च केन्द्रे षड्राशि वर्ज्जयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषाम्भागञ्च कर्त्तव्यमुत्क्रमेन विशोधयेत् ॥
यावच्छोधयितुं याति तावद्वारं विशोधयेत् ।
यस्मिं शोधयितुन्नास्ति शे चारेण ताडयेत् ॥
शोध्य रेणभक्तञ्च स्वफले योज्य सदा ।
धनर्णे द्वयसम्भूतौ फलौ विश्लेषये दलं ॥
तन्तो चारवशन्तत्र मन्दकैन्द्रै क्षिपे क्षयम् ।
धनचारफलं योज्यं ऋणचारफलं हरे ॥
अनया मन्दकेन्देण चारकेन्द्रन्तु कारयेत् ।
स्वं स्वं तु मन्दचारेण पूर्व्ववत्कारयेत्ततो ॥
फलार्द्धं मन्दकेन्द्रे च योज्य शोध्यञ्च पूर्व्ववत् ।
तेनापि मन्द्रकेन्द्रेण पूर्वेव चारकर्म्मणा ॥
योज्य शोध्यं ग्रहे तत्र कुर्या चारशत फलम् ।
शीघ्रकेन्द्रे विपर्यस्तं चारकर्म्मञ्च पूर्व्ववत् ॥
ततो चारवशलब्धं ग्रहे तत्र धनं हरेत् ।
- - -साधनं सिद्धो बुधशुक्रौ मतत्परं ॥
बुधशुक्रौ पञ्चमकर्म्म पूर्वेवत्कारये तदा ।
मध्यभोगम्त्रिशोध्यानि शीघ्रभोगे तु विन्यसेत् ॥
प्रथ-

५२ क पत्रे

मं स्वगुणैर्घात स्यच्छेदेन च्छेदयेत् ।
फलार्द्धमध्यमाम्भोगे कुर्याच्चारवशे त ॥
अनया मध्यभोगेन स्वगुणेन गुणीकृत् ।
स्वच्छेदेन विभक्तञ्च फलन्तञ्च दलीकृतम् ॥
तस्मिं मध्यभोगेषु कुर्या चारवश फलं ।
भूयस्तं मध्यभोगेन कुर्या ताञ्च तथैव च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलं स्वमध्यमे भोगे । कुर्या चारवशम्फलम् ।
शीघ्रभोगे विपर्यस्तं स्वचारै कुर्यात्पूर्ववत् ॥
फलं स्वमध्यमे भोगे धन हानिञ्च कारयेत् ।
कुर्या-वशेनापि न शुवे प्रतिशोधयेत् ॥
विलोमशुद्धं वक्रं स्यात् ग्रहाणां भुक्तिकन्तथा ॥
ग्रहाणां स्फुटचतुर्थः ॥७॥

बुधस्य भार्गवस्यापि रवि मध्य मध्यमा ।
रवि मध्यम शीघ्रञ्च कुजजीवशनिश्चरम् ॥

स्फुटकर्म्म तारकानाञ्च कुजादीनां यथाक्रमम् ।

मध्यमं शोधये शीघ्रे दभावे मण्डल क्षिपेत् ।
शीघ्रकेन्द्र ततो ज्ञेया षड्राश्यूने यदिर्भवेत् ।
अंशामानानि कर्त्तव्यं शीघ्रचारम्विशोधयेत् ॥
क्रमेण शोधये चारं धनाद्यावमृणन्तकम् ।
यदि षड्राशिकोर्द्धञ्च षड्भवर्ज्जं श कारयेत् ॥
विलोमेन ततो शोध्या ऋणाद्या च धनन्तगम् ।
— — — — — —

५२ ख पत्रे

ति तावच्चार विशोधयेत् ॥
यस्मिं शोधयितुं नास्ति शेषा फलशकैर्वधं ।
शोध्यंशकेन भक्तञ्च स्वं फलेषु नियोजयेत् ।
धनर्णो यदि संभूता फलम्विश्लेषये दलम् ।
मध्यमेषु युतं शोध्यं कुर्या चारवशं फलम् ॥
एवं संस्कारितं यस्य मध्यमे देकसंस्कृतं ।
एकं संस्कृततारञ्च स्वमन्दोच्चे विशोधयेत् ॥
तेनापि मन्दकेन्द्रञ्च मन्दचारञ्च पूर्व्ववत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य लब्धन्दल कुर्या स्वचारस्य वशे ततो ॥
एकसंस्कारतरे तु योज्य सोध्यञ्च कारयेत् ।
भूय तं शोध्य मन्दोच्चे चारकर्म्मञ्च पूर्व्वतम् ॥
फलं मदलं कुर्या चारस्य वशं ततो ।
ग्रहे संयोज्य शोध्यानि तञ्च शीघ्रे विशोधयेत् ॥
शीघ्रकेन्द्र विजानीया शीघ्रकर्म्मञ्च पूर्व्ववत् ।
अस्य फलं न चार्द्धञ्च शीघ्रचारवशेन तु ॥
तद्ग्रहे योज्य शोध्यञ्च सिद्धं चतुर्थसाधनम् ।
चतुर्थसाधनं सिद्धो स भवे स्फुटमध्यमम् ॥

ज्ञसितौ भूय संस्कारं पञ्चमेनापि सिध्यति ।
बुधस्य पञ्चमङ्कर्म्म सूर्यवत्संस्फुटीकृतम् ॥
शुक्रस्य — — मङ्कर्म्म सप्तषष्ठि कले क्षयं ।

भुक्तिकर्म्मम्प्रवक्ष्यामि यथावदनुपूर्व्वश ॥
मध्यभोगम्विशोध्यानि शीघ्रभोगं तु नित्यश ।

५३ क पत्रे

प्रथमस्य फलांशेन घातं शोध्यांशकैर्हृतं ॥
फलार्द्धम्मध्यमं भोगे धनहानिञ्च पूर्व्ववत् ।
तद्भोग घातयेश्चैव द्वितीयस्य फलांशकैः ॥
शोध्यंशकैस्तु तम्भक्तं तल्लब्धञ्च दलीकृतम् ।
तल्लञ्च दलीकृतं तस्मिन्तञ्च क्षिपे क्षयम् ॥
स्वचारस्य वशेन तु ।

तृतीयविधि कर्त्तव्यं मदलम्मध्यभुक्तिके ।
योज्य शोध्यानि कर्त्तव्यं । स भवे स्फुटभुक्तिका ॥
स्फुटभोगं विशोध्यानि शीघ्रभोगे तु नित्यस ।
चतुर्थविधि कर्त्तव्यम् मध्यभोगे क्षिपै क्षयम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न शुधे प्रतिशोध्यानि विदित्वा स्फुटभुक्तिकाम् ।
भानो क्षयधनं लिप्तैः ॥ घात स्वं स्फुटभुक्तिकं ॥
चक्रलिप्तेन भक्तञ्च सूर्यवत्हानिवृधकृत् ।
एवङ्ग्रहस्य संस्कार कुजादीनां स्फुटीकृतम् ॥०॥
ग्रहस्फुट पञ्चम ॥०॥

अथात सम्प्रवक्ष्यामि योज्य शोध्य लक्षणम् ।
मन्दे वा यदि वा शीघ्रे मध्यमां शोध्यये यदि ॥
मेषादौ फलवृद्धि स्यात्तुलादौ शोधये तदा ।
मन्दोचं यदि वा शीघ्रम्मध्यमे शोध-

५३ ख पत्रे

ये यदि ।
त - - लादिकं वृद्धि मेषादौ सोधये तदा ॥
एवं केन्द्रम्विदित्वा तु योज्य हानिञ्च कारयेत् ।

भूय स्फुट विशेषानि - कर्म्मञ्चारकर्मयोः
जीवा वाथ स्वचारे वा कर्त्तव्यं स्फुटकर्म्मणि ।
प्रथमं जीवकर्म्मञ्च चारकर्म्म द्वितीयके ।
तृतीय जीवकर्म्माणि चारकर्म्म चतुर्थके ।

अथ रद्यन्तजीवा च चारन्तु द्वितीयके ।
अथ राद्यन्तचारेण जीवा तु द्वितृयके ।
योसौ तु अथ इष्टेन यथा इष्टन्तथाकृतम् ।
एवं तु इष्टकर्म्मञ्च स्फुटकर्म्मञ्च कारये,
ग्रहस्फुट इति ॥०॥

पाताशङ्क प्रवक्ष्यामि कुजादीनां यथाक्रमं ।
खाब्धि खाश्वि खभद्रञ्च खकोशा खखरूपकं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य सूत्रस्याङ्क ।
कुजस्य पात ४०
बुधस्य पात २०
गुरो पात ८०
शुक्रस्य पात ६०
सौरस्य पात १०० इति ॥

विक्षेपलिप्तकं वक्ष्ये भूसुताद्या यथाक्रमम् ।
व्योमकूप सुरैकञ्च व्योमर्तु लोकाभास्करः ।
कोषार्काणाञ्च विक्षेपं कुजादीनां यथाक्रमम् ।

अस्य सूत्रस्याङ्क ।

५४ क पत्रे

कुजस्य विक्षेप १३३
गुरो विक्षेप ६०
शितस्य विक्षेप १२३
सौरस्य विक्षेप १२६ इति ।

पञ्चतारकाग्रहाणां स्फुट द्वितीयपर्व्व समाप्त ॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताडपत्रोपलब्धस्य सुमतितन्त्रस्य
ग्रहस्फुटीकरणाधिकारः समाप्तः ।
अतः परं त्रिप्रश्नाधिकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवक्ष्यामि यथाज्ञेयान्देशान्तरितनिर्णयम् ।

मेरो दक्षिणतश्चैव वर्षन्दीपान्तरे तथा ।
पर्व्वतानान्नदी राजा नामन्ताव कथाम्यहं ।

मेरो दक्षितश्चैव निशधा नाम पर्व्वते ।
ललनी च नदी तस्मिं राजान किन्नरेश्वरः ।

हरिवर्षस्य याम्यन्ते महारत्नपर्व्वते ।
रुग्मकी च नदी नाम राजानं पद्मकन्दक ।

भूमीगृहमहादुर्ग्गे नानाधातुसमन्विते ।
किंपुरुषस्य याम्यन्ते हिमवान् नाम पर्व्वते ।
नदी नाम्ना तु गङ्गा च राजा केदारक स्मृत ॥

कन्यादीपस्य याम्यन्ते मलयो नाम पर्व्वते ।
लवनाख्यु नदी नाम राजानो भुजगासन ।

तस्य पादे भवे लङ्का राक्षसानां स्थिरालया ।
नानाधातुविचित्रैश्च हेमप्राकारतोरणाम् ।

वरुणदीपयाम्य ताम्रकूट म-

५४ ख पत्रे

हागिरिः ।
हययादी नदी नाम राजानो भीमपिङ्गला ।

गन्धर्व्वदीपयाम्यन्ते तारको नाम पर्व्वतः ।
पिञ्जिकानान्नदी नाम राजा हुहुकराक्षसा ।

सौम्यदीपस्य याम्यन्ते नाम्ना यसगिरिस्तथा ।
शिखरी च नदी नाम राजा गन्धारकस्तथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नागदीपस्य याम्यन्ते खटिको नाम पर्व्वतः ।
नदी गन्धारिको नामः राजा पतङ्गदानवः ।

गभस्तिदीपयाम्यन्ते चक्रशैलमहागिरिः ।
उल्चिनी तु नदी नाम्नाः राजानो जलपूर्व्वहः ।

तांम्रदीपस्य याम्यान्ते वासको नाम पर्व्वतः ।
शंखिनी च नदी नाम राजा गोधूम्रक स्मृतः ।

कशेरुदीपयाम्यान्ते मनिभद्रो नाम पर्वतः ।
नदी नाम सुनाशी च राजानो हठशण्डकः ।

इन्द्रपदीपस्य याम्यान्ते माहेन्द्र नाम पर्वतः ।
नदी चेन्द्रानिका नाम राजा महेन्द्रकेश्वरः ॥०॥

एतेषां भारते वर्षे नवधा दीपमेव च ।

तस्य याम्ये सुभद्रञ्च नाम्ना रोदक स्मृतः ॥

शाकदीपस्य याम्यन्ते रिषभो नाम -- तः ।
पिप्यिपातृ नदी नामः राजा नाम ध्रुवस्तथा ।

कुशदीपस्य याम्यन्ते वराहो नाम पर्वतः ।

५५ क पत्रे

चन्द्र नाम्ना नदी तस्मिं राजा जीमूत्रमेव च ।

क्रोञ्चदीपस्य याम्यन्ते द्युति नाम्ना स पर्वतः ।
पवित्रञ्च नदी नाम वेनुराजानो महायशाः ।

शाल्मदीपयाम्यन्ते चन्द्राकारञ्च पर्वतः ।
गौरी नाम्ना नदी चैव राजा नाम्ना च रुष्णकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोमेधदीपयाम्यान्ते जठरो नाम पर्वतः ।
कुल नाम नदी तस्मिं राजा च सुकुमारकः ।

पुष्करो दीप याम्यन्ते पुलिन्दो नाम पर्व्वतः ।
नदी नाम कराली च राजा नाम्ना विशङ्करः ।

एते दक्षिणत मेरोरुत्तरे कथयामि ते ॥०॥

मेरोरुत्तरतश्चैव नीली नाम्ना च पर्व्वते ।
नदी च बलवती नाम राजा रमणकेश्वरः ।

रम्यकवर्षसोम्यान्ते श्वेतो नाम्ना स पर्व्वते ।
विचित्री च नदी नाम राजा हिरणकन्तथा ।

हिरन्मयदीपसौम्यान्ते शृंङ्गि नाम्ना स पर्व्वते ।
शरली च नदी नाम राजानो श्रृङ्गवेरकाः ।

भद्रकाश्य सौम्यान्ते चन्द्रकान्ति महागिरिः ।
नदी चन्द्रमती नाम राजानो रम्यकेश्वरः

५५ ख पत्रे

चन्द्रदीपस्य सौम्यान्ते सूर्यांशु नाम पर्व्वतः ।
नदी च रेवती नाम राजा रेवन्तक स्मृतः ।

कुरुवर्षस्य सौम्यान्ते कुरलो नाम पर्व्वतः ।
श्वरा च नदी नाम राजानो शरवृन्दकः ॥

एतेषु कुरुवर्षाञ्च तृखण्डं परिकीर्त्तितम् ॥

शाकदीपस्य सौम्यन्ते नारदो नाम पर्व्वतः ।
मुर्मुहश्च नदी नाम राजानो सुखनन्दनः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुषदीपस्य सौम्यान्ते महिशो नाम पर्वतः ।
वृतिघानि नदी नाम राजानो सुव्रतेश्वरः ।

क्रौञ्चदीपस्य सौम्यान्ते कुशो नाम महागिरिः ।
नदी दम्भेति नामानि राजानञ्च प्रभाकरः ।

शाल्मलीदीपस्य सौम्यान्ते पोण्डरीक महागिरिः ।
रन्धरात्रि नदी नाम राजानो दुन्दुभि स्मृतः ।

गोमेधदीपसौम्यान्ते श्यामको नाम पर्वतः ।
नदी वेकुप नाम्ना च राजानोन्नतिक स्मृतः ।

पुष्करदीपसौम्यान्ते रिचीको नाम पर्व्वतः ।
रत्नश्रोणि नदी नाम राजानो कुशरंजकः ॥०॥

५६ क पत्रे

एवन्तु सौम्ययाम्यायां समरेखे व्यवस्थिता ।
ज्ञेया विशुवरेखानि भूमध्ये पतयस्य च ।
विस्तारस्य प्रमानानि गव्यूतैकम्विजानयेत् ।
उभौ पार्श्वे तु प्राक् पश्चात् द्वौ द्वौ गव्यूत तत्समौ ।
अस्य रेखेषु संजाता सूर्यादीनाञ्च मध्यमा ।

अस्य रेखस्य प्राक् पश्चा यत्त्रास्ति योजनंतरम् ।
स्वां स्वां भोगेन संगुण्य पञ्चखाष्टाब्धिभिर्हृतं ।
तलब्धम्मध्यमश्चैव पूर्व्वे षोध्य परे क्षिपेत् ॥०॥

अतत्परम्प्रवक्ष्यामि स्वदेश मध्यम स्फुटम् ।
विशुवमण्डले मध्ये समरेखे दक्षिणोत्तरे ।
स्वदेशयाम्यसौम्यञ्च तस्मिं सम्पादयेदृजु ।
मध्याह्नच्छायमाक्रान्तारन्तरञ्चोपलक्षयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तञ्च प्राणं स्वभोगघ्नं खखस्वादाग्निभिर्हृतम् ।
स्वरेखाप्राक्स्थितं यच्च तत्फलं शोध्य मध्यमे ।
स्वरेखपश्चिमं यस्य फल योज्य स्वमध्यमे ॥०॥

ग्रहसञ्चारकं वक्ष्ये द्वादशायतनकेपि च ।

मण्डलन्तुल्यमा–

५६ ख पत्रे

नाञ्च ग्रहाणाम्भ्रमते सदा ॥
षट्कोटि नव लक्षाणि सहस्रैक सतद्वयं ।
योजनानां त्वहोरात्रे ग्रहाणाञ्चरते सदा ॥

विंशतिपञ्चसाहस्रमयुतन्नियुतन्तथा ।
नाड्यैके चरते भानुर्ग्रहानाञ्च तथैव च ॥

सार्द्ध नव दशं चैव शताष्ट द्विसहस्रकम् ।
प्राणेके चरते तत्र भगोलस्य च शग्रहाः ॥

गोमेदो मधिरो मध्ये त्वयोरन्तरते पथि ।
ग्रहानाम्भास्करादीनां स्वं स्वन्तु विशुवे चरैः ॥
अस्य मण्डलमानञ्च नित्यमेव भ्रमन्ति च ।
याम्ये यदुपसर्प्पन्ति सौम्यपार्श्वं त्यजन्ति च ॥
उत्तरे तु स्थिते यस्य दक्षिणन्त्यजते तथा ।

पुस्करस्य च याम्यन्ते षट्लक्षा तस्य शेषकान् ॥
तावद् गच्छन्ति तच्छेदात् ग्रहाणान्दक्षिणायने ।
क्षीरोदस्य च सौम्यान्ता गच्छन्ति चोत्तरायणे

दक्षिणे वाथ सौम्ये वा एकैकस्यायणे ग्रहाः ।
चरन्ते नात्र सन्देहो त्रिंशलक्षाणि योजनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धन्वन्ता तु मृगादौ च दक्षिण सचरते ग्र-

५७ क पत्रे

हाः ।

तेनासौ दक्षिणस्थश्च दक्षिणायनमेव च ॥

मिथुनन्ता कुलीरादौ चोत्तरं चरते ग्रहाः ।
तेनासौ चोत्तरस्थे च विदित्वा चोत्तरायणं ॥

कन्यन्ता च तुलादौ तु गच्छन्ते विशुवायणम् ।
मीनन्ता च मजादौ तु आगते विशुवायणं ॥

विष्णुपदा वृषो वृश्चि सिंह कभे द्विगायणम् ।

षडाशीतिमुखं शेषा सङ्क्रात्यादौ विजानयेत् ॥

वायुवेगमहा यत्र भगोलन्तु गमध्यगे ।
निष्प्रभावा ग्रहा यान्ति भचक्रेण विपीडितम् ॥

अस्य सूत्रस्याङ्क ।
योजनसंख्य षट्कोटि नवलक्ष इत्यादि ६०९०१२००
अहोरात्रस्य १०१५०२०
नान्येकस्य ।२८१ – – – ॥
प्राणैकस्य इति ॥*॥

तृप्रष्ण संप्रवक्ष्यामि मुहूर्त्तच्छायनाडिका ।
लग्नानाञ्च विशेषेण तम्प्रवक्ष्यामि सुव्रते ॥

मानतुल्यशिराद्धस्ता चतुरश्राणि कारयेत् ।
अवक्रंणि व्रणशोभं शङ्कु कृत्वा प्रयत्नतः ॥
आयामस्य षडंशेन चतुरस्राणि कारयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुरस्राणि कर्णानि तिर्यक् छित्वा च लम्बकाः ॥
चतुरश्रस्य भागार्द्धं स्वकीयमङ्गुलम्भवेत् ।
अथवा रूपस्या – –

५७ ख पत्रे

द्वादशांशानि कारयेत् ।
चतुरश्रैकभागस्य षड्गुणं याममेव च ।
एवन्तु कारये शंकु प्रयत्नेनाङ्गुलं लिखे ॥
ज्येष्ठमानञ्च शङ्कोस्तु चतु – – नि कारयेत् ।
कन्यसञ्च षडङ्गुल्यं यथादिष्टञ्च कारयेत् ॥

शंक्वर्थे ग्राहयेद्वृक्षं चन्दन स्यन्दनन्तथा ।
पलाशं खदिरं वाथ चूतं श्रीसयमेव च ।
शतसारं कृष्णसारं च नागवृक्षञ्च विल्वकं ।
अभावेन तु य कश्चित् स्निग्धवृक्षेण कारयेत् ॥०॥

शतधा कल्पये शङ्को शतभागाङ्गुलम्भवेत् ।

शिलाजलसमे श्लक्ष्णे भास्करतेजदर्शने ।
विशुवदिनपूर्व्वाह्णे तस्मिं शंकूनि स्थापयेत् ।
छायोपलक्षये धीमाम् विज्ञेया पूर्व्वपश्चिमाम्
छायमूलस्य पूर्वं स्यात् छायशीर्षञ्च पश्चिमाम् ।
आद्यन्तयोस्तु च्छायाभ्यां मत्सपुंच्छादि कारयेत् ।
नीत्वा याम्योत्तरौ सूत्रौ चिह्नये सूत्रसङ्गतिः ।
यस्मिं तु पतते चिह्नं तस्मिं याम्योत्तरम्भवे ॥
एवं छायेन विज्ञेया प्राक्पश्चा दक्षिणोत्तरम् ॥

अतः परम्प्रवक्ष्यामि दिशाभागोपलक्षणम् ।
शिलाजलसमे स्निग्धे विवस्वद्दीधितिदर्शने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५८ क पत्रे

शंको प्रमाणसूत्रेण मध्यमण्डलमालिखेत् ।
तन्मध्ये स्थापयेच्छङ्कु च्छायाग्रमण्डले कारयेत् ।
छायं प्रवेशति यस्मिं तस्मिं चिह्ने तु मण्डले ।
बिम्बमध्या च मध्याह्ने छाया ह्रस्वङ्गुलं भवे ।
यस्मिं ह्रस्वंगुलं छायं छायान्ते चिह्नये ततः ।
तच्छायान्ते भवेत्सौम्यः छायमूले तु दक्षिणाम् ।
छायं निर्गच्छते यस्मिं चिह्नं कृत्वा प्रयत्नतः ।
छायप्रवेशचिह्ने तु तञ्च पश्चिमदिग्भवेत् ।
छाया निर्गच्छते चिंह्ने तञ्च पूर्व्वं विजानयेत् ।

अथ मध्याह्नच्छायेन आद्यन्ता मत्स कारयेत् ।
नीत्वा रुभयपार्श्वौ तु चिह्नयेत्सूत्रसङ्गतिः ।
उभौ पार्श्वे तु यच्चिह्ने तस्मिं पूर्व्वापरम्भवेत् ।
एवं तु शंकुच्छायेन दिशाभागम्विजानयेत् ।

छाया दीपेषु देशेषु विभागं चोपलक्षितम् ।

विशुवदिनमध्याह्ने छाया शतगुणीकृतम् ।
शतैस्तु शङ्गुणं शंकु वर्ग्गङ्कृत्वा पृथक् पृथक् ।
तयोस्तु वर्ग्गसन्मिश्रं मूलं कृत्वाः प्रयत्नतः ।
त--

५८ ख पत्रे

लं भवते कर्ण्णं छेदकारम्भवेति च ।
व्यासार्द्धं खखसूर्यघ्नं कर्ण्णेन ताम्विभाजयेत् ।
लब्धावलम्बकज्या च स्वदेशजनितो भवेत् ।
त---र्द्धं वर्शेषु संशोध्य मूलमानयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अक्षज्या भवते तत्र चापं स्वाक्षंशकम्भवेत् ।
तत्त्रिराशिषु संशोध्यावलम्बकशकम्भवेत् ।
अक्षंशस्य दिशाभागं ज्ञेया च्छायवशेन तु ॥

अस्य सूत्रस्याङ्क ।

शन्तु १२ छाय अनेकान्तिक ।· गुण १०० तयो वर्ग्गमिश्र-मूलं कर्ण्णम्भति ॥

व्यासार्द्ध गुण १२०० भागाहार कर्ण्णेन । फल लम्बक ।

लम्बकञ्च वर्ग्ग कृत्वा व्यासार्द्धवर्ग्गे शोध्य तत्मूल । अक्षज्या भवति ॥

तञ्च चापं कृत्वा स्वदेशाक्षम्भवति ।

तञ्च तृराशौ शोध्य । अवलम्बकम्भवति ॥

व्यासार्द्धस्याङ्का ३४३८

तस्य वर्ग्ग ११८१९८४४

शङ्कुवर्ग्ग १४४०००० ॥०॥

छाया पञ्चशतैर्भिन्नं तञ्च वर्ग्गन्तु कारयेत् ।
चक्रंस घात लक्षैश्च तौ मिश्र मूलमानयेत् ।
तत्मूलम्भवते कर्ण्ण तन्दि–

५९ क पत्रे

घ्न शङ्कुना हृतं ।
छायेनापि तथैवाप्तं छेदकाभ्यां ततोलं ।
ज्यार्द्धघ्न खखखबाण्णैः छेदकाभ्यां विभाजयेत् ।
लब्धावलम्बकज्यासु अक्षज्याया तथैव च ।
शुङ्कुभागेन भक्तञ्च लम्बकज्या भवन्ति च ॥
छायाभागेन भक्तञ्च ह्यक्षज्याया भवन्ति च ।
तयोर्चापञ्च कर्त्तव्यं लम्बकाक्षांशको भवेत्
॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य सूत्रस्याङ्क ।
छाया गुण ५०० वर्ग्गे ।
चक्रांश ३६० तस्य गुण १००००० ।
तयोर्मिश्रमानयेत् । छेदव्यम्भवति ।
तञ्च गुण १० भाग शङ्कुना छायेन ।
व्यासार्द्धसार्द्ध गुण ५००० ।
तञ्च च्छेदयेत्
शङ्कुच्छेदेन भक्तं लम्बक ।
छायच्छेदेन भक्तं अक्षज्या भवति ॥
तयो चापं कृत्वा लम्बाक्षांशको भवति
॥२॥

विशुवदिनमध्याह्ने छाया षष्ठिगुणं कृत ।
विकलं योज्य तद्वर्ग्गं पृथक् स्थानेषु स्थापयेत् ।
षङ्को षष्ठिवर्ग्गेषु संयोज्य मूलमानयेत् ।
तत्मूलम्भवते कर्ण्णं च्छेदकारं भ–

५९ ख पत्रे

वेत्ततो ॥
व्यासार्द्ध षष्ठिभिर्घातं पुन सूर्येण सङ्गुणं ।
कर्ण्णेन भाजित लब्धं लम्बकज्या भवे ततः ।
लम्बकज्याकृति कृत्वा तज्यार्द्धव – – – – – ।
मूलञ्च मानये तञ्च ह्यक्षाज्या भवति तदा ।
तत्तु चापान्तु कर्त्तव्य स्वदेशाक्षं भवेति च ।
तत्त्रिराशिषु संशोध्यावलम्बकम्भवेत्
॥३॥

अस्य सूत्रस्याङ्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६० छायस्य च गुण ६० पूर्व्ववत् कारयेत्
॥३॥

विशुवदिनमध्याह्ने छायाकर्ण्णञ्च कारयेत् ।
व्यासार्द्ध शङ्कुना घातम् कर्ण्णेन भक्त लम्बकः ।
छायेन ताडित ज्यार्द्ध कर्ण्णेन तम्विभाजयेत् ।
अक्षज्या भवते तत्र चापं ह्यक्षंशकम्भवेत् ।
तत्त्रिराशिषु संशोध्यमवलम्बांशकम्भवेत् ।
॥४॥

विशुवदिनमध्याह्ने छाया घात खखाग्निभिः ।
द्विधाधरि शतैर्भिन्नम्भूय तञ्च द्विधा कृतम् ।
भद्राङ्गाष्टिभि भक्तञ्च मध्यराशौ नियोजयेत् ।
वेदापञ्चगजैर्भक्तं मूर्द्धराशौ विशोधयेत् ।
स्वाक्षालिप्तं भवेत्तत्र षष्ठोधृत्यांशकम्भवेत् ।

६० क पत्रे

तत्त्रिराशिषु संशोध्यावलम्बकांशकम्भवेत् ।
अक्षंशम्मानये जीवाम्वाक्ष्यज्यायांञ्च तम्भवेत् ।
लम्बकंशकज्या कुर्या लम्बकज्या भवेत्ततः ।
स्वां स्वान्दीपं विदित्वा तु च्छाया चाक्षंशकं कृतम् ।

अस्य सूत्रस्याङ्क ।
विशुवच्छाय गुण ३००
द्विधाधरि गुण १००
भूय द्विधा भाग १६६८
फल मध्य योज्य भाग ८५४
फलं ऊर्द्धे शोध्य शेषाक्षंशकम्भवति
॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोमेधभ्यन्तरे दीपे विशुवच्छाय दक्षिणं ।
परे तुत्तरच्छायाञ्च ह्यज्या तत्वंशेन तु ।
यस्मिञ्चाक्षन्न विद्यन्ते सदा तुल्ये दिवानिशो ।
यस्मिञ्चाक्षबहुत्वञ्च तस्मिन्वृद्धिक्षयम्वहा ।
अक्षंशकवशे दीपे हानि वृद्धि दिवानिशा ।
एवन्दीपान्तरे सर्वे ज्ञात्वा कर्म्मञ्च कारयेत् ।
गोमेधाभ्यन्तरे यस्य लक्षैकैकस्य योजने ।
शताशाङ्गुलचत्वारि विशुवे छाय वर्द्धति ।
एव स्याद् द्वीपद्वीपेषु विदित्वा च्छायमङ्गुलम् ।।
अपक्रमम्प्रवक्ष्यामि स्वदेशे जायते ध्रुवम् ।
नुदन्तिकूपच्छिद्रङ्गैरक्षज्या-

६० ख पत्रे

या गुणीकृतं ।
पञ्चखाष्टनगैर्भक्तं लब्धमपक्रमम्भवेत् ।
जाम्बूद्वीपादि सप्ताद्या यं यं स्थानान्तरे स्थिता ।
तानि सर्वानि ह्यक्षज्यातुल्यकर्म्मम्प्रवर्त्तते ।

अस्य सूत्रस्याङ्क ।

अक्षज्यायाः गुण ६९९० भाग ७८०५ फल अपक्रम-म्भवति ।।

भूयश्च सम्प्रवक्ष्यामि ह्यपक्रम यथा तथा ।।
अक्षज्या च्छेदकारेण । त्र्यष्टस्वादाब्धि भाजयेत् ।
तं फलेन विभज्यानि वेदरन्ध्रमुखाण्णवम् ।
लब्धमपक्रमां विद्या दीपदीपान्तरेषु च ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य सूत्रस्याङ्क

स्वां स्वांक्षज्या भागक ४६८३ तत्फलेन भागक ४१६४ तल्लब्धिमपक्रमाम्भवति ॥

स्वलब्धकं सहस्रैघ्नङ्कुनन्दैकाश्विभिर्हृतम् ।
लब्धामपक्रमाम्विद्या स्वदेशजनितम्भवेत् ॥

अस्य सूत्रस्याङ्क

गुण १००० भाग २१६१ फलमपक्रमम्भवति ॥

स्वांक्षंशा खत्रिस्वादाघ्नं लोकपातैर्विभाजयेत् ।
तत्फलञ्च षडघ्नञ्च स्वदेशापक्रमम्भवेत् ।

अस्याङ्क

गुण ६३० भाग ७३ लब्धि गुण ६ अक्षापक्रमा

६१ क पत्रे

भवन्ति ॥०॥

अतः परम्प्रवक्ष्यामि चतुष्टानां यथाक्रमं ।
इष्टमध्याह्निकादित्यं ज्या कुर्यापक्रमैर्वधं ।
व्यासार्द्धेन विभक्तञ्च तद्द्विनापक्रमम्भवेत् ॥
तन्तु चापञ्च कर्त्तव्यं खखवेदशरे क्षयम् ।
शोध्य शेषेण ज्या कुर्यात् । तद्दिनज्यार्द्धमेव च ॥
तद्दिनापक्रमं यच्च स्वांशेन तु गुणीकृतम् ।
लोकबानेन भक्तञ्च क्षितिज्या भवते ध्रुवं ॥
क्षितिज्यया विभज्यानि तादिनाज्यार्द्धमेव च ।
तत्फलेन हृतं ज्यार्द्धं लब्धञ्चराशवम्भवेत् ।

अस्याङ्क

गुण १३६८ भाग ३४३८ फल इष्टापक्रमम्भवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्दिष्टापक्रमचापेन शोध्यः शोधका ५४०० शेष ज्या कूर्या-
त्तद्दिनज्यार्द्धम्भवति ॥

तद्दिनापक्रमञ्च स्वाक्षेण गुणीकृत इह दीपेक्ष २७ भाग ५३
फ क्षितिज्या भवति ।

क्षितिज्यायाम्विभाज्य तद्दिनज्यार्द्धञ्च। तल्लब्धेन व्यासार्द्ध-
हृतञ्चराशम्भवति ॥०॥

इष्टसूर्येण ज्या कुर्यात् तं ज्या देवकरैर्वधं ।
लोकसप्तशरैर्भक्तम् लब्धापक्रमम्भवेत् ।
तं चापक्रमवर्गञ्च ज्यार्द्धवर्गे विशोधयेत् ।
शोध्य --

६१ ख पत्रे

पद कुर्यात् तद्दिनज्यार्द्धमेव च ॥
अपक्रमं सहस्रैर्घ्न त्र्यङ्गसामैर्विभाजयेत् ।
तं छेदलब्धिकं यच्च भूज्या भवति तस्य च ।
भूज्या व्यासार्द्ध भ -- रिष्टज्यार्द्धेन भाजयेत् ।
चापं कुर्या ततोश्चैव तद्दिनार्द्धञ्चराशवः ॥

अस्याङ्क
गुण २३३ भाग ५७३ फलं इष्टापक्रमः ।
इष्टापक्रमकृतिर्ज्यार्द्धकृतौ शोध्य पद तद्दिनज्यार्द्धम्भवति ।
इष्टापक्रम गुण १००० भाग १९६३ फल भूज्या भवति ॥
तच्च गुण ३४३८ भाग तद्दिनव्यासार्द्धः फल चापराशु-
र्भवति ॥०॥

इष्टसूर्येण ज्या कुर्यात् सहस्रैर्तद्गुणीकृतम् ।
काचसिद्धैर्विभक्तञ्च लब्धामपक्रमम्भवेत्
चाप कृत्वा तु षष्ट्याप्ता लब्धं भागम्प्रकल्पयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृराशौ शोध्य ज्या कुर्यात्तद्दिनज्यार्द्धमेव च।
तृशतैर्पक्रमङ्घात भक्त गोभद्रपञ्चभिः।
कुंज्या तु भवते लब्ध स्वदेशस्य प्रमानतः॥
द्विधा स्थाप्येष्टव्यासार्द्ध स्वं सप्ताप्त नियोजयेत्।
यमलेन विभक्तञ्च च्छेदकार भवन्ति सः।
इष्टकन्ति सहस्रैघ्नं छेदकेन विभाजयेत्।
तल्लब्धञ्चाप कर्त्तव्यन्तद्दिनार्द्ध चरासवः॥

अस्याङ्क
इष्टादित्यज्या गुण १००० भाग २४५६ फल

६२ क पत्रे

क्रान्तिर्भवति॥
इष्टापक्रम गुण ३०० भाग ५८९ फल कुज्या भवति॥
इष्टव्यासार्द्ध द्विधा स्थाप्य। एक सप्तभि भक्त फ एके योज्या तस्य भागं २ फल च्छेदकारो भवति॥
इष्टकान्ति गुण १००० भाग २४५८
फल चापङ्कर्त्तव्यम् तद्दिनार्द्ध चरासव भवति॥ ॥

इष्टसूर्येण ज्या कुर्यात् तं ज्या तु दशभि गुणम्।
पञ्चदस्रै हृत लब्धं स्वषष्टयांशयुतं धनु॥
क्रन्तिज्या भवते तत्र विदित्वा दक्षिणोत्तरं॥
स्वाक्षांशे समदि योज्या विदिशे त्तञ्च शोधयेत्।
तत्त्रिराशिषु संशोध्य ज्या कुर्या च्छेद कारयेत्।
व्यासार्द्ध द्वादशैर्घातं ता च्छेदेन विभाजयेत्।
मध्याह्नकर्ण्ण लब्धञ्च गुणकार ततो भवेत्।
क्रान्तिज्या च शतैर्घातं तन्तत्ववेदैर्विभाजयेत्।
ज्यार्द्धे तं शोध्य स्वादाप्तं तल्लब्धं छेदकम्भवेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रन्तिज्या द्व्यष्टदस्रघ्नं छेदकारेण भाजयेत् ।
चरासु भवते लब्धन्तञ्च जीवा तु मानयेत् ।
ज्यार्द्धे मेषादिके योज्य तुलादौ तु विशोधयेत् ।
दृज्या तु भवते तत्र एवञ्चतुष्टकर्माणि ॥

अस्याङ्क

सूर्यज्या गुण १० भाग २५ फ द्विधा मेक भाग ६ मेके योज्याः । तञ्च धनु कृत्वा क्रन्ति भवति ॥

क्रान्ति

६२ ख पत्रे

स्वाक्षांशे पमदि योज्य विदिशे शोध्य । तञ्च तृराशौ सोध्य । ज्यामानीय च्छेदकम्भवति ।

व्यासार्द्ध गुण १२ छेदके भक्तम्मध्याह्नकर्णं भवति

क्रन्तिज्या गुण १०० भाग ४२५ फल व्यासार्द्धे शोध्य भाग ६ लब्दि च्छेदकम्भवति ॥

क्रन्तिज्या गुण २८२ छेदकारेण भाग फल चाराशव-म्भवति ।

चरांशवज्यामानीय तं ज्या च व्यासार्द्धे मेषादौ योज्य तुलादौ शोध्य । योजितो वा शोधितो वा दृज्या भवति ॥०॥

मेषवृषभयुग्मञ्च राश्यान्ता जीवमानये-
त्तां ज्या च द्विस्थ कृत्वा तु क्रन्ति कृत्वा पृथक्पृथक् ॥
वेदाष्टान्तभि ज्यार्द्धघ्नं क्रमेणापक्रमैर्हृतम् ।
स्वं फलन्तु स्वक्रान्तिञ्च । स्वां स्वां ज्याया प्रयोजयेत् ।
द्विशतैर्मध्यमच्छायाघ्नन्तन्त्रिराशौ विशोधयेत् ।
ऋलं तु भवते शेषान्तृराश्यानुक्रमम्पृथक् ।
व्योमदस्राश्विरन्ध्रार्थ षष्ठिभि सङ्गुणीकृतम् ।
तं ऋलैस्तु क्रमं भक्तं स्वा स्वां फल यथाक्रमं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खखरूपैर्ऋलं हत्वा तं ऋलेषु युतम् फलः ।
शरसप्तयमैर्भक्तं मध्यजा भवनोदयां ॥

अस्याङ्क

व्यासार्द्धस्य गुण ६८४ भाग स्वां स्वां पक्रम । तत्फलः क्रन्तिश्च स्वं स्वां ज्यायां नियोज्य ।

६३ क पत्रे

मध्यच्छायस्य गुण २०० तश्च पृथक पृथक् स्थापित तृराशिके सोध्य तश्च ऋलं भवति ।

५९२२० अस्य गुण ६० ऋलेन भाग ।

ऋल च गुण १०० स्वानि स्वानि फलानि स्वं स्वां ऋले योज्य स्फुट ऋलो भवति ।

स्फुटऋलानां भाग २७५ फलश्च मध्योदयो भवंति
मेशाद्या मिथुनान्ता क्रमोत्क्रमा ज्ञेया ॥०॥

त्रिंशषष्ठिनवत्यांशा प्रत्येकं जीवमाणयेत्
द्युव्यासं कारयेश्चैव तथैव क्रमशः पृथक् ॥
द्युनिशार्द्धेन तां ज्या तु क्रमेण सङ्गुणीकृतं
स्वदुर्व्यासेन भक्तानि फलञ्चापन्तु कारयेत् ॥
अधो मध्यम्वि - ध्यानि मध्ये चोर्द्धम्विशोधयेत्
मेशाद्या मिथुनान्तानि मध्यज्या भवनोदया ॥

अस्याङ्क
गुण ३१४१

६३ ख पत्रे

भाग स्वं स्व दुर्व्यास फल चापं कृत्वा क्रमेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्त्रयं मध्यराशिकं अधराशौ शोध्य ॥ ऊर्द्धराशि मध्य ----
शेष पृथिवीमध्ये भवनोया ॥०॥

मध्याह्नमध्यच्छायाञ्च पञ्चरन्ध्रयमैर्वधम्
मङ्गुलं द्वि- - -त्वा तृगुणम् कारयेत्क्रमं ॥
तत्त्रिराशिस्थच्छायाञ्च तृघ्नं तन्तु यस्य च ।
तस्य दशगुणीकृत्य स्वादच्छिद्राग्निभिर्हृतम् ॥
द्विगुणीकृतञ्च यत्पूर्वं फलं तस्मिं विशोधयेत्
फलार्द्धं योज शेषे तं :शोध्यन्तृघ्नराशिके ॥
भूय तं भक्त लब्धञ्च मगुणे तम्विशोधयेत्
अधराशो हरेत्मध्यमूर्द्धमध्ये विशोधयेत्
शेषाम्मध्योदयम्विद्या मेशाद्या मिथुनान्तकं ।

अस्य सूत्रस्याङ्क
गुण २६५
तङ्गुणकृतञ्च तृधा स्थाप्य ॥ उपरिमराशौ

६४ क पत्रे

गुण १ मध्य-
राशौ गुण २ अधराशौ गुण ३

अधराशि द्विधा कृत्वा तस्य गुण १० भाग ३६६
फल द्विधा कृत्वा मेश मध्यराशौ शोध्य ।
द्विधा कृत फला अर्द्धं कृत्वा शेषञ्च सह योज्या तञ्च भूय अधराशौ शोध्य पुनश्च भागहारं कारयेत् फल ऊर्द्धराशौ शोधयेत् एवं कृत पश्चा तृराशिकाञ्च ।

मध्यराशि अधराशौ शोध्य ।
ऊर्द्धराशि मध्यराशौ शोध्य ॥०॥

कृपाङ्गत्वैक मिथुनं पञ्चगोसप्तभू वृषम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वादत्र्याङ्कैक मिथुनां भध्यजा भवनोदयाम्
ध्रुवानि तस्य विज्ञेया पिथिव्यान्त प्रवर्त्तते ॥

अस्याङ्क
१६६९ मेष –
१७९५ वृष ।
१९३६ मिथुन ॥

मध्यादयविलिप्ता च मेषस्य भद्रतारका
वृषस्य नवकूपाश्वि मिथुनस्य ----

६४ ख पत्रे.

अस्याङ्क
मेष २७८
वृष २९९
मिथुन ३२३ ॥०॥

राश्यान्तमौर्व्या मेषस्य वृषस्य मिथुनस्य च ।
---------- षे मेषम्परित्यजेत् ॥
स्वं स्वं विशुवच्छायेन घातयित्वा यथाक्रमं ॥
भद्रपिण्डन्तु मेषस्य प --- वृषस्य च ।
गोश्विपक्षञ्च युग्मस्य च्छेदकार यथाक्रमं
फलं मेषादि युग्मन्ता चरार्द्धन्तु स्वदेशजाः ।

अस्याङ्क

तृराशीनां पृथक् ज्या । गुणकार विशुवच्छाया । मेषाद्या भाग २८८।२५८।२२९ ॥०॥

राश्योदयम्प्रवक्ष्यामि स्वं स्वं देशे प्रवर्त्तते ।
यस्मिं यस्मिं समुत्पन्न मेषादीनाञ्चराशवाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्योदयञ्च संस्थाप्य मेषवृषभमन्मर्था-
स्तस्याधो व्युत्क्रमां स्थाप्य मिथुनवृषभोमजा-
श्चराशवन्तथैवञ्च संस्थाप्यञ्च क्रमात्क्रमां
मध्योदये

६५ क पत्रे

चरप्राणां क्रमस्थाने विशोधयेत्
उत्क्रमे योजयित्वा तु स्वदेशभवनोदयां ॥०॥

पुनरेव प्रवक्ष्यामि स्वदेशभवनोदयाम्
मध्योदयञ्च स्थातव्यं क्रमेनोत्क्रममेव च ।
चरप्राणान्तथैवञ्च क्रमेनोत्क्रमश त्तथा ।
मेषवृषभायुग्मञ्च मिथुनवृषभह्यजः
मेषाद्या मिथुनान्ता च शोधयेदनुपूर्वशः
युग्माद्याश्चैव मेषान्ता संयोज्यानि विलोमतः ॥
राश्योदये स्वदेशानि रुत्क्रमतुलादयः ॥ ० ॥

-- षेन प्रवक्ष्यामि कन्यादीपस्य निश्चयम्
तृप्रश्ने यत्प्रयुज्यन्ते छायादीनाम्प्रवक्ष्यते ॥
शतांश --- च्छाया षट्शतैकादशाधिके ॥
लोकर्तुशून्यलोकञ्च लम्बकज्या प्रकीर्तिता ॥
रूपकोशे - - - - - - - - - -

६५ ख पत्रे

र्तिता ॥
शून्ययुग्मरसैकञ्च स्वाक्षांशञ्च विनिर्दिशेत् ।
पञ्चर्त्वग्नि गजाङ्काश्वि वह्नयदस्र - - -
मेषाद्या मिथुनान्तानि चरप्राणञ्च प्रवर्त्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवमादीनि रंम्य च कंन्यादीपे प्रवर्त्तते ॥

अस्या-

-११ विशुवमध्याच्छाय ।

३०६३ लम्बक ।

१५६१ अक्षज्या

१६२० अक्षांशक ।

३६५ मेषस्य च प्राण

२९८ वृषस्य च प्राण

१२३ युग्मस्य च प्राण

राश्योदयं प्रवक्ष्यामि

मध्योदयञ्च संस्थाप्य क्रमेनोक्रमशस्तथा ।
चारप्राणान्तथैवञ्च क्रमेन रुत्क्रमेन च ।
मेषवृषभयुग्मञ्च । युग्मवृषभमन्मथाः ।
मध्योदये चरप्राणां क्रमस्थाने विशोधयेत् ।
उत्क्रमे योजयित्वा तु स्वदेशभवनोदयां ॥०॥
सर्वत्र मेषादीकन्यान्त

६६ क पत्रे

उत्क्रमेण तुलादयः ॥०॥

अस्य सूत्रस्याङ्क
मध्योदयप्राणपिण्डाणां मेषादिकन्यन्तानां लिख्यन्ते ।
१६६९।१७९५।१९३६।१९३६।१७९५।१६६९॥
तथैव चरप्राण लिख्यन्ते ।
३६५।२९८।१२३।१२३।२९८।३६५॥
तथैव स्वदेशभुवनोदय लिख्यन्ते ।
१३०४।१४९७।१८१३।२०५९॥२०९३।२०३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपरञ्च विलिप्तभवनोदयं लिख्यन्ते ।
२१७।२४६।३०२।३४३।३५०।३४६।।

वेदाभ्ररामैक हयाङ्कमिन्द्र लोकैकतीर्थं वटबाणखद्वौ
गुणाङ्कखद्वौ कृतवह्निख -- ामारिदीपे भवनोदयास्ते ।।

सप्तरूपाश्वि तोनांशा द्विखतृ कृताग्नयः
शुन्यपञ्चाग्नि तानाग्नि कांन्यक्षे भ --- यम् ।।०।।

६६ ख पत्रे

अतः परं प्रवक्ष्यामि उदये लग्नञ्च साधनं ।।

सूर्यस्य स्फुटभोगञ्च तृभिर्घातं हृतं कृतैः ।
स्फुट -- त्रिके सूर्य लिप्तादौ शोधयेत्ततोः ।।
विशुवोदयन्ततो ज्ञेया सूर्यादीनाङ्ग्रहन्तथा ।

विशुवोदयसु -- चरप्राणाञ्च साधयेत्

सूर्यस्य स्फुटभोगेन तञ्चराशु गुणीकृतं ।
चक्रलिप्तेन तं भक्तं फलं लिप्तविलिप्तकौ ।।
मेषादौ वर्त्तते सूर्य तत्सूर्ये ह्युदये क्षयं
आस्तमे तु धनं कृत्वा तुलादौ तु विपर्ययेत्
स्वदेशोदयसूर्यञ्च भवन्ति नात्र संशयः ।

एवं समस्कारितं सूर्यम् साधयेल्लग्नं उदयं ।।०।।

उदयात्परत प्राणाञ्च संस्थाप्य लग्नमानयेत्
यस्मि यस्मि तु संजाता स्थापयेद्भवनोदयम्
भानुना भुक्त भागादौ पलपिण्डानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६७ क पत्रे

कारयेत् ।
खखखाष्टाशके शोध्य शेषं स्या पलपिण्डकं
स्वराश्योदयपिण्डेषु यस्मिं सूर्यम्प्रवर्त्तते ।
तैश्च राश्युदयप्राणैः पलपिण्डन्तु सङ्गुणां
खखखाशकैर्भक्तम् फलम्प्राणेषु शोधयेत्
पमाज्जं शादितं सूर्ये राशिमेकञ्च क्षपयेत्
उदयात्परतो प्राणामधिकाञ्च यदिर्भवेत्
अन्याराश्यूदयं शोध्य यावत् प्राणाधिकं भवेत्
यत्र संशुद्धप्राणेषु तत्रा राशि रवौ क्षिपेत्
यदि शोधयितुन्नास्ति । तञ्च त्रिंशङ्गुलीकृतं
प -राश्युदयैर्भक्तं लिप्ताविलिप्तका क्रमां
तैस्तु संयोज्य तं सूर्ये । लग्नम् स्यात्स्वदेश -- ॥ ० ॥

अस्य सूत्रस्याङ्क ।

सूर्यस्य स्फुटभुक्ति गुण ३ भाग । फल अर्द्धरात्रिकसूर्ये शोध्य तत् सू-

६७ ख पत्रे

विशुवोदयेको भवति ॥ ० ॥

विशुवोदयसूर्येण चरप्राणा कुर्यात्

तच्चरप्राण । स्फुटार्कभोगे -- घातं भाग २१६०० फलञ्च सूर्ये मेषादौ उदयवेले क्षयम् आस्तमनवेले धनम् कृत

--- दौ उदये योज्या । आस्तमने शोध्य । एवम् स्वदेशोदयसूर्य भवति ॥

तच्च विलिप्तापिण्ड शोध्य १०८००० शेष भवनोदयेन घात भाग १०८००० फल प्राणे शोध्य ॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वदेशोदयसूर्येण भागा लिप्तविलिप्तका ।
यतो भुक्तन्ततो मेषादौ विलिप्तापिण्डञ्च कारयेत् ॥
तञ्च राश्युदये भिन्नं खखखाष्टाशकैर्हृतम्
याञ्च राश्युदये भिन्नं तञ्च राश्युदये क्षयं ।
तथा क्षयावशेषञ्च प्राणपिण्ड विशोधयेत्
सूर्ये प्रमार्ज्ज भा-

६८ क पत्रे

गादि राशिमेकं क्षिपे रवौ ॥
यदि प्राणाधिकंश्चैव परे राश्युदये क्षयं
शुद्धे शुद्धे तु चेकैकं राशि क्षिप्त्वा तु भास्करे ।
अविद्यमाने तु त्रिंशघ्नम् परे राश्युदयैर्हृतं
अंशके क्षेपयेल्लब्धं लिप्तविलिप्तका तथा ॥
एवञ्च विधिना कृत्वा लग्नं स्या तु स्वदेशजा ॥ ० ॥

अस्य सूत्रस्याङ्क

स्वदेशसूर्येण भुक्तं भागलिप्तविलिप्तकं विलिप्तापिण्ड कृतं तञ्च राश्युदयेण भाग १०८००० फल भागे । येन राश्युदयेन घातं तञ्च राश्योदये शोध्य । शेष प्राणपिण्डै शोध्य । पूर्वज्ञायेन कृत्वा सिद्धम्

रविना भुक्त भागाशां लिप्ता — ण्डञ्च कारयेत्
खखतीर्थे विशोध्यानि कलपिण्ड ततो भवे ।
राश्युदयेन तद्भिन्नं खखतीर्थेन भाजयेत् ।
इष्टप्राणे फ-

६८ ख पत्रे

लं शोध्य शुद्धे राशि क्षिपे रवौ ।
प्रमार्जये तु भागार्द्ध पुनरन्यत्र शोधयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुद्धे शुद्धे तु तत्प्राणे राश्यैकैकम् – वौ क्षिपेत्
अविद्यमाने तु त्रिंशन्न परे राश्युदयैर्हृतम्
लिप्तविलिप्तकास्तत्र क्रमसैव विभाजयेत्
भागादौ योज्य तं सूर्ये लग्नं भवति निश्चयम् ।

अस्याङ्क

तो लिप्तापिण्डं शोध्य १८०० शेषं कलपिण्डं भवति । रा-
श्युदयेन गुण भाग १८०० फल प्राणेषु शोध्य इति ॥०॥

लग्नेन नाडि कृत्वा तु तं प्रवक्ष्यामि निश्चयं ॥

यस्मिं सूर्ये प्रवर्त्तन्ते तच्च लग्नेष्टलग्नयोः
मध्ये संस्थितराशीनाम् ॥ मध्यराश्युदयम्विदु ॥
गतेष्यो भास्करांशानि तस्मिं शोध्य युतानि च ।
मध्यराश्युदयन्नाम घटिकाकर्म मस्य

६९ क पत्रे

ते ॥०॥

स्वदेशोदयसूर्यस्य भागा लिप्तविलिप्तवाः
पलपिण्डानि तं कृत्वा खखखाष्टाशकै क्षयं ॥
तच्च शोध्यावशेषाणि रविराश्युदयैर्वधम् ।
खखखाष्टाशकैर्भक्तं । मध्यराश्युदये युतम्
इष्टप्राणम्भवेत्तत्र रुदयाद्या क्रमेण तु ॥
चक्रांशांभक्त नाडी च षड्भिर्भक्त विनाडिका ॥०॥

गतांशाम्पलपिण्डञ्च रविराश्युदयेर्वधम् ।
भाजये खखखाष्टाशैः फल तच्च गतांशकम्
रविलग्नयुतं मध्ये तस्मिं शोध्य गतांशकाम् ॥
इष्टप्राणं भवे तत्र रुदयद्या क्रमेण तु ॥०॥
त्रिंशाशे षोध्य भान्वांशा कुर्या विलिप्तपिण्डकम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भानुलग्नेन तद्घातम् खखखाष्टाशकैर्हृतं
मध्यराश्युदये योज्यमिष्टफल भवेत्त–

६९ ख पत्रे

तः ॥

त्रिंशांशे शोध्य शेषाञ्च लिप्तापिण्डञ्च कारयेत्
रविराश्युदयेनाघ्नं हृत्वाष्टदशभिः शतैः
मध्यराश्युदये दत्तं भवेते नादधारकं ॥०॥

त्रिंशांशे षोध्य शेषाञ्च सूर्यलग्नेन सङ्गुणं
त्रिंशाप्तां योज्य मध्ये तु जीवपिण्डञ्च तम्विदुः ॥०॥

यस्मिं राशिस्थितो भानुः रविलग्न भवेत्ततः
रविराश्युदय वाथ नामौ द्वौ तु प्रधानतः

गुणकारञ्च विज्ञेया लग्नांशा लिप्तकं पलाः ॥
लग्नेन नाडि कृत्वा तु एवमेवादिभि क्रमाम् ॥

नाडीकर्म्म इति ॥०॥

मध्यलग्नं प्रवक्ष्यामि मध्याह्न प्राक्परे तु वा ।

पूर्वाह्ने तु गतांशेन भविष्य नापरांह्नके ।
मध्यराश्युदयं स्थाप्य मेषाद्या क्रमचोत्क्रमाम्

७० क पत्रे

मध्योदये तु भानुञ्च यस्मिं राशौ प्रवर्त्तते ।
रविराश्युदयन्नाम गुणकारन्ततो भवेत्
मध्याह्नकस्य सूर्यस्य भुक्त्यांशा लिप्तका पला ।
पलपिण्डानि कर्त्तव्यं रविराश्युदयैर्वधम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खखखाष्टाशकैर्भक्तम् गतांशाञ्च भवेत्ततः
मध्याह्ने पूर्वतो वाते गतांशञ्च विशोधयेत्
यदि प्राणबहुत्वञ्च अन्यराशिम्विशोधयेत्
यावच्छोधयितुमस्ति रुत्क्रमेण विशोधयेत्
शुद्धे वे तु तं यावत् राशैकैकं रवौ क्षयेत्
यदि शोधयितुन्नास्ति तञ्च त्रिंशङ्गुणीकृतं
अन्याराश्युदयैर्भक्तं तम्भानोरंशक क्षयेत्
शेष षष्ठिगुणं कृत्वा तेनाप्तं लिप्तके हरेत्
पुन षष्ठिगुणं कृत्वा तेनाप्तं विकले व्ययं ॥
मध्यलग्नं भवेत्तत्र मध्याह्न पूर्वतो स्थितिः ।

७० ख पत्रे

मध्याह्नपरतो यच्च विपरीतेन कारयेत्
त्रिंशाशे षोध्य भुक्ताशं पलपिण्डानि कारयेत्
रविराश्युदयेनाघ्नं खखखाष्टाशकैर्हृतम्
भविष्यांसम् भवेल्लब्ध प्राणे ताञ्च विशोधयेत्
प्रमार्ज्यङ्शादि सूर्यस्य राशैकञ्च क्षिपे रवौ ।
प्राणाधिके यदि स्यात् तावत् संशोधयेत्क्रमात्
शुद्धे शुद्धं तु तं यावत् राशैकैकं क्षिपे रवौ ।
यदि शोधयितुन्नास्ति शेषासु त्रिंशभिर्गुणं ॥
अन्यराश्युदयैर्भक्तं तं सूर्ये रंशको क्षिपेत्
शेष षष्ठगुणं कृत्वा तेनाप्तं लिप्तके क्षिपेत् ।
भूय षष्ठगुणं कृत्वा तेनाप्तम् विकले क्षिपेत् ॥
मध्यलग्न तु संजाता मध्याह्नस्य परन्तथा ॥
मध्यलग्नेन प्राणाञ्च कृत्वा मध्योदयेन तु ।
मध्याह्न प्राक् परे वा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७१ क पत्रे

थ तुल्यकर्मेण कारयेत्

अर्कञ्च मध्यलग्नञ्च तयोर्य गच्छते ग्रहः
तच्च शेषांशकं ग्राह्यः पृष्ठतस्य गताभ्शकं
भविष्याशं गतांशं वा पलपिण्ड कुरु पृथक्
स्वां स्वां राश्युदयेनाघ्नं खखखाष्टाशकैर्हृतं
तौ फलौ योज्ययित्वा तु तयोन्तरत भोदये ।
प्राणाञ्च भवते तत्र मध्याह्नस्य च प्राक्परे ॥२॥

अस्य सूत्रस्याङ्क

सूर्यञ्च मध्यलग्नञ्च अग्रतो यस्य गच्छति तस्यांश त्रिंशा षोध्य ३० शेष पलपिण्डञ्च कारयेत् पृष्ठतस्य भुक्त्याशकं पलपिण्डञ्च कारयेत् भविष्याशं वा गतांशम्वा । पृथक् पृथक् स्वं स्वं मध्योदयेन घातं भाग १०८००० फल द्वयो मिश्रयित्वा । भूयोः अन्तरभवनोदयञ्च संयोज्य प्राणा भव–

७१ ख पत्रे

ति ॥२॥

ततो छायां प्रवक्ष्यते

इष्टमध्याह्निकार्केण चतुष्क साधयेत्क्रमं
क्रंत्यादीनाञ्चतुष्टैस्तु कुर्या कर्म्म यथा तथा ।
मेषादौ वर्त्तते सूर्य मेषादौ चोपलक्षयेत्
तुलादौ वर्त्तते भानु तुलादौ तु विजानयेत्

दरद खखवेदार्थे द्वे नामञ्च प्रकीर्त्तिता ५४०० ॥

चरासु खखवेदार्थे मेषादौ तु नियोजयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुलादौ शोधयेत्तस्मिं दिनार्द्ध प्राणमेव च ॥

रात्यर्द्ध मानप्राणाञ्च मेषे शोध्या तुले धनं ।

एवान्दिनार्द्धमाणञ्च चक्रांशाप्ता तु नाडिका ।

भाग ३६० ॥

मेषादौ तूर्द्धसंज्ञा च सौम्यसंज्ञा तथैव च ॥
तुलादौ मधसंज्ञा च याम्यसंज्ञा च यान्तथा ॥
एव संज्ञा विदित्वा तु तत कर्म्मञ्च कारयेत् ॥

चापं कृत्वा तु क्रन्तिज्या लिप्ता

७२ क पत्रे

षष्ठ्याप्त चोपरे ।
तञ्चपांशक स्वाक्षंशे मेषादौ तु विशोधयेत् ।
तुलादौ योजयित्वा स्फुटं स्वाक्षंशकं भवेत्

स्फुटस्वाक्षांशभुजं द्विस्थ लिप्तापिण्डञ्च कारयेत्
दरदे तम्विशोध्यानि कोटि भवति तस्य च ।

भुजकोटो पृथ कृत्वा जीवानुमानये तयोः
कोटिज्या च्छेदकं विद्या तेन सर्वत्र च्छेदयेत् ॥

छेदकं वर्गयित्वा तु ज्यार्द्ध वर्गे विशोधयेत् ।
तङ्शेषं मूलमाणीयात्तन्मूलं रविना हतम्
छेदकेन विभक्तञ्च मध्याह्नच्छायमङ्गुलाः

भूय मध्याह्नच्छायञ्च भुक्तज्या द्वादशैर्हतं
छेदकेन विभक्तञ्च मध्याह्नच्छायमङ्गुलम् ॥ ॥०॥

रविना घात व्याभार्द्ध छेदकेन विभाजयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लब्धम्मध्याह्नकर्ण्णञ्च मध्यकर्ण्णञ्च संज्ञितं

तत्कर्ण्णञ्च

७२ ख पत्रे

द्विधा कृत्वा पल वर्ग्गानि कारयेत्
शंकुविलिप्तवर्ग्गञ्च कर्ण्णवर्ग्गे विशोधयेत्
पदञ्च तत्र कर्त्तव्याम्मध्याह्न च्छायाव्यङ्गुला ॥०॥

व्यासार्द्धे तु चरज्या च मेषादौ तु नियोजयेत्
तुलादौ शोधयित्वा तु अन्त्या लालाञ्च संज्ञकौ ॥०॥

इष्टच्छायम्प्रवक्ष्यामि मध्याह्नस्थ च प्राक्परे ।
मध्याह्नप्राक्परप्राणा तच्च खखकृतायोः
विदित्वा ह्यधिकं यच्च विवराशेष ज्या कृतं
प्राणहीणे यदि तज्ज्या व्यासार्द्धेषु विशोधयेत्
प्राणाधिके युत ज्यार्द्धे उत्क्रमज्या भवेत्तत ॥

लाले तज्या विशोनि च्छेदकारञ्च तद्भवेत्

मध्याह्नकर्ण्णोनात्याघ्नम् छेदकारेण भाजयेत्
तल्लब्धमिष्टकं तञ्च तन्तु वर्ग्गञ्च कारयेत्
तद्वर्गे शङ्कुवर्ग्गेण त–

७३ क पत्रे

त्मूलच्छायमङ्गुलं ॥०॥

मध्याह्नप्राक्परे प्राणान्दरद शहरन्तरं
विदित्वा कृधिकं यच्च ज्यामानीय क्रमन्तथा ।
इष्टज्यार्द्धेन सङ्गुण्य व्यासार्द्धेन विभाजयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षितिज्या योज्य मेशादौ तुलादौ तु विशोधयेत्
यद्यूनन्दरदस्याङ्क विपरीत धन क्षयं ।
शून्यकूपेन तद्घातं कभ्ररूपेण भाजयेत् ।
शङ्कुञ्च भवते लब्धं द्विस्थञ्चापं तु कारयेत् ।
दरदे शोध्य ज्या कुर्यात् द्वादशाघ्नञ्च कारयेत्
शङ्कुना भाजये तञ्च लब्धन्तु च्छायमङ्गुला ।

अस्य सूत्रस्याङ्क
गुण ६० भाग १०१ फल शंकुर्भवति ॥०॥

उदयापरे वाथ स्तमितश्चाग्रतोपि वा ।
मध्याह्नावाद्धि तौ प्राणाङ्गतिप्राणाम्विदुर्बुधा ।
गतिप्राणाञ्चरप्राण्य मेशादौ विवरं कृतं
तुलादौ सह संयोज्य जीवा तु मान क्रमम्
तञ्च चरप्राणज्या मेषादौ सह योजयेत्
तुलादौ शोधयित्वा तु च्छेदकारन्ततो भवेत्
मध्याह्नकर्णनांत्याघ्नं छेदकेन विभजितं
लब्धकं मि–

७३ ख पत्रे

ष्टकर्णञ्च वर्ग्गं कृत्वा तु तस्य च ।
तद्वर्गे छङ्कुवर्गोन तद्मूलं छायमङ्गुलं ॥०॥

प्राक्पराशु चराशुञ्च मेशादौ चान्तरं कृतं
तुलादौ योजयित्वा तु जीवा तु मानयेत्क्रमं
द्युतिसार्द्धेन तं ज्याघ्नम् व्यासार्द्धेन विभाजयेत्
क्षितिज्या योज्य मेशादौ तुलादौ तु विशोधयेत्
विश्लेशितकृते काले चरप्राणाधिकं यदि ।
क्षितिज्या योज्य शोध्यानि विपरीतेन कारयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लब्धकेण ततो घातां व्यासार्द्धेन भाजयेत्
तल्लब्धम्भवते शङ्कु द्विधा स्थाप्यञ्च वर्गयेत्
ज्यार्द्धवर्गेषु तं शोध्य मूलं कृत्वा तु दृग्भवेत्
तद्दृक्ज्या रविना घातम् छायाङ्गुलानि तल्लब्धं
शतघ्नाप्ता तु व्यङ्गुलं ॥०॥

छायाकर्म्म इति ॥०॥

अतः परं प्रवक्ष्यामि क्रीडार्थे छायकर्मणि ।
चरा प्राक्पर प्राणे मेशादौ विवर कृतं
तुलादौ योजयित्वा तु ज्यामानीय क्रमन्तथा ।
तञ्च मेशादिकं यच्च रात्र्यर्द्धेन गुणीकृतं
तुलादौ तु यदि तञ्च

७४ क पत्रे

दिनार्द्धेन गुणीकृतं
दस्रवेदाष्टभिर्भक्तं फलञ्च दण्डकं भवेत्
क्षितिज्या योज्य मेशादौ तुलादौ तु विशोधयेत्
खखवेदाब्धिभिर्घातं द्वाराब्धिश्रुतिभि हृतं ॥
द्विस्थं स्थाप्येकवर्गञ्च ज्यार्द्धवर्गे विशोधयेत्
मूलं कृत्वा तु तं शेषम् तत्मूल रविना हतं
शङ्कुना तद्विभक्तञ्च फलान्तु च्छायमङ्गुला ।

अस्य सूत्रस्याङ्क ॥
मेशादौ रात्र्यर्द्धेन तुलादौ दिनार्द्धेन । भाग ८४२ फल दण्डो भवति ।
गुण ४०० भागहार ४४६ । फल शङ्कु भवति ॥०॥

छायेण कारयेत्प्राणा मध्याह्नप्राक्परादिकम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छायाञ्च वर्गयित्वा तु पृथक् शङ्कुञ्च वर्गयेत्
वर्गयोगपदकर्ण्णम् छायाकर्ण्णञ्च तद्विदु ॥

मध्याह्नकर्ण्ण तत्याघ्न च्छायाणेन भाजयेत् ॥
अन्त्यायां शोधयेल्लब्धन्तञ्च ज्यार्द्धञ्च ह्यन्तरम्
विदित्वा ह्यधिकन्तो च धनुं कृत्वा क्रमेन तु ।
ज्यार्द्ध हीने यदि चापं दरदे

७४ ख पत्रे

योज्य तत्फलं

व्यासार्द्धाधिवायं तु दरदे शोध्य तत्फलं
उत्क्रम चापमित्येव च्छायाप्राणञ्च तद्भवेत् ॥०॥

मध्याह्नकर्ण्णानांत्याघ्न च्छायाकर्ण्णेन भाजयेत्
चरज्या शोध्य मेशादौ तुलादौ योज्य पापयेत्
तञ्चापेषु चरप्राणाम्मेशादौ तु नियोजयेत्
तुलादौ शोधितं प्राणामुदयास्तमणस्य च ॥०॥

छायाशतघ्न वर्गञ्च शतघ्नशङ्कुवर्गयोः
तौ योज्य मूलमाणीयां छायाकर्ण्ण भवेत्ततो ॥
त्र्याङ्कर्तुखाग्निस्वादाब्धि च्छायाकर्ण्णेन भाजयेत्
क्षितिज्या शोध्य मेशादौ तुलादौ तु नियोजयेत्
विष्कम्भार्द्धेण सङ्गुण्य द्युज्यार्द्धेणाप्त चापयेत्
चरासु योज्य मेशादौ तुलादौ तु विशोधयेत्
उदयस्तमने जाता । छायाप्राणञ्च तद्भवे ॥०॥

अस्य सूत्रस्याङ्क
४६०६९३ ॥०॥

छायालग्ने प्रवक्ष्यामि यथा भवति निश्चयम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उदयाद्यादिप्राणेषु कुर्या लानोदयन्तथा
रा–

७५ क पत्रे

शोदरं स्वदेशस्य यथा सर्वत्र पूर्ववत्
मध्याह्नस्यापरे वाथ तथा राश्यादि कल्पयेत्
तञ्च षद्राशिके शोध्य स्वदेशार्कोदये त्तु तं ।
लग्नञ्च भवेत्तत्तत्र स्वदेशजनितन्तथा ॥०॥

उदये जातप्राणेषु कुर्या लग्नादयन्तथा ।
अतीतांशम्भविश्याष विविधा पूर्ववत्कृतं
मध्याह्नपरे त स्या तृराशि योज्य भास्करे ।
मध्याह्नस्य परे जाता प्राणेषु पूर्ववत्कृतम्
एवं लग्नोदयन्तत्र स्वदेशजनितन्तथा ॥०॥

मध्याह्नाप्राक्परप्राणाम् दिनार्द्ध प्राणयो सहः
पूर्वाह्ने विवरं कृत्वा ह्यपराह्ने नियोजयेत् ।
एवमुदलयग्नञ्च कुर्यात्पूर्वैव कर्मणा ॥०॥

एवं प्रधानकर्माणि च्छायालग्नञ्च तस्य हि ॥०॥

छाये संजातलग्नानि पुन वक्ष्यामि तत्वत ।
तृष्नम्मध्याह्नकर्णञ्च च्छायाकर्णेन भाजयेत् ॥
लब्धं राश्यादिकन्तत्र स्फुटके सह योजयेत्
अपराह्ने गते च्छा–

७५ ख पत्रे

या तथैत्र भाजित फल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तञ्च षद्राशिके सोऽय राश्यादीनां फलन्तथा ।
स्फुटार्के सह संयोज्य लग्नं भवति तस्य च ॥०॥

छायाउदयलग्न इति ॥०॥

मध्याह्नप्राक्परे प्राणो मध्यलग्नञ्च साधयेत् ॥
मध्योदयञ्च संस्थाप्य पूर्वदृष्टेन कर्मणा
गतेश्याङ्शकपूर्वे च विविधा कर्म पूर्ववत् ॥

छायामध्यलग्न इति ॥०॥

अपरञ्च प्रवक्ष्यामि तृप्रष्नान्तारकापते
चन्द्रे विशोधयेत्पातं नशुद्धे मण्डल क्षिपेत्
षद्राश्यधिकयाम्यञ्च षद्राश्यूने तथोपरे ।
दक्षिणं वाथ सौम्य वा तज्या खैकेन संगुणं
सप्तार्केन विभक्तञ्च विक्षेपं भवति तस्य च ।
चन्द्रे तृराशिसंयुक्तं भुजं कृत्वा यथाविधिम्
तद्भुजं लिप्तपिण्डञ्च खपङ्क्त्यार्थे विशोधयेत्
तं ज्या सशोध्य व्यासार्द्धे । उत्क्रमज्या

७६ क पत्रे

भवन्ति सः

विक्षेपेन वध तं ज्या । खार्थवेदगजैर्हृतं
विक्षेपायनदिग्भेदे चन्द्रे संयोज्य तत्फलं
दिग्भागे शोधयित्वा तु । एकसंस्कृतचन्द्रमा ॥
स्वदेशो विशुवश्छायं विक्षेपेन गुणीकृतं
द्वादशेन हृतं लब्धं प्राक्संस्कार निशाचरे ।
यदि विक्षेप सौम्य खमध्यपर्वतो क्षयं
खमध्यपरतो यस्य तच्चन्द्रे योजयेत्फलं
यदि दक्षिणविक्षेपम् विपरीत युतयक्षयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं द्वितीयसंस्कारं दृकर्म्म नाम चन्द्रमा ॥

प्रथम दृकर्म्म इति ॥

अस्य सूत्रस्याङ्क

स्फुटचन्द्रे पातर्विशोध्य अविद्यमाने चन्द्रे द्वादशराशिकन्दत्वा शोध्यावशे राशिकन्नीरीक्षयेत् यदि षड्राशिऊणे भवति। तदा उत्तर विक्षेप। यदि षड्राश्यधिको भवति तदा दक्षिण विक्षेप। उत्तर दक्षिणम्त्रा ज्या कृत्वा। तज्या गुण १० भाग १२७ फल विक्षेपं भवति।

स्फुटेन्दौ तृराशिकन्दत्वा। तद्भुजं ५४००। शोध्य शेष ज्या कृत्वा तञ्च

७६ ख पत्रे

व्यासार्द्धे शोध्य शेष उत्क्रमज्या भवति।

विक्षेपेण उत्क्रमज्या संगुण्य भाग ८४५० फलञ्च विक्षेप। चन्द्र समदिग्भवति। तदा चन्द्रे फलं शोध्य य दिग्भेदे तयोर्ज्य। एकसंस्कारचन्द्रं भवति।

प्राक्संस्कार इति ॥०॥

अपरञ्च स्वदेशविशुवच्छायं विक्षेपेन गुणितं भाग १२ फलञ्च स्थाप्य। यदि विक्षेप उत्तरो भवति तदा एकसम्स्कारचन्द्र खमध्य पूर्वे शोध्य। अपरे योज्य। यदि दक्षिणविक्षेपं तदा एकसंस्कारचन्द्रे खमध्य॥ पूर्वे योज्य पश्चिमे शोध्य।

एवं दृकसिद्धं चन्द्रं भवति॥

पश्चात्कर्म्मञ्चकार। स्वं स्वं चास्तमनराशि षट् योज्यम् पश्चात्कर्म्मञ्च कारयेत् ॥ ० ॥

भूय संस्कारकर्मञ्च प्रवक्ष्याम्यनुपूर्वश।
स्वदेशविशुवश्च्छायं शतघ्नं व्यङ्गुलं युतं
विक्षेपेन गुण तञ्च खखसूर्येण च्छेदयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्र खमध्यपूर्वायं विक्षेपञ्च यद्युत्तरं
तल्लब्ध वि - धये चन्द्रे प-

७७ क पत्रे

श्चिमाया नियोजयेत्
यदि दक्षिणविक्षेपं खमध्य पूर्वतो युतं
पश्चिमाम्विशोध्यानि संस्कृत्संस्कारचन्द्रमा ।
संकृत्संस्कारचन्द्रञ्च ज्यामाणीय यथाविधिम् ।
तं ज्याया शोध्य व्यासार्द्धे विक्षेपेण गुणीकृतं
रूपार्थादिग्गजैर्भक्तम् तल्लब्ध स्थापयेत्पृथक्
विक्षेपायनदिग्भेदे चन्द्र तात्कालिके क्षिपेत्
दिग्समे चन्द्रे विक्षेप तात्कालिकादौ विशोधयेत्
एवं द्विसंस्कृतं सिद्धं कर्म्मसिद्ध चन्द्रमा ॥
यच्चमास्तमनान्तच्च तस्य षड्राशि क्षेपयेत्
एवं पश्चात्तदार्केन्दौः सर्वकर्माणि कारयेत् ।

अस्य सूत्रस्याङ्क ।

सकीयविशुवच्छाय गुण १०० विकलच्छाय योज्य तञ्च विक्षेपेण गुण भाग १२०० यदि सौम्य विक्षेपो भवति । तदा खमध्य पूर्वे शोध्या पश्चिमे यो तु योज्य दक्षिणविक्षेपे विपरीत युत क्षयं एवं सकृत्-संस्कारचन्द्रं भवति ।

सकृत्संस्कारचन्द्रस्य ज्या व्यासा-

७७ ख पत्रे

र्द्धे शोध्य शेष विक्षेपेण
गुणितं भाग ८४५१ विक्षेपाय दिग्भेदे तं फल एव संस्कारचन्द्रे योज्य । समदिशे शोध्य । एवं द्वकर्म्मसिद्ध चन्द्रमा भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो स्वं स्वं आस्तमने षड्राशि योज्या । चन्द्रास्तमने चन्द्रे योज्या । सूर्य आस्तमने च सूर्ये योज्या । एवं पश्चात्कर्म्म कारयेत् ॥

द्वितीयसंस्कार इति ॥०॥

ततो दृकर्म्मचन्द्रञ्च कुर्यात्तथोदये ॥
सूर्येन्द्वो एकराशिस्थं विवरं कारयेत्तयोः ।
शेषा राश्युदयैर्घातम् हृत्वाष्टादशभि शतैः ।
लब्ध चन्द्रादयप्राणां चक्रांशं भक्तनाडिका ॥
निकटस्थे यदार्केन्दू भवनन्तरं यदि ।
ततो स्वल्पांश त्रिंशांशे शोध्य शेषकला कृतं
अधिकस्य गतांशाञ्च पृथक् प्राञ्च कारयेत्
स्वं स्वं राश्युदयेनाघ्नम् शून्यखाष्टादशैर्हृतम्
तयोर्लब्धन्तु संमिश्रं तन्तु चन्द्रोदयासवः ॥
राश्यान्तरं भवे यच्च यच्च राश्युदयन्तरं
तत्र पिण्डीकृतप्राणे तयोर्ल्लब्ध

७८ क पत्रे

धिमिश्रयेत्
एव कर्म्म सुनिष्पन्नं प्राणा शीतिकरोदयेत् ॥०॥

अतः परं प्रवक्ष्यामि प्राणकर्म सुनिश्चयं ॥
दृकर्मसिद्धचन्द्रार्कौ स्वं स्वं राश्युदयैर्वधम् ॥
अष्टादशशतैर्भक्तम् लब्धं चन्द्रार्कयो पृथक्
यत्र राश्युदयेतीते स्वे स्वे स्वफल योजयेत्
ततो भोग्याधिके शोध्य तञ्च चन्द्रोदयासवः ॥
षष्ठिभिर्भक्त कैलाशं दर्शनं द्वादशांशकं
द्वादशांशकमूलेपि न च दृश्यति चन्द्रमा ॥
कालांशा षड्भि भक्ताञ्च चन्द्रदर्शननाडिका ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ चान्द्रोदयप्राण्यं षड्भिर्भक्तम्विनाडिकं
विनाडि षष्टिभि भक्तं नाडी चन्द्रोदयस्य च ॥०॥
चन्द्रोदयकर्म्म इति ॥०॥

मध्यलग्नोदयालग्न च्छायालग्नन्तथैव च ।
उदये वास्तम वाथ यत्र वेलोपलक्षितं
दृकर्म्मसिद्धचन्द्रेण कर्म्मञ्च कारयेत्तत ॥
लग्नकृतुचन्द्रेणप्यलग्न इति ॥ ० ॥
कर्म्मञ्च कारयेत्तत ।

तत्रेन्दुना कृतं लग्नं यथापूर्व्वं हि सूर्यवत्
तच्च—

७८ ख पत्रे

न्द्रस्य दिशं ज्ञात्वा क्रान्तिजीवा तु साधयेत्
विक्षेपञ्च तत कृत्वा दिशं ज्ञात्वा तु तस्य च ।
दिग्समे क्रान्तिविक्षेप तो संयोज्यः दिशि तयोः
क्रान्तिविक्षेप दिग्भेदे विवरं छेशदिग्भवेत् ।
चन्द्रक्रान्तिर्भवेत्तत्र । अनयाक्त्र चतुष्टकं
द्युतिसार्द्धं क्षिज्या तु चरप्राणं क्रमेन तु
दिनार्द्धनाडी तस्या च तस्य चोदयनाडिका ।
दृकर्म्मेन्द्वादिलग्नञ्च प्राण्यंशं कलयेर्कवत्
चन्द्रस्योदयप्राण्यञ्च रात्रिमाणे विशोधयेत्
शेषंस्तमननाडी च विदित्वा तारकापते ।
चन्द्रमध्याह्न चासन्न संदिग्धञ्च यदिर्भवेत्
चन्द्रेण क्रियते लग्नं चराश्यून्यथाक्रमाः ।
इन्दो दिनार्द्धमानाञ्च शशाङ्कोदयनाडिका ।
तौ यदा तुलमाण्यञ्च मध्याह्नेन्दोत्र प्राक्परे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रशङ्कु कृतं रात्रौ यथापूर्वहि सूर्यवत्
यथा–

७९ क पत्रे

ह्ने भास्करस्यैव तथा रात्रौ निशापते
शंकु यथेष्टवेलायां कुर्या कर्म्मानुसारिणाम् ॥ ० ॥

चन्द्राशंकु स्फुटार्थेन रविना कर्म्म कारयेत्
षड्राशि योज्य सूर्यञ्च तञ्च रात्र्युदयं भवेत्
तं रात्र्युदयसूर्येण तत कर्म्म समारभेत्
क्रान्तिज्या द्युतिसार्द्धञ्च क्षितिज्या तु चरासव ।
रात्यर्द्धमानलग्नौ च शङ्कुकर्म्मन्तथैव च ।
यथा दिने तथा रात्रौ कृत्वा कर्म्मञ्च पूर्ववत्
निशार्द्धेर्द्धो त्विष्टनाडि रात्र्यर्द्धपूर्वतो क्षयम्
अपरे योजयित्वा तु प्राणपिण्डञ्च कारयेत्
एवन्तूदयलग्नञ्च साधयित्वा तु पूर्ववत् ॥०॥

मध्याह्नप्राक्परे नाडी प्राणपिण्ठा कारयेत्
मध्योदयेन पिण्डेन मध्यलग्नञ्च साधयेत् ॥
पूर्वाह्ने तु गतांशेन अपराह्ने त्वागतांशकम्
एवम्मध्याह्नलग्नन्तु पूर्वदृष्टेन कारयेत् ॥

ज्या कृत्वोदयलग्नेन तं ज्याघातमपक्रमै ।
लम्बकेन विभक्तं च । उद ---

७९ ख पत्रे

वेत्ततः

मध्यलग्नदिशं ज्ञात्वा क्रान्तिजीवा तु मानयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं स्वाक्षांशके योज्या तौ यदि समदिग्भवेत्
दिग्भेदे रन्त -- त्वा तयोः यस्याधिकं दिशं
तथा जीवा तु चानीय मध्यज्याया भवन्ति च ॥
उदयज्ये मध्यज्याष्टं व्यासार्द्धं रवि भाजयेत् ।
ततो लब्धफलं वर्गम् समसोध्य मध्यज्याकृतौ ।
तं द्विस्थं मूलमानीय दृक्षेपज्या भवन्ति सः

यथा दिने तु पूर्वे च शङ्कु रात्रौ तथाकृतं
तच्छङ्कु कारयद्वर्गम् ज्याद्ध वर्गे विशोधयेत्
तद्विधा मूलमानीय दृज्याया भवते ततः
दृक्षेपवर्गं दृग्च तयोरन्तरितं कृतं
तत्पदं दृगतिज्या च स्थापयित्वा यथादिशिम्
तं ज्या भुक्त्यन्तरेणाघ्नं खखाङ्कभ्रशरैर्हृतम्
फलं दृगातरन्ध्रञ्च विदित्वा शोध्य कारकः
चन्द्रस्य शङ्कु चाये तु शोधकञ्च विशोधयेत्
तं शेषमाणयेज्जीवा चन्द्रशंकु स्फुटं भवेत्

तच्छङ्कुचाप कृत्वा तु खखवेदश-

८० क पत्रे

रे क्षयं
तं ज्याया भवते च्छाय द्वादशघ्नञ्च कारयेत्
शंकुना भाजयेत्तञ्च तल्लब्धं छायमङ्गुलं ॥

अस्य सूत्रस्याङ्क ॥

रात्रौ सूर्येण पञ्चमाणीय । दृगतिज्या च गुणये भुक्त्यन्तरेण । भाग ५०६०० फल दृग्यातरन्तु भवति ।

दृग्यातरञ्च शशिशंकुचा शोध्य शेष ज्यामाणीय । तज्या च स्फुटचन्द्रशङ्कु भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तञ्च चापं कृत्वा खखवेदबाने शोध्य । खखवेदबाने नाम ५४००

शेष ज्यामाणीय । तं ज्या गुण १२ स्फुटचन्द्रङ्कुना भा । फल च्छायांगुला भवति । शेष गुण १०० तेनैव भाग विअङ्गुला भवति ॥ ० ॥

शशाङ्कस्य च च्छाये नाडिकर्म्मञ्च कारयेत् ॥
रात्रौ भास्करचन्द्रौ तु क्रान्त्यादीनाञ्चतुष्टकम्
स्वं स्वं कर्म्म पृथक् कृत्वा ततो छायान्निरीक्ष-

८० ख पत्रे

येत्

प्राणां कृते तु च्छायेन यथाह्ने तु कृतन्तथा
तञ्च प्राणेन लग्नाद्या दृग्यातरंध्रलिप्तका ।
षड्राशियुक्तसूर्येण एवमाद्या तु कारयेत्
घात पश्चा तु च्छायाञ्च शतगुणन्तत्र कारयेत्
शङ्कुञ्च शतगुणं कृत्वा तयोर्वर्ग्ग पृथक्
तौ वर्ग्ग योज्य मूलञ्च कर्ण्णन्तु भवते ततः
ज्यार्द्ध घात खखार्केन कर्ण्ण भाजये ततः
तल्लब्धञ्चायं कृत्वा तु दृग्यातरंध्र मिश्रयेत्
तं ज्या ज्यार्द्धेन संगुण्य लंबकेन विभाजयेत्
क्षितिज्या शोध्य मेशादौ तुलादौ तु नियोजयेत्
तञ्च ज्यार्द्धेन संगुण्य द्युनिशार्द्धेन च्छेदयेत्
ततो भक्तं फलं यच्च तच्च पातन्तु कारयेत्
चरासु योज्य मेषादौ तुलादौ तु विशोधयेत् ।
प्राणाञ्च भवते तत्र दिनस्येष्यगतौ भवेत् ॥०॥

अत्यर्थम्मुदयासन्नमास्तमे निकटे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८१ क पत्रे

यदि ।

यदि मेषादि वर्त्तन्ते बहुत्वन्तु क्षितिज्याया ।
यदि प्राणान्तु स्वकल्पञ्च विपरीतेन शोधयेत्
चरासुञ्च तथैवञ्च विपरीत युत क्षयम्
एवन्तु कारयेत्कर्मम् छाये वा नाडिकेपि वा ॥०॥

चन्द्रच्छायानाडिकर्म्म प्रथम ॥०॥

तारापतेर्छायागतिं प्रवक्ष्ये रात्रौ विवस्वत्शशिसैंहिकानाम्
तं साधयेन्मध्यम निश्चयेन यथेष्टवेलस्य च प्राणपिण्डम् ॥
स्वभुक्तिना घात यथाक्रमेन । विभक्तयित्वा खखषट्कुदस्रै-
र्वेलानुमानेन युतानि हेयं तात्कालिकं स्या रविचन्द्रपातां

एवन्तु संस्कारकृते शशांकम् तात्कालचन्द्रे व्यपनीय पाताम्
असम्भवे द्वादशराशियुक्तम् षद्राशिहीने रुत्तर स्या
यदा तु षद्राश्यधिके तु याम्या । तञ्चन्द्रयाम्योत्तरतन्तु जीवा
त्रिशै ----- गुणैर्विभक्ता चन्द्रविक्षेपकला ततस्तु ।

विक्षेपा घाता गगनाभ्रखार्थैः रुद्राष्टकूपैर्विभजे

८१ ख पत्रे

फलञ्च

आकाशमध्ये यदि पूर्व चन्द्रे विक्षेपलिप्ता यदि चोत्तरस्थे ।
तात्कालचन्द्र क्षयमेव कार्यम् आकाशमध्ये यदि पश्चिमेन्दोः
तात्कालचन्द्र धनमेव कार्यम् विक्षेपलिप्ता यदि दक्षिणस्थे ।
तद्वैपरीते धनहानि कार्याम्

तां ज्या कृतद्व्यासदले विशोध्या
शेषेन विक्षेपवधन्तु कृत्वा तम्भाजयित्वा खशराब्धिनागैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदेकसंस्कारकृते शशाङ्के । विक्षेपचन्द्र समदिग्विशोध्या
ग योजये तौ च दिशप्रभेदे एवं द्विसंस्कारकृते शशांकः ॥

पूर्वैव कुर्यात् शिरो - यासूम् संदिग्ध मध्याह्नसमीपचन्द्रे
लग्नन्तादा चन्द्रगति प्रदिष्टेः चन्द्रोदयाश्चन्द्रदिनार्द्धतुल्ये
मध्याह्नचन्द्रो परपूर्व्वमेव च । चन्द्रोदयाशूं शशिना दिनार्द्धे
प्राणा बहुत्वे द्विगुणै विशोध्या । शेषासवः शीतकरतमासून्
यदा न शुद्धे तु गतोस्तमिन्दु । द्विसंकृतेन्दुप्रभृतीह लब्धम्
यावत्वं सूम् संकलयेद्रवीवत् ह-

८२ क पत्रे

कर्म्मचन्द्रेण यथैव पूर्वं

विक्षेपक्रान्तिञ्च ततस्तु कृत्वा विक्षेपलिप्ता च मपक्रमञ्च ।
तयोर्यदा वैकदिशे नियोज्यौ दिग्भेदमेतन्तु तयोर्वियोज्यौ ।
एवं हिमांशोस्तु मपक्रमञ्च । तेन द्युविष्कम्भदल क्षितिज्या
चरासवत् श्चन्द्रमश प्रसाध्यः यथा दिवार्क्कस्य तथा निशायाम्

चन्द्रशङ्कु क्रियते तु कर्म्मम् रात्र्यर्द्ध पूर्वापरतश्च नाडी
रात्र्यर्द्ध नाडीषु विशोध्य नित्यम् शेषे चरप्राण हरे त्वजादौ
तुलादिके योजित ज्या कृतानि । तं ज्या द्युविष्कम्भदलेन भिन्नम्
ज्यार्द्धेन भक्तन्तु फले ततस्तु । क्षितिज्या याज्यमजादिके च
तुलादिके शोध्य स लम्बकघ्नम् ज्यार्द्धेन भक्तं फल चन्द्रशंकुम् ॥

चन्द्रस्य शंकु स्फुटकर्म्मनार्थम् सूर्येण कर्म क्रियते त्वदानीम्
लग्नोदयं तेन स मध्यलग्नम् । षड्राशियुक्तार्क्कवशेन कुर्यात्
गतेष्यभागौ च गतेष्यनाडी स्वं स्वं विधि कुर्य यथैव पूर्वम्
यथैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८२ ख पत्रे

चाह्ने तु तथैव रात्रौ । तच्चोदयालग्न स जीव कुर्यात्
गोलं विदित्वा तु निधापयित्वा सा मध्यलग्नेन मपक्रमज्या ।
चापं तु षष्ठ्यांशकमुद्धरे तु स्वाक्षांशके योज्य समानगोले ।
विश्लेशितं कार्य दिशप्रभेदे । ततस्तु ज्या कुर्य स मध्यजीवा

दिशम्विदित्वा तु निधापयित्वा मध्यज्यया ताडितत्तु यदज्या
स्वलम्बकं व्यासदलेन घातं स्वापक्रमेनापि विभक्त लब्धैः
हृत्वा कृतिम्मध्यजमौर्विवर्ग्गे विशोध्य दृक्षेपकवर्ग्गमाहुः ।
कृत्वा पृथक्तस्य यदत्र मूलम् दृक्षेपकज्या स भवेत्ततस्तु

रात्र्यर्द्ध पूर्वापरतश्च नाडी रात्र्यर्द्ध नाडीषु विशोध्य शेषैः
शङ्कुञ्च कृत्वा तु । यथा दिनैव तश्च्छङ्कुवर्ग्गं विसरार्द्ध वर्गे ।
शोध्य द्विधा मूलमपास्य दृग्ज्या । तद्वर्गदृक्षेपकवर्गयोश्च
विश्लेषमूलं त्विह दृगतिज्या । भुक्त्यन्तरेणाप्त खखाङ्खखार्थम्
दृग्यातजीवां विभजेत्फलेन ॥ दृग्यान्तरंध्रन्तु त–

८३ क पत्रे

तो विदित्वा ।
दृग्यातरन्ध्रं शशिशंकुचापे विशोध्य तज्या स्फुटचन्द्रशंकुः ।

द्विस्थन्तु शंकुञ्च तदैकचापं तच्छंकुचापं खखवेदबाणे
संशोधित ज्या कुरुते तु तन्त्र । दृग्ज्या शशांकस्य च सा विदित्वा
तां द्वादघ्नां स्फुटशंकुनाप्तं छायाङ्गुलाः स्युश्शतभागमन्यत् ॥०॥
छायां विदित्वा निशि शीतरश्मे वेलानुमानेन तदातनेन ।
अपक्रमादीन्विचन्द्रयोश्च रात्र्यर्द्धकर्मस्य दिनार्द्धमिन्दोः ।
लग्नोदयो दृगतिलिप्तरन्ध्रान् ॥ छायाञ्च शंकुञ्च शतेन हत्वा ।
तद्वर्गविश्लेषपदन्तु कर्ण्णम् ज्यार्द्ध हने द्वादशभिर्शतैश्च
कर्ण्णेन हत्वा फलमस्य चापे । दृग्यातलिप्तान्तरमुप्य तं ज्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्यार्द्धेन भिन्नं हृत लम्बकेन । मेषादिके हानि च तं क्षितिज्या
तुलादिके योज्य हनेत्तु ज्यार्द्धैः भक्तं द्युविष्कम्भदलेन लब्धं
चापे चरासूप्यमजादिके तु । तुलादिके शोध्य भवे स-

८३ ख पत्रे

वत्तु

चन्द्रे वशं मेषतुलादिकञ्च प्राण दिनशेषगता हि ॥०॥

अस्य सूत्रस्याङ्क
पूर्ववत् ॥ ० ॥

चन्द्रच्छायं पुन वक्ष्ये निशि सन्ध्यात्परेण तु ।
तात्कालम्पूर्ववत्कृत्वा शशांकरविसेङ्किकम्
ततो संस्कारयेच्चन्द्रम् पूर्वस्य विधिना तत ।
तत संस्कारचन्द्रेण विक्षेपापक्रमौ कृतं
तयो विक्षेपकान्तिञ्च दिग्समे तु नियोजयेत्
दिग्भेदे शोधय तो चन्द्रकान्ति भावे ततः
द्युनिशार्द्धे क्षितिज्या तु चारासु तत्र कारयेत्
इष्टशंकु ततो कृत्वा पूर्वदृष्टेन कर्मणा ।
दृग्यातरन्ध्रसार्थेन रविणा कर्म्म कारयेत्
षद्राशियुतसूर्येण मध्यलग्नञ्च साधयेत्
आगतांशं गतांशान्वा यथापूर्व तथाकृतं

अतो लग्नदिशा ज्ञात्वा क्रान्तिजीवा तु मानयेत्
स्वाक्षांशे दिग्समे योज्या दिग्भेदे तु विशोधयेत्
तृराशौ तम्विशोध्यानि । तं ज्यामानीय च्छेदकाः
ज्यार्द्ध ---- कु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८४ क पत्रे

र्याच्छेदकेन विभाजयेत्
स्फुटच्छेदक विदित्वा तु ततो स्थाप्य पृथक् दिशं
तत्सूर्यम्मध्यलग्नञ्च विवरं कारयेत्तयोः
ततो जीवा तु मानीय च्छेदकेन विभाजयेत्
लब्धम्भुक्त्यन्तरेणाघ्नं षष्टिभिर्भाज्या यत्फलम्
फलं दृग्यातरन्ध्रञ्च शङ्कुचापे विशोधयेत् ।
ततो जीवा तु मानीय स्फुटशङ्कुञ्च ततो भवेत्
वर्गं कृत्वा स्फुटं शङ्कुः ज्यार्द्धवर्गे विशोधयेत्
मूलं कृत्वा तु तं शेषम् दृग्ज्या सा भवते ततः
दृग्ज्या चा द्वादशैर्घातं विभाज्य स्फुटशङ्कुना ।
छायाङ्गुलानि लब्धञ्च । शतघ्नव्यङ्गुलं भजेत् ॥०॥

पूर्वस्य विधिना तत्र च्छायाकर्णञ्च कारयेत्
सप्तशून्याग्निकोद्धि च्छायाकर्णेन भाजयेत्
ज्यार्द्धे दृग्यातरंध्राघ्नं लंबकेन विभाजयेत्
फल दृग्यातलिप्तञ्च च्छायाकर्णफले युतम्
क्षितिज्या शोध्य मेषादौ तुलादौ

८४ ख पत्रे

तु नियोजयेत्
व्यासार्द्धेन वधत्तञ्च द्युनिशार्द्धेन हृतं धनु
चरासु योज्य मेषादौ तुलादौ विशोधयेत्
छायाप्राणां भवे तत्र चक्राशाप्त नु नाडिका ॥०॥

अस्य सूत्रस्याङ्क
४५३०७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विना दृग्यातरन्ध्रञ्च चन्द्रच्छायाञ्च वक्ष्यते ।
तात्कालचन्द्रपातञ्च संस्कारञ्च तथैव च ।
चन्द्रस्योदयप्राणाञ्च पूर्वकर्म्मेन कारयेत्
तत संस्कारचन्द्रेण क्रान्तिजीवा तु मानयेत् ।
ततो संस्कारचन्द्रे विक्षेपं पूर्ववत्कृतं
क्रान्तिविपयोर्य च दिग्समे तु विमिश्रयेत्
दिग्भेदे विवरं तौ च दिशं ज्ञात्वा तु स्थापयेत्
चन्द्रकान्ति भवेत्तत्र तेन कर्मानि कारयेत्
स्वाक्षांशे समदिग्योज्य दिग्भेदे रन्तरं कृतम्
ततो तृराशिके शोध्य । ज्या कृत्वा छेदकं भवे ।
व्यासार्द्ध द्वादशेनाघ्नम् छेदकेन विभाजयेत्
फलम्मध्याह्नकर्ण्णञ्च

८५ क पत्रे

गुणकारञ्च तं भवेत् ॥
शोध्य हानिकृतं स्वाक्षं ज्या कृत्वा द्वादशैः हतं
छेदकेन विभक्तञ्च मध्याह्नच्छायामङ्गुला

चन्द्रस्यापक्रमं वर्गं खपङ्क्त्यार्थे विशोधयेत्
तज्याया षड्भिर्भक्तञ्च । तल्लब्धं क्षुभयं भवेत्
त्र्यद्रिभूतै क्षितिज्या घ्नं उभयेन विभाजयेत्
लब्धञ्चरासवं विद्या चापं कृत्वा तु ज्या कृतं
मेषादौ योज्य व्यासार्द्धे तुलादौ शोध्यमन्तकं

प्राक्परे त्विष्टप्राणे तु चरासून मजादिके ।
तुलादौ योज्य ज्या कृत्वा चरज्या च्छेदक
मध्याह्नकर्ण्णेना त्र्याघ्नं छेदकेन विभाजयेत्
तल्लब्ध त्विष्टकर्ण्णञ्च तञ्च शंकुञ्च वर्गयेत्
तौ च वर्ग विवरं मूल चन्द्रस्य च्छायमङ्गुलम् ॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्याङ्क
५७३

मध्याह्नकर्णेनान्त्या घ्नं छायकर्णेन भाजयेत्
तल्लब्धेषु चरार्द्ध ज्या मेषादौ तु विशोधयेत्
--

८५ ख पत्रे

दौ योज्य ज्या कृत्वा चापं तु कारये क्रमं
चरासु योज्य मेषादौ तुलादौ तु विशोधयेत्
छायाप्राणां भवेत्तत्र चक्रां---- डिका ॥०॥

भूय वक्ष्यामि च्छायाञ्च स्वल्पकर्म फलप्रद
मध्याह्नत्प्राक्परप्राणां उत्क्रमज्या तु मानयेत् ॥
तज्याया शोध्य रन्त्यायां शेषञ्च च्छेदकं भवेत्
मध्याह्नकर्णेनन्त्या घ्नं छेद्केन विभाजयेत्
तल्लब्धम्मिष्टकर्णञ्च कारयेत्
शङ्कुवर्गे क्षयं मूलं चन्द्रस्य च्छायमङ्गुला ॥०॥

मध्याह्नकर्णेनान्त्या घ्नम् छायाकर्णेन भाजयेत्
तल्लब्धं शोधयेद्यान्ता तञ्च ज्यार्द्धे विशोधयेत्
नशुद्धे प्रतिशोध्यानि चापं कृत्वा क्रमं ततो
तञ्चा- खखवेदार्थे ज्यार्द्धमूने विनिक्षिपेत्
ज्यार्द्धस्याधिक शोध्यानि च्छायाप्राणां भवन्ति सः ॥०॥

छाया स्या नान्तरे चेन्दोः

८६ क पत्रे

- ङ्गकर्णञ्च कारयेत्
शुक्लपक्षे द्वितीया तु कृष्णे चतुर्दशी पि वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तात्कालसंस्कृतादीनां सर्वत्र पूर्ववत्कृतं ॥
ततो चन्द्रार्क्कयो क्रान्ती दिग्भेदे तु विमिश्रियेत्
दिग्समे विवरं कृत्वा चन्द्रकान्तिवशा फलं
दक्षिणम्वाथ सौम्यम्वा ज्यामानीय यथाविधिम्
छायाकर्ण्णेन तद्घातं लम्बकेन विभाजयेत्
लब्धम्विशुवच्छायाञ्च दिग्समे तु विमिश्रयेत्
दिग्भेदे विवरं कृत्वा योधिक तस्य दिग्भवेत्
भुजञ्च भवते तत्र द्विस्थं वर्ग्गञ्च कारयेत्
शङ्कुवर्ग्गव सह योग तत्मूलं कर्ण्णसंज्ञकं

अर्कन्दोरन्तर कृत्वा त्वंशपिण्डञ्च कारयेत्
पञ्चरूपैर्विभक्तञ्च चन्द्रस्य शुक्लमङ्गुलम् ॥०॥

अथ परिलेखम्भवति ।
स्निग्धे तु सुसमे भूमौ मध्यबिन्दुञ्च दापयेत्
त्र्यंगुल मापयत्मध्यात् तस्यान्ते चाङ्कयेद् बुधैः

८६ ख पत्रे

तच्चिह्ने खटिकं स्थाप्य बिन्दुस्थेयं वृतं लिखेत् ।
कल्पितं रविबिम्बञ्च दिशाभागं विचिन्तयेत्
तन्मध्ये ताडयेत्सू - पूर्वय - म - यतौ
दक्षिणोत्तरदिक्सूत्रं तद्मध्ये ताडयेत्पुन
सूर्यस्य मण्डले भुजं स्थाप्य यथादिशं
द्वादशाङ्गुलमायामं भुजन्नेतु निधापयेत् ॥
पूर्वान्तामानयेत्तञ्च यावत्तस्य प्रमाणत ।
सूर्यमण्डलमध्ये तु कर्ण्णं संस्थापयेत्पुनः ।
नीत्वा द्वादशके तञ्च । यस्मिं द्वादशक स्पृशेत् ।
तस्मि मध्यकृतञ्चन्द्र सूर्यवत्वृतमालिखेत्
सूर्यस्य मध्यबिन्दोस्तु चन्द्रस्य मध्यबिन्दुकम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋजु सूत्र कृत त्ताभ्यां ताडयेत्सुप्रयत्नतः ॥
याम्योत्तर नये सूत्रन्दष्टादशाङ्गुलायतौ
उभौ मण्डलबिन्दुभ्यां उभ - र्म्मञ्च कारयेत्
याम्योतरेण मत्सेन चन्द्रमध्यञ्च ताडयेत्
चन्द्रांगे स्पृषते यस्मि द्वयो पार्शे तु चिह्नयेत्
द्वयो पार्शे तु य-

८७ क पत्रे

चिह्न युभौ शृंगन्तु चन्द्रमा ।
उभौ शृङ्गेन मत्सैकं कृत्वा चन्द्रस्य चाग्रतो
चन्द्रमध्यञ्च मत्सञ्च ऋजु सूत्रञ्च ताडयेत्
चन्द्रस्यांग च तत्सूत्रे शुक्लांगुलानि क्षेपयेत्
यत्र शुक्लांगुलं क्षिप्त्वा तद्माना चन्द्रमध्यत ।
विनिसृत्य ततो रेखे तस्मिम्वृतस्य मध्यत ।
चन्द्रस्य वृत्तमानाञ्च तन्मध्ये स्थाप्य भ्रामयेत्
चन्द्रस्यंगं भवेत्तत्र निम्बम्बाहुवशेन तु ॥७॥

पञ्चताराग्रहाणाञ्च पातांशादीम्प्रवक्ष्यते ।
कुजपातांशकं खाब्धि खनेत्त्रञ्च बुधस्य च
गुरोरशीति चांशानि शुंन्यस्वाद सितस्य च ।
सौरस्य खखरूपञ्च । पातांशञ्च यथाक्रमं ॥

विक्षेप लिप्त शुंन्याङ्क भूमिजस्य च
सुरैक ज्ञस्य विक्षेप जीवस्य शुंन्यकृत्तिको
सितस्य लोकदस्रैक सौरस्य कोषभानुमान् ॥

स्फुटविक्षेपकर्म्मञ्च तुल्यकर्म्मेण कारयेत्
स्वं पातञ्च ग्रहे शोध्य विदित्वा दक्षिणोत्तरं
तञ्च जीवा तु मानीय विक्षेपेण कृतं
व्यासार्द्धेन विभ --

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विक्षेपं भवत्येव हि ॥

वेदाद्रि भद्र गो पञ्च ग्रहबिम्ब कुजादयः ।
व्यासार्द्धे नाघनबिम्बञ्च स्वं-स्वं कर्णेन च्छेदयेत्
ग्रहाणां स्फुटबिम्ब विदित्वा तु यथाक्रमम् ॥

अस्य सूत्रस्याङ्क ॥
पातांशं कुजस्यादि ।
कु पा ४०
बु पा २०
गु पा ८०
शु पा ६०
श पा १००

विक्षेपलिप्ता भौमाद्या ।
भौ वि ९०
बु वि १३३
गु वि ६०
शु वि १२३
श वि १२६॥

ग्रहबिम्ब कुजादय ।
कु बिं ४
बु बिं ७
बृ बिं ८
शु बिं ९
श बिं ५
बिम्ब इति ॥

षड्ग योज्य खपश्चार्द्धे सूर्ये वा तारकेपि वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वदेशविशुवश्च्छाय शतघ्नं व्यङ्गुलं युतं
विक्षेपेण गुणीकृत्यः खखसूर्येण च्छेदयेत्
ग्रहा खमध्यपूर्वाद्या विक्षेपश्च यद्युत्तरम्
स्वं स्वं फलं ग्रहे शोध्य पश्चिमाया नियोजयेत्
दिग्दक्षिण विक्षेपं खमध्य पू–

८८ क पत्रे

र्वतो युतं
पश्चिमायाम्विशोध्यानि सकृत्संस्कारितां ग्रहाः

सकृत्संस्कारितान्ताराः ज्यामानीय यथाविधिं
तज्ज्याया शोध्य व्यासार्द्धे विक्षेपेण गुणीकृतं
रूपार्थाब्धिगजैर्भक्तम् लब्धञ्च स्थापयेत्पृथक्
विक्षेपायनदिग्भेदे ताम् संस्कार ग्रहे क्षिपेत्
दिग्समे शोधयित्वा तु एवं द्विसंस्कृतं भवेत् ॥

एवं संस्कारित यच्च दृकर्मसिद्ध तारकाः
एवं पश्चात्तदा ताराः सर्वकर्माणि कारयेत्

सूर्य तारा यदैकस्थे विवरं कारये तयोः
शेष राश्युदयैर्घातं हृत्वाष्टादशभिः शतैः
लब्धन्तारोदयप्राणात् चक्रांशाप्त तु नाडिका ॥

निकटस्थे यदार्को त भवनन्तरके यदि ।
स्वं स्वं राश्युदयेनाघ्नं शुन्यखाष्टादशैर्हृतं
तयोर्लब्धन्तु संमिश्रम् तत्त्र तारोदयासवः ।
राश्यान्त–

८८ ख पत्रे

र भवे यच्च यश्च राश्युदयान्तरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र पिण्डीकृतं प्राणे तयोर्लब्धं विमिश्रयेत्
एवं कर्म सुनिष्पन्नं तच्च तारोदयासवः ॥
तच्च षष्ठिभिर्भक्तच्च कालांशां च भवे ततः

सप्तादशांशैर्भौमस्य ॥ त्रयोदशांशैर्बुधस्य च
गुरोरेकादशांशैश्च विबराशैः सितस्य त ।
शने पञ्चदशांशैश्च । कालांशश्च यथाक्रमम् ।

कुज १७
बुध १३
बृह ११
शुक्र ९
शने १५

कालांशस्याधिकं किञ्चि । दृश्यते तारकाग्रहाः
कालांशं किञ्चिदूनञ्च न च दृश्यति तारकाः ॥०॥

उदयास्तमन इति ॥०॥

ताराणान्तारकेशञ्च संयुतिं तत्र वक्ष्यते ।
स्वस्वन्तु स्फुटभोगञ्च । चतुर्थकर्णमेव च
समेतं स्थापयित्वा तु दृकर्म तारके सहः ।
यदातुलोमे गच्छन्ते ताराणा गगने यदि
बृहभोगस्य तारस्य तस्य भागा–

८९ क पत्रे

धिकं यदि

अतीतञ्च भवेत्तत्र ताराणां संयुतिस्तथा
यदि भुक्त्याधिकन्तारास्तस्य भागानि स्वल्पतः ।
भविष्यन्तम्विजानीया संयुतिञ्च न संशयः
यदि वक्र द्वयो तारा विपरीतेन संयुति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकतारानुलोमञ्च ह्येक वक्र यदि भवेत्
वक्रस्याधिकभागञ्च भविष्यं संयुतिर्भवेत्
स्वल्पभागञ्च वक्रस्य तदातीतञ्च संयुति ।
तयोस्तारान्तरं कृत्वा लिप्तापिण्डञ्च कारयेत्

वक्रम्वा अनुलोमम्वा समयानेन गच्छति
तदा भुक्त्यन्तरैर्भक्तं तिथिर्भवति तत्फलं
भाग यत्र न विद्यन्ते षष्ठिघ्नं भाज्य लिप्तका
भूय षष्ठिघ्न स्वादघ्नं भक्तं तु च श प्राणयोः
अन्तरन्तत्र विज्ञेया भवि ज्ञेया भविष्येन्तरं
गते गतान्तरं ज्ञेया क्रमेन संयुति तथा ।
क्रमेन वर्त्तते चेकं एव वक्रम्प्रवर्त्तते ।
तदा विवरलिप्तानि भुक्तिमिश्रेन भाजयेत्
एवमन्तरकर्माणि पूर्ववत्कारयेत्ततः
कृत्वा तु श लिप्तानि गतेष्यो तारयोस्तथा ।
ततो विवरलिप्ता च स्वं स्वं भोगेन संगुणं
समे तद् गच्छते यद्यः भाजितं भुक्तिरन्त-

८९ ख पत्रे

रैः

वियानो भुक्तिमिश्रेन भाजयित्वा तु पूर्ववत्
फलं भविष्ये संयोज्य अतीते विशोधयेत्
एक तारं यदा वक्रं विपरीत युत क्षयं
समलिप्तं भवेत्तत्र भविष्येपि गतेपि वा ।

ततो समलिप्तके तारे । स्वं स्वं पात विशोधयेत् ।
बुधशुक्रयोस्तु शीघ्रेषु स्वं पातञ्च विशोधयेत्
ज्यामानीय यथातथ्यं विदित्वा दक्षिणोत्तरं
विक्षेपेन गुणीकृत्य अन्तकर्णेन भाजयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विक्षेपम्भवेत्तत्र तारकानां पृथक् पृथक्
स्वं स्वं तु ग्रहविद्धार्द्धं स्वविक्षेपे विशोधयेत्
एवं विक्षेपलिप्तान्तु विदित्वा दक्षिणोत्तरं ॥

रात्र्यर्द्धप्राणे संशोध्य स्वं स्वमुदयासवाः ।
ततो शेषेन प्राणेन भवत्युदयलग्नयोः
ततो स्वोदयप्राणेन मध्यलग्नञ्च साधयेत् ॥
पञ्चज्यामानये तौ च पूर्वदृष्टेन कर्मणा ।
द्वौ ग्रहस्य च पञ्चज्या विशेषं यदिर्भवे
ता च मानीय पञ्चज्या भूय भूयञ्च साधयेत्
ततौ दृग्गतिज्या च तानभद्रैर्विभाजयेत्
लब्धं दृग्गतिनाडी च तारयो–

९० क पत्रे

स्तु पृथक् पृथक्

स्वं स्वमुदयप्राणे तु योज्य दृग्गति चासवः ।
एवन्तौ विवरं कृत्वा । ततो प्रत्याय चासवः

स्वं स्वं दृग्क्षेपजीवा च भिन्न भुक्त्यन्तरेण तौ ।
यदि वक्रगतेद्येक भुक्तिमिश्रेन संगुणं
खखांकखेपुभि भक्तं फलं दक्षेपलम्बनं
स्वं स्वं विक्षेपलिप्ते तु तयोर्योज्या दिशि समे
विदिशे विवरं कृत्वा स्फुटविक्षेपयो ग्रहा
तयोस्तु स्फुटविक्षेपं दिग्भेदे तु विमिश्रयेत्
दिक्समे विवरं कृत्वा दिशं चैवोपलक्षयेत्

बिम्बयोगार्द्ध विक्षेप तुल्यमानं यदिर्भवे
निकटस्थेन वर्त्तन्ते न च रन्तर तारयोः
यदि विक्षेपमल्पञ्च तदा बिम्बप्रच्छादना–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तदा स्थित्यर्द्धनाडी च । साधयित्वा प्रयत्नत ।

बिम्बयोगार्द्ध षष्ठिघ्नं वर्गञ्च कारयेत्ततो
स्फुटविक्षेप षष्ठिघ्नं तथैव वर्ग कारयेत्
बिम्बयोगार्द्धवर्गे तु विक्षेपाकृति शोधयेत्
विवरं मूलमानीय । भाजितं भुक्तिरन्तरैः
वियानो भुक्तिमिश्रेन फलं स्थित्यर्द्धनाडिका ॥

ततो परिलेख भवति ॥
मध्यबिन्दु लिखेद् भूमौ योगार्द्ध ---

९० ख पत्रे

खयेत् ।
ततो याम्योत्तरेखं रज सूत्रेण ताडयेत्
विक्षेपम्मध्यबिन्दौ तु स्थाप्य यथादिशन्नयेत्
विक्षेपाद्यन्तचिह्ने तु स्फुटा --- स्थापितं
याम्ये याम्ये तु संस्थाप्य उत्तरं चोत्तरन्तथा
ततो वृत्तं तयो लिख्ये विक्षेपाद्यन्तमध्यकृत्
प्रत्यायन्ते भवेद्योगं विश्लेषस्थिति चान्तके ॥०॥

स्फुटबिंबार्द्धमाने च विक्षेपञ्च न शुध्यति
शेष वेदैर्विभक्तञ्च अङ्गुलान्तरमेव च
एवं क्रमेन ज्ञातव्यं तालहस्तान्तरेपि वा
भद्रवेदैर्विभक्तञ्च तालकान्तरकं भवेत्
स्वादाङ्कलब्ध हस्तञ्च अन्तरं चोपलक्षयेत्
एवं समांशमात्रञ्च विक्षेप बहुतरं यदि ।
एवन्तु संयुतन्तत्र तारकानां न संशयः ॥०॥

ग्रहाणा संयुतिं तत्र आयुर्दय प्रवर्षणं
भावफल स्वभावञ्च पञ्चानमस्थिरं भवेत्
वा न वा ग्रहसंयोगा वा न वा तु प्रवर्षन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा न वा मायुष-

९१ क पत्रे

न्तत्र वा न वा भावतो फलं
वा न वा तु स्वभावानि प्रसिद्धन्तैवमुच्चरेत् ॥

एक वक्रानुलोमञ्च ग्रहयोगविशेषतः ॥
सहितं भूषनाथेन सूत्रमात्रन्तु भाषितं ॥०॥

ग्रहान्नक्षत्रयोगा अयं शास्त्रे न भाषितं
गणितं कुरुते यस्य महादोषञ्च दृष्यते ॥०॥

अगस्तेरुदयं वक्ष्ये यथा सूर्येण भाषितं
पञ्चाग्निदस्रैः स्वाक्ष न्नं त्रिवेदैर्भाज्य चांशकं
ततुल्यन्तु स्फुटार्कञ्च अगस्तेरुदयं भवेत् ॥
लम्बकाशं च रुद्रघ्नं मूर्च्छनैर्भाज्य चांशकं
ततुल्यम्वर्त्तते सूर्यम् ततो ह्यस्तमनम्भवेत् ॥०॥

अस्य सूत्रस्याङ्क ।
स्वांक्षांशकस्य गुणकार २३५ भागका ४३ फल ततोदय
स्वलम्बक गुणकार ११ भागहार २१ फल ततोस्तमय-
न्यगस्तिकं

अगस्त्योदयास्तमन इति ॥०॥

लग्नस्य शोभनंशानि भागं वक्ष्ये पृथक् पृथक्
मूर्च्छनैर्मेषलग्नस्य इन्द्रेण मकारवृषौ
मिथुनस्य च भागानि सप्तैकं शोभणांशकं
सिंघवृश्चिककु - - - - -

९१ ख पत्रे

नवरूपकैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छिद्रैर्भक्त धनुकन्यो मीनां चाष्टभिर्भाजितं ॥०॥

तस्याङ्क
मेषस्य २१
वृषमकरयोः १४।
– थुनस्य – –
सिंघवृश्चिककुम्भानां १६।
धनुकन्ययोः ६।
मीनस्य ८।

स्वं स्वं भागेन भक्तञ्च । लग्ने स्वं स्वन्तु योजयेत्
प्रवेशमात्त्रेन लग्नञ्च फल तत्र न विद्यते ।
शोभनांशकयुक्तेन सफलञ्च भविष्यति ॥०॥

जीवाकर्मम्प्रवक्ष्यामि श्रीकण्ठेन प्रकाशितं
राशित्त्रयस्य चांशानि नवति संख्यया स्मृत ।
भागैकैकेन जीवैक तस्मान्नवति संख्यया ।
भागैकैक परंन्नास्ति तस्माज्जेष्टतर परं
अहोरात्रस्य नाडी च तत्तुल्यन्तस्य च्छेदकं
षड्भि संस्थाप्य षष्ठिञ्च तस्यैकोनन्तु सप्तधा
तदैकोण त्तृधा स्थाप्य तस्यैकोणन्तु पञ्चधा
एकोणम्मकधा स्थाप्य तदैकोण त्तृधा स्मृत ।
द्विस्थ द्विस्थे द्विस्थेकमेकोणं तस्येकोणन्तु मेकधा ॥०॥
तस्यैकोण त्तृधा स्थाप्य तदैकोणं द्विधा तथा ।
क्रमेणोन त्तृधा स्थाप्य नचूनमेकधा स्मृत
मेकोणं द्विस्थ

९२ क पत्रे

संस्थाप्य तदैकोणन्तु मेकधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्यैकोणं द्विधा स्थाप्य क्रमेणोनं द्विधा स्मृत ।
न चूनुम्मेकधा स्थाप्य क्रमेणोनन्तु पञ्चधा
न चूनम्मेकधा स्थाप्य क्रमेणोनञ्चतु तथा ।
न चूनम्मेकधा स्थाप्य द्यूनमेकोनमेकत ॥०॥
तस्यैको द्विधा स्थाप्य क्रमेणोनञ्चतु तथा
द्यूनञ्च मेकधा स्थाप्य तस्यैकोणं द्विधा तथा
एकोणमेकधा स्थाप्य तस्यैकोण द्विधा तत
द्यूनन्तु मेकधा स्थाप्य तस्यकोण द्विधा तथा
द्यूनञ्च मेकमेकोणं तस्य द्यून द्विधा तथा
क्रमेणोनञ्च स्थाप्य द्यून चैव द्विधा तथा
एकोणेकं द्विमूनं द्वि तदैकोणञ्च मेकत ।
एवन्नवतिधा संख्या सर्वा संजीव तस्य च
अनेन कारयेज्जीवा यदीष्टसंख्यमेव च ॥०॥
क्रमेनाधाध संयोज्य एकद्विकृ क्रमे तत ॥०॥

ततो राशित्रयं संस्था लिप्तपिण्डानि कारयेत्
खखवेदार्थमित्युक्त ऋलञ्च रदमेव च ।

इष्टसंख्येन तम्भक्तं यदि शेषं प्रयच्छति ।
तत्फलं वर्ज्जयित्वा तु जीव तत्र न विद्यते ।
इष्टसंखेन भक्तस्य शेषा

९२ ख पत्रे

यच्च न तिष्ठति ।
तत् फलन्तु विजानीया इष्टजीवस्य च्छेदकम् ॥

६०।६०।६०।६०।६०।६०।
५९।५९।५९।५९।५९।५९।
५८।।५८।५८।
५७।५७।५७।५७।५७।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५६।
५५।५५।५५।
५४।५४।
५३।५३।
५२।।
५१।५१।५१।
५०।५०।
४९।
४८।
४७।।४७।
४६।४६।
४५।
४४।४४।
४३।।
४२।
४१।४१।
४०।
३९।
३८।
३७।
३६।३६।
३५।
३४।
३३।३३।
३१।।
३०।।
२९।२९।
२८।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२७।
२६।।
२५।
२३।
२२।२२।
२१।
२०।२०।
१८।
१७।१७।
१५।
१४।
१३।
११।११।।
१०।
९।
८।
७।
५। ५।
४।
२।। २।
१। ।।
जीवस्याङ्क ९० ।

जीवानाञ्च त्रयोविंश अथोर्द्धञ्च न विद्यते
नवति जेष्टबीजा च तृ जीवा कन्यसापम ।
त्रयोविंशति जीवानां भागाहारम्प्रचक्ष्यते ।
तृ जीवास्य खखाष्टैक ।१८००।।
पञ्चनः खाष्टखंमुखं १०८०।।
षड् जीवस्य खशुंन्याङ्क ।।९०० ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भद्रस्यार्थाद्रिकृतिका ।६७५ ।
नवनः षड्शत

९३ क पत्रे

तत्त्र ।६००॥
दशनः खकृतार्था च ।५४०॥
द्वादशस्य खपञ्चाब्धि ।४५०॥
तिथै खरसपुष्करैः ॥३६०॥
अष्टादशस्य त्रिशत ॥३००॥
विंशते शुंन्यतारकं ॥२७०॥
जिनस्य तत्वदस्रञ्च ॥२२५॥
तत्वस्य कोषमूर्च्छना ॥२१६॥
सप्ताविंशस्य द्विशतैः ॥ ॥२००॥
त्रिंशते खधृति स्मृत ।१८०॥
षड्त्रिंशस्य खपञ्चैक १५०॥
खाब्वे पञ्चपञ्चज स्मृत ।१३५॥
पञ्चवेदस्य खार्कञ्च ।१२०॥
पञ्चाशस्य द्विपादिशि १०८॥
वेदार्थस्य खखैकञ्च १००॥
शुंन्याङ्कस्य खनन्दकं ९०।
द्वासप्तते शराद्रिञ्च । ७५॥
सराद्रे यमसप्त च । ७२॥
नवते षष्ठिभिर्भाग । ६०॥
छेदयित्वा यथाक्रमं ॥०॥

एवम् तु च्छेदकारञ्च आदिव्याया तु तस्य च ॥
स्वं स्वं तु च्छेदकाराणां जीवासंख्येन स्थापयेत्
अधाध क्रमश योज्य एकद्वितक्रमन्ततो ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्रधा स्थापितं जीवा तत्त्र संयोजयेत्क्रमं
सर्वपाजित व्यासार्द्धम् मयोज्य मादिज्या भवेत् ॥
एवन्नवतिजीवेन ज्यामानीय य-

९३ ख पत्रे

थाविधिं

एवन्तु सिद्धते जीवा विदित्वा शास्त्रदर्शणैः
इति ॥०॥

अतः परम्प्रवक्ष्यामि मन्दखण्ड पृथक् पृथक् ॥
स्वं स्वन्तु मन्दकर्मञ्च प्रत्येकं भास्करादयः ।
अनेन कर्मणा सिद्ध मन्दखण्डं भवेत्ततः ॥०॥

शीघ्रखण्डम्प्रवक्ष्यामि रविचन्द्रविवर्ज्जितं
कुजादीनां ग्रहा पञ्च शीघ्रखण्डञ्च कारयेत्
सिद्धजीवा द्विधा स्थाप्य ऋले शोध्य क्रमेन तत्
द्विधा स्थापित जीवा च । ऋले शोध्यावशेषकं
शीघ्रकर्म कृत तौ च फल स्थाप्य पृथक् पृथक् ।
ऋलस्य फल व्यासार्द्धे कर्कटादौ विशोधयेत् ।
मकरादौ क्षिपेत् वर्ग्गं ततो ज्याफल वर्गयेत्
तयोर्वर्गयुतम्मूलं कर्ण्णं भवति तस्य च ।

जीवा च शीघ्रनिष्पन्नं तच्च ज्यार्द्धेन सङ्गुणं
कर्ण्णेन भाग लब्धञ्च शीघ्रखण्डञ्च तद् भवेत

यत्त्रधा स्थापितं जीवा कृत्वा प्रत्येककर्मणा
पञ्चानान्तारकानञ्च शीघ्रखण्डं भवेत्तत ॥०॥

अतः परम्प्रवक्ष्यामि जीवा सप्त प्रधानकं
नवति नवत्यार्द्धञ्च त्रिंश तीर्थ तिथिर्नव ।
षड्भि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९४ क पत्रे

रेतानि जीवानि सप्तैते परिकीर्त्तिता ॥

एतेषां द्विप्रकारेण ज्याकर्म तत्र कारयेत्
नवते राशि त्रिंशघ्नं भागैकं खण्डमेव च ।
नवत्यार्द्धस्य खण्डस्य राशि पञ्चेकसङ्गुणं
द्वे चांशेन प्रयुक्तञ्च जीवा भवति तस्य च ।
त्रिंशतेत्तं दशघ्नञ्च त्रयराशेन जीवया ।
धृते राशि षडघ्नञ्च भाग पंचेन जीवया
त्रिंशराशिञ्च पञ्चघ्नं षष्ठयां संयुत जीवयो
नवनः राशि तृघ्नं च दश चांशेन जीवया ।
षट्जीवा राशि द्विघ्नं च भागा पञ्चदशेन तु ॥०॥

चापकर्म प्रवक्ष्यामि यथावदनुपूर्वशः
शोध्यमानं विदित्वा तु ततो खण्डम्विशोधयेत्
यत्र खण्डानि संशुद्ध तत्र संख्यानि स्थापयेत्
तत्र संखण्डञ्च शेषाञ्च आदिखण्डेन सङ्गुणं
शुद्धखण्डस्य मन्तज्या तेन शेषां विभाजयेत्
लब्धसंखेषु संयोज्य चापकर्मम्भवेत्तत ॥०॥

वर्गकर्मञ्च मूलञ्च तञ्च वक्ष्यामि निश्चयं
यत्र संख्येन संगुण्य वर्गकर्म विदुर्बुधः
अथवा चादिरूपञ्च मादिरूपेण सङ्गुणं
द्विगुणं स्थानसर्वञ्च चत्संघा-

९४ ख पत्रे

तक्रमेन तु ।
ततो परतरूपेण तेनैव घातयेद् बुधैः
यत्र स्थानं भवेत् संख्यक्रमे सर्वत्र सङ्गुणं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परतो मूलकर्मञ्च विदित्वा तु सुनिश्चयं
रूपसंख्येन भक्तञ्च मूलकर्म भवेत्तत ।

अथवा वर्गपिण्ड च विसमे मूलमानयेत्
यत्र भागं प्रयच्छन्ति तत्र भागेन संहरेत्
द्विगुणस्थानसर्वेन भाजयित्वा क्रमेन तु
परस्परन्तु तत चेवं मूलकर्मन्तु कारयेत् ॥❀॥

सुमते महातन्त्रे तृप्रष्णाधिकार तृतीयः समाप्तः ॥❀॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताडपत्रोलब्धस्य सुमतितन्त्रस्य
त्रिप्रश्नाधिकारः समाप्तः ।
अतः परं चन्द्रग्रहणाधिकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रस्य ग्रहणम्वक्ष्ये यदावदनुपूर्वसः

पक्षान्तमासान्तकसर्वकाले यद्यैकराशौ निकटे स्वसप्तमे ।
पातं सहो वर्त्तति चन्द्रसूर्यौ विनिश्चयं स्याद् ग्रहणं विदित्वा ॥
प्रसाध्ययित्वा सितपूर्णभास्यां आदित्यचन्द्रो च विलोमपातां
कृत्वा पृथक् मध्यममर्द्धरात्रिकं स्फुटो ति–

९५ क पत्रे

थिच्छेदकसर्वनाडिका

सर्वत्रा मानीय यथाक्रमेनः । प्राणैर्वधम्पर्विकानाडिकैस्तु
स्वास्वान्तु भोगा गुणयेत्क्रमेणः । शुंन्यखकोशेन्दुयमैर्विभक्ताः
यद्यर्द्धरात्र्यात्परतोपि पर्व्वम् स्वमध्यमे तत्फल योजयित्वा ।
निशार्द्ध पूर्वे तु शोधयित्वा एवां रविन्दो स्फुठकर्म्म कुर्याः

तात्कालिकाम्मध्यमसूर्यचन्द्रौ । अंशा कला वा विकला च तुल्यः
तुल्या विलिप्ता न भवेत्कदचित् तात्कालिकार्केन्दुतिथिम्प्रकुर्या ।
तम्पर्विकेनापि तथैव कृत्वा तावच्च कुर्याद्विकला समाच्च ॥

संशोध्य पातं समलिप्तचन्द्रे असम्भवे द्वादशराशियुक्त
षड्राशिहीने दिशि रुत्तर स्या यदा तु षड्राश्याधिके तु याम्या
त्रिंशन्न तङ्ज्या हृतं द्यष्टरामैश्चन्द्रस्य विक्षेपतनुप्रमाणं

स्फुटार्कभुक्तिर्गुणितं शतेन लोकाष्टरूपैर्विभजेर्कमानं

वेदाश्विभिर्भाज्य स्फुटोन्दुभोगं लब्धं शशांकस्य तनुप्रमाणं

चन्द्रार्कयोस्तु स्फुटभुक्तिमिश्रं शतैर्वधं भाज्य राक्षवातैः
रविप्रमाणेन विशोध्य शेषां तमप्रमानं स भवेत्ततस्तु ।

चन्द्रप्रमानाच्च तमप्रमाना–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९५ ख पत्रे

न्तौ योजितार्द्धञ्च युतार्द्धमानं
योगार्द्ध हीने ग्रहणञ्च नास्ति विक्षेपमानाल्प भवेत्तदास्ति ।
विक्षेप संशोध्य युतार्द्धमाने ग्रासं भवे ताञ्च विशोध्य शेषा
ग्रासप्रमानञ्च शशिप्रमाने शोध्यावशेष शशिशुक्लवर्णम्
तस्मिन्नशुद्धे विपरीत शोध्यं ग्रासास्तु निःशेषशशि न दृष्टि
योगार्द्धमानञ्च विलिप्तवर्गे तात्कालविक्षेपविलिप्तवर्गं
संशोध्य शेषञ्च पदञ्च कुर्यात् भुक्तयान्तराप्ता घटिका स्थित्यर्द्धः ।
प्राणैर्हतार्द्ध स्थितिनाडिकेन स्फुटस्वभुक्तिगुणितं क्रमेण ।
शुन्न्याभ्रकोशैकयमैर्विभक्ता तैस्तु विशोध्या समलिप्तचन्द्रे ।
संस्पर्शचन्द्र भवतीथ पूर्वे । एकत्र दद्या समलिप्तचन्द्रे
स मोक्षचन्द्र भवतीति पश्चा पाते स्वक्त्यापि विपरीत तद्वत्
पृथक् पृथक् स्पर्शविमोक्षकर्म्म ग्रासादिपाताङ्ग्रहणादिचन्द्रे
संशोध्य विक्षेपमपि प्रसाध्यः। ग्रासन्तपातेन विमोक्षचन्द्रः
विशोध्य विक्षेप तथैव कुर्या विक्षेपलिप्ता प्रतिराशि स्थाप्यः
कुर्या कृतिन्तौ

९६ क पत्रे

ग्रहणादिमोक्षौः पृथक् कृती शोध्य युतार्द्धवर्गे ।
कृत्वा पदन्तौ ग्रहणादिमोक्षौ । भुक्त्यन्तरैर्भाजित तौ पदञ्च ।
स्थित्यर्द्ध नाडी ग्रहणादिमोक्षौ ग्रासाधिके कुर्य विमर्द्ध नाडी
चन्द्रस्तमश्चाङ्गहितार्द्धवर्गे ॥ विक्षेपवर्गोनपदञ्च कुर्या ।
भुक्तयन्तराप्ता घटिका विमर्द्धः तद्भोगमिन्दो समलिप्तचन्द्रे
हित्त्वा विमर्द्धादिगतः स चन्द्रः तमेव दत्त्वा समलिप्तचन्द्रे ।
सोन्ते विमर्द्धान्त भविष्यतीन्दुः पातेन्यथा कार्य युतक्षयञ्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्पर्शमोक्षा च विमर्द्ध नाडी सर्वैव कुर्यान्तु यथाक्रमेण

अर्द्ध निशायाम्परतोपि पर्वं पर्वः विमर्द्दः विवरञ्च कुर्यात्
रात्यर्द्ध पूर्वे तु विमिश्रयित्वा । एवं कृत त्ताडि निमीलनञ्च
उन्मीलनं रैव विपर्ययेण । संस्पर्शमोक्षञ्च विमर्द्धकौ च ।
तौ योजयित्वा तु विमर्द्ध कालं ॥

स्थित्यर्द्ध के शोधितमिष्टनाडी शेषञ्च भुक्त्यन्तरया निहत्यः ॥
खड्गैर्विभक्ता फलमस्य वर्गम् विक्षेपवर्ग सह योज्य मूलं
तन्मूल संशोध्य युतार्द्ध माने । शेषञ्च ग्रासेष्ट भवे रविन्दोः

९६ ख पत्रे

॥०॥

यद्यर्द्ध रात्र्यात्परतोपि पर्वं स्थित्यर्द्ध नाडि ग्रहमध्यनाड्यां
स्पर्शे तु संशोध्य विमिश्र मोक्षे निशार्द्ध पूर्वे यदि पर्वनाडिः
सस्पर्शे तु देया विनिशोध्य मोक्षे । तस्मिन्नशुद्धे विपरीत शोध्या,
वेलानुमानामुपलक्षनीया प्रागर्द्ध रात्र्यात्परतोपि चन्द्रे
मध्याह्नत प्राक्परतोपि सूर्ये संस्पर्शमध्यग्रहेणान्तकाले
प्रत्यायिकाया इह नाडिका स्युः ।

प्रत्यायनाडिश्च शरेन्दुनाडिस्त्वयोन्तरं शेष हतस्तु प्राणैः
जीवानुमानीय यथाक्रमेण । ज्यार्द्धे तु संयोज्य शरेन्दुहीनं
प्रत्याय हीने तु विशोध्ययित्वा । एवं भवत्युत्क्रमसिञ्जनी या
स्वाक्षाज्यामाहत्य यथाक्रमेण व्यासार्द्ध भक्त फल चाप कुर्यात्
अक्षांशकज्या स भवेत्ततस्तु । प्रत्यायनाडी च निशार्द्ध पूर्वे
अक्षांशकज्या दिशि चोत्तर स्यात् परे निशार्द्धे दिशि दक्षिण स्यात्
भानोस्तथैवं दिशि चाक्षजीवा । मध्याह्न पूर्वापरयो विदित्वा

ग्रासादिमध्यान्ता निशाकरेन्दोः क्रमेन राशित्त्रयसंयुतेषु
मेषादि सौ–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९७ क पत्रे

म्या च तुलादि याम्यां ज्यामानये भिन्नमपक्रमेन ज्यार्द्धेन तम्भाजित लब्धि चापं ग्रासादिमध्यन्तक्रमायनंशा ॥

अक्षयनांसौ समदिक् युक्तं तौ योजितं स्या तु तयोर्दिशि स्यात् अन्यत्र काष्ट विवरञ्च कुर्यात् यस्याधिकन्तस्य दिशिर्विदित्वा तदर्द्धमोर्वी द्विगुणञ्च कुर्यात् तानैर्हृत लब्धि स चाक्षसूत्रं स्पर्शादिमध्यन्त यथाक्रमेण एवन्त्रयो कुर्य स चाक्षसूत्रम् ॥०॥

भूमौ समे बिन्दु लिखे तु मध्ये । व्यासार्द्ध तानांशकतुल्यसूत्रे । लिखेत्समूर्व्यां मुडुमण्डलानि आलिखते मण्डलकं युतार्द्धं चन्द्रार्द्ध लिख्य परिमण्डलानि एवं त्रयो मण्डलकं विदित्वा ॥ तवृत्तमध्येषु स मध्यबिन्दौ पूर्वापरे सूत्र रजेन ताड्यः याम्योत्तरे तीर्यक सूत्र ताड्यं पूर्वाग्ररेखे तु भमण्डले च । स्पर्शाक्षसूत्राणि लिखे यथादिक् पश्चाग्ररेखे तु भमण्डले च मोक्षाक्षसूत्राणि लिखे विपर्यम् ताभ्यान्तु सन्ताडित मध्यबिन्दुम् सूत्रेण यस्मि स्पृशते युतार्द्धे विक्षेप संस्थाप्य दिशो विपर्यं ग्रासादि मोक्षौ च

९७ ख पत्रे

यथानुसारं मध्ये तु विक्षेप विपर्ययेन बिम्बस्य याम्योत्तरं तं निधाप्यं मध्याक्षविक्षेपसमानकाष्टं भमण्डले तीर्यकसूत्ररेखे मध्याक्ष संस्थाप्य लिखे च पूर्वं दिग्भेदयो पश्चिमरेख कुर्यात् मध्याक्षसूत्रस्य विरामचिह्नम् । बिन्दौ तु तां सूत्र रजेत ताड्य तन्मध्यविक्षेप विनिसृत्ययित्वा । तन्मध्यविक्षेपविरामचिह्नं आद्यन्तविक्षेपविक्षेपचिह्नं एवं तृविक्षेपगतं स चिह्ने । तासात्त्रयो सूत्र रजेन ताड्यः तां सूत्ररेखा तमसस्तु पंथा । तमार्द्ध तुल्यानि शलाकिकेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवेशयेद् भ्राम्य यथानुपन्थ ॥ स्पर्शे स विश्या विनिसृत्य मोक्षे
विक्षेपमार्गे तमसा प्रयातं एवम्प्रयातेन रविन्दुबिम्बे
यस्मिं स्पृशे स्पर्श भवेच्च तस्मिं यम् छाद्य संच्छादति तञ्च मध्यं
यस्मिम्विमुक्तञ्च विमोक्ष तस्मिं एवं बि–

९८ क पत्रे

म्बा स्या ग्रहणे च कर्म ॥

सुकृष्णवर्ण्णं यदि मण्डग्रासे आद्यान्तयो तस्य स धूम्रवर्ण्णं
ग्रस्ते तु सर्वे कपिल श तांम्रं विमर्द्ध मध्ये कपिलश्च राहो ॥०॥

अस्य सूत्रस्याङ्क ॥

प्रवर्त्तनाडीप्राणपिण्डं कारयेत् अनेक प्राणेन स्वं स्वं मध्यभोगा प्रगुणा भाग २१६०० फलञ्च पृथक् पृथक् स्थाप्य । तदा अर्द्धरात्रात्परेण पर्वन्तनाडि स्यात् तदा फलञ्चन्द्रार्क्कयोः योजयित्वा । यदि अर्द्धरात्रपर्वन्तनाडी स्यात् तदा फलं चन्द्रार्क्कौ शोध्य एवं योजितम्वा शोधितम्वा चन्द्रार्क्कौ स्फुटङ्कुर्यात् समलिप्त भवति । यदि एवन्न स्यात् तदा तच्च स्फुटचन्द्रकेन । भूय पर्वन्तमानीय तच्च पर्वन्त कुर्या तेन पर्वन्तेन भूय तथैव कुर्यात् याव समलिप्तन्न भवति । तदा समलिप्त चन्द्रार्क्क पात पृथक् पृथक् संस्थाप्य कर्मा कारयेत्

समलिप्तचन्द्रे पातं शो–

९८ ख पत्रे

ध्य तज्या गुण ३० भाग ३८२ फल विक्षेप

स्फुटचन्द्रभोग भाग २४ फल चन्द्रप्रमाण ।
स्फुटार्क्कभोग गुण १०० भाग १८३ फल रविप्रमाण ॥
चन्द्रार्क्कयो स्फुटभोगमिश्रं गुण १०० भाग ७५५ फल तमप्रमाण ॥
इष्टग्रासे भुक्त्यन्तर गुण भाग ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अक्षज्याकर्म्मे गुण १५६१ भाग ३४३८ ॥
अयनांशकर्म्मे गुण १३६८ भाग ३४३८ ॥
अक्षसूत्रस्य व्यासार्द्धस्य च तयोर्भाग ४६ ॥०॥

अपरञ्च प्रवक्ष्यामि
पक्षन्ते रात्रि पर्व स्यात् मास्यान्ते तु दिने यदि ।
पाताञ्च सह चन्द्रार्कौ चैकराशौ प्रवर्त्तते ।
निकठे वाथ जामित्रे ग्रहणञ्चोपलक्षयेत्
ततो चन्द्रस्य पक्षन्ते पूर्णिमास्यान्त साधयेत् ।

मध्यमचन्द्रसूर्यौ तु चन्द्रोचं पातमेव च ।
क्रमेण मध्यमां साध्य प्रयत्नेन स्थिरीकृतं
ततो मध्यमसंसिद्धं स्फुटकर्म्माणि कारयेत् ।
पूर्वस्य विधिना तत्र पर्वान्तं साधये-

९९ क पत्रे

त्क्रमं
स्वं स्वं मध्यमभोगञ्च सर्वप्राणेन संगुणं ।
चक्रलिप्तेन भक्तञ्च स्वं स्वं सूर्यादिमध्यमे
चन्द्राधिके विशोध्यानि चन्द्रे स्वल्पे तु योजयेत्
पातस्य विपरीतेन क्षयक्षेपाणि कारयेत्

स्वोचे स्वमध्यमं सोध्य न शुद्धे मण्डलं क्षिप्तेत् ।
ततो शोध्यावशेषञ्च केन्द्रम्भवति तस्य च ।
ततो केन्द्रभुजं कृत्वा पूर्वदृष्टेन कर्मणा
तृराशौ तद्भुज्य शोध्य तं कोटिज्याभुजज्ययोः
मन्दकर्माणि तौ कृत्वा पूर्वदृष्टेन कर्मणा ।
भानो रूपार्थरामेन ॥३५१। इन्दो पञ्चाद्रिसप्त च ।७७५।
नवसाहस्रकैर्भक्तं ६००० भुजकोटिफलं तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यासार्द्धं कर्क्कटादौ विशोधयेत्
मकरादौ क्षिपेद्वर्गम् ताम्बाहुफलवर्गयो-
र्मिस्रं मूल भवेद् कर्ण्णः ॥ अविशेषानि कारयेत्
तत्कर्ण्णञ्च द्विधा स्थाप्य मन्दवृत्तेन चाहतं
व्यासार्द्धेन विभक्तञ्च कर्ण्णवृत्त्यांशकं भवेत्
तत चांशकलिप्ता च षष्ठिघ्न लिप्त कारयेत्
ततस्तम्मन्दलिप्ता च स्वं स्वं चन्द्रार्क्कयो पृथक्
पुनस्तं भुजकोटिज्या मन्दलिप्तेन संगुणं
भक्तं ऋ शतंघ्नेन ॥५४००००।

९९ ख पत्रे

फलं लिप्तविलिप्तकं

पुन कोटीफल ज्यार्द्ध कर्क्कटादौ विशोधयेत्
मकरादौ क्षिपेद्वर्ग्गं बाहो फलकृति क्षिपेत्
मूलं कर्ण्णं पृथक् स्थाप्य स्वन्दवृत्तया हतम्
व्यासार्द्धेन विभक्तञ्च कर्ण्णवृत्तांशकं भवेत्
एवं पुनः पुनः कृत्वा । यावद् कर्ण्णाचलम्भवेत्

ततो स्थिरेण कर्ण्णेन सर्वकर्म्माणि कारयेत्
भुजज्या घात व्यासेन स्थिरकर्ण्णेन भाजयेत्
यदि मेशादिके केन्द्र फलं योज्य स्वमध्यमे
तुलादिके विशोध्यानि एवं तु सकलं भवेत्

स्वं स्वं मध्यमभोगञ्च व्यासार्द्धेन गुणीकृतम्
तेन विशेषकर्ण्णेन भाजितं स्फुटभुक्तिकं

यदि समकलन्न स्यान्तेन पर्वन्तमानयेत्
तञ्च समकलं पर्वप्राणपिण्डञ्च कारयेत्
स्वं स्वन्तु स्फुटभोगञ्च तम्प्राणेन गुणीकृतम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चक्रलिप्तेन भक्तञ्च फल लिप्तविलिप्तकम्
चन्द्राधिके विशोध्यानि चन्द्र स्वल्पन्नियोजयेत्
चन्द्रार्क्क समलिप्तञ्च । एवन्तु निश्चितं भवेत्

चन्द्रभू खाङ्कस्वादञ्च ६९०॥ सूर्यभू वसुतत्व च २५८
भूच्छेदं खाद्रिरामञ्च ३७०॥ एते ज्यार्द्धेन संगुणं
स्थिरकर्ण्णेन भक्तञ्च स्फुटम्भवति त-

१०० क पत्रे

स्त्रयं
तेन कर्मञ्च कर्त्तव्यं प्रमानञ्चन्द्रमादिकं

चन्द्रभू मूर्च्छनैर्भक्तम् लब्धं चन्द्रप्रमानत भाग २१
सूर्यभू चाष्टभिर्भक्तं सूर्यमानं भवे ततः भाग ८॥
क्वग्निञ्च शशिमानञ्च विवरं कारयेत्तयोः ॥३१॥
तशेष योज्य सप्तक १७॥ सूर्यमाने तु भं युतं
वेदघ्ने चन्द्रमाने तु । शु ४॥ तञ्च शोध्यन्तमम्भवेत् ॥

पाते चन्द्र विशोध्यानि न शुद्धे मण्डले क्षिपेत्
षड्राश्योत्तरयामञ्च षद्राश्यूने चोत्तरम्
तं ज्या घातं स्वविक्षेपैः व्यासार्द्धेन विभाजयेत् ॥
गुण २७० भाग ३४३८
फलञ्चन्द्रस्य विक्षेपं दिशं ज्ञात्वा तु स्थापयेत्

शशांक तम संयोज्य दलं कृत्वा युतार्द्धकं
तुल्य विक्षेप योगार्द्धं ग्रहणन्न च दृश्यते
विक्षेपमान स्वल्पञ्च तदा ग्रहणं भवेत्
योगार्द्धे शोध्य विक्षेप शेष ग्रासं भवे तत
चन्द्रे विशोधयेद् ग्रासं शेष शुक्लाङ्गुलं भवेत्
ग्रास बहुतरं यच्च विपरीतेन शोधयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न दृश्यते शशांकञ्च सर्वग्रासेन च्छादितं
तमसि चन्द्रमानोनं दल कृत्वा विमर्दकं
योगार्द्धञ्च विमर्द्दञ्च विलिप्तावर्ग कारयेत्
विलिप्तवर्ग विक्षेपं द्विधा कृत्वा तु स्थापयेत्
योगार्द्धवर्गे तं शोध्य शेषमूलं च मा-

१०० ख पत्रे

नयेत्
विमर्द्दवर्गे मेकोणां तथैव मूलमानयेत्
खार्तुरामेन तद्धात भूच्छेदेन विभाजयेत्
गुण ३६०॥ भाग च्छेदेन
स्थित्यर्द्धस्य विमर्द्दस्य प्राणं भवति तस्य च ।
ततो स्थित्यर्द्ध प्राणेन स्वं स्वं भोगञ्च संगुणं
चक्रलिप्तेन भक्तञ्च स्थित्यर्द्धस्य फलं भवेत्
फलोनं समलिप्तेन्दौ स्पर्शचन्द्रं भवेन्ति सः
योज्य समकले चन्द्रे मोक्षचन्द्र विजानयेत् ॥
सूर्ये तथैव कृत्वा तु । पाते चैव विपर्ययेत्
त्रैराश्यां स्पर्शमध्यान्तं स्थापयित्वा दनुक्रमं ।
स्पर्श पाते विशोध्यानि संस्पर्शरजनीकरम्
विक्षेपं पूर्ववत्कृत्वा दिशं ज्ञात्वा तथैव च ।
मोक्षपातेन्दुना मोक्षं विक्षेपं साधयेत्क्रमं
एवं ग्रासादिमध्यान्तं विक्षेपं त्रयमेव च
विलिप्तावर्ग कृत्वा तु विक्षेपौ स्पर्शमोक्षिकौ ॥
द्विस्थे योगार्द्धवर्गे च संशोध्य मूलमानयेत्
तयो मूलाघ्न चक्राशैः गुण ३५०॥ भूच्छेदेन विभाजयेत्
स्थित्यर्द्धासु भवेत्तत्र स्पर्शमोक्ष क्रमेन तु
विमर्द्दस्पर्शमोक्षौ च तथैव कारयेत् बुधैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विमर्द्धादि विमर्द्धान्तं प्राणां भवति तस्य च ॥
स्थित्यर्द्धे मिष्टनाड्यूनम्

१०१ क पत्रे

शेष भुक्तन्तरैर्बुद्धं
खाङ्गैर्भक्त फलं वर्ग विक्षेपवर्गयोजितं
तं मूलं शोध्य योगार्द्धे इष्टग्रास भवेन्ति सः ।

प्रर्वन्तं प्राणपिण्डघ्नं तृधा संस्थाप्ययेत्क्रमं ॥
अर्द्धरात्र्यात्परे पर्वे स्पशे स्थित्यर्द्ध शोधयेत्
मोक्षे नियोजयेत्तत्र । एवं प्रत्यायचासवः ॥
यदि रात्यर्द्धपूर्वे तु विपरीतयुतक्षयं
मध्येनैव क्षयक्षेपं प्रत्याय त्रयमेव च ॥
विमर्द्ध तत्र पर्वान्ते तथैव क्षय क्षेपयेत्
आदै निमीलनं विद्या वान्ते मुन्मीलनं भवेत्
ततो राद्यान्तवेलायां तमासा च्छादते शशि
उन्मीलना च माने च किञ्चि बिम्बं तु दृश्यते

क्रमेण स्पर्शमध्यान्त प्रात्यायासवः स्थापयेत्
खखतीर्थेन तं भक्तं १८०० लब्धं राश्यादय क्रमम्
शेष त्रिंशङ्गुण कृत्वा तेनैवाप्तान्तु रंशकां ॥
षष्ठिघ्न भाज्य लिप्ता च स्थाप्य लग्न क्रमेन तु
तत्तृराशौ विशोध्यानि न शुद्धे प्रतिशोधयेत्
जीवा तु मानयेत्तत्र तं ज्यार्द्धे तु विशोधयेत्
प्रतिशोधितजीवा तु व्यासार्द्धे तु विमिश्रयेत्
स्वाक्षज्याया तञ्च तञ्च व्यासार्द्धेन विभाजयेत्
चापं कृत्वा क्रमतञ्च ह्यक्षज्याया भवेत्तत ॥
यदि पर्वार्द्धरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्र्यूने अक्षज्या दक्षिणं भवेत्
अर्द्धरात्र्यात्परे पर्व्वे अक्षज्या चोत्तरं भवेत्

संस्पर्श मध्य मोक्षञ्च चन्द्र राशित्त्रयं हरेत्
षद्राश्यूने दिशि सौम्या षद्रास्याधिकं दक्षिणम्
क्रान्तिज्यामानयेत्तञ्च तं क्रन्ति चापये क्रमं

अक्षज्या क्रन्तिजीवा च दिग्समे तु विमिश्रयेत्
दिग्भेदे विवरं कृत्वा दलं जीवा तु मानयेत्
द्विघ्नं कृत्वा तु तां जीवा स्वाक्षस्य वलनं भवेत्
तञ्च तानेन भक्तञ्च दिशं ज्ञात्वा तु स्थापयेत्
तानेन हृत ज्यार्द्धञ्च फल व्यासार्द्धमण्डलम् ॥०॥

परिलेखम्प्रवक्ष्यामि येन बिम्ब स्फुटं भवेत्
समे मूर्व्व्यं लिखे बिन्दु विदित्वा मध्य सर्वतः
बिम्बार्द्धवृतमानख्य बिन्दुमध्य कृत स च ।
संपर्कार्द्ध तथा लिख्य व्यासार्द्धञ्च तथैव च ॥
त्रयाणाम्वृत्तमध्येषु प्राक् पश्चात् सूत्र ताडयेत्
पार्श्वेनोभयतो मत्सौ कारये द्वौ प्रयत्नत ॥
तत्पुञ्छमध्यतो रेखा ताडये दक्षिणोत्तरम्
स्पर्शकर्मञ्च पूर्व्वेण मोक्षकर्मञ्च पश्चिमे
व्यासार्द्धे पूर्वरेखाग्रे स्पर्शाक्षञ्च विपर्ययेत्
ज्यार्द्धं पश्चिमरेखाग्रे मोक्षाक्षञ्च यथादिशम्
स्पर्शमोक्षासूत्रन्ते मध्यबिन्दुञ्च ताडये-

त्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्रेखेन स्पृशे यस्मिं सम्पकार्द्धस्य मण्डले
तच्चिह्ने स्थाप्य विक्षेपौ नयेत्सूत्र यथादिशम्
तयो विक्षेपयोरान्ते चिह्नयेत् स्वानि स्वानि तु ।
मध्यकर्म ततो कृत्वा विक्षेपस्य वशेन तु
यदि दक्षिणविक्षेपं बिम्बस्य दक्षिणे तत ।
सौम्यविक्षेप सौम्येन कर्त्तव्य मध्यकर्मणि
दक्षिणोत्तररेखाग्रे दुव्यासार्द्धस्य मण्डले
दिग्भेदेऽप्यविक्षेप ततो नीत्वा तु पश्चिमं
दिग्समे पूर्वरेखञ्च तस्यान्ते तु विचिंह्नयेत्
तच्चिह्नन्ताडयेद् बिन्दुम् सूत्रेण सुप्रयत्नतः
तद्रेखानुगतीकृत्य विक्षेप स्वदिशं नये-
त्तस्यान्ते चिंह्नयेत्तत्र विक्षेपानान्तृबिन्दुकम्
ते पथेन प्रविष्यति तमस चन्द्रमण्डले
तमार्द्धतुल्यमानञ्च शलाकं वृत्त भामयेत्
स्पर्शमार्गानुसारेण तमच्छायादते शशि ।
यस्मिं ह्यादौ स्पृशेद् बिम्बे तस्मिं स्पर्शम्विजानयेत्
छाद्यमानं यतो च्छाद्य तस्मिम्मध्यम्विजानयेत्
निष्क्रान्ता तमशं यस्मिं तस्मिं मोक्षं विजानयेत्
अथवा मध्यविक्षेपं तस्यान्ते यम्विचिन्तयेत्
तस्मिं स्थाप्य तमार्द्धञ्च मण्डलम्परिभ्रामयेत्
तेन यत्र प्रच्छादन्ति

१०२ ख पत्रे

तत्र कृष्णं विजानयेत्
इति ॥

खण्डग्रासे भवे कृष्णं सर्वग्रासे तु पिङ्गलं
आद्यन्ते वर्णधूम्रञ्च विमर्द्दे कपिलं भवेत् ॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतः परम्प्रवक्ष्यामि चन्द्रोपरागनिर्णयम्
यद्यैकमासन्न स्वसप्तमे वा विनिश्चयं ग्रहण रविन्दोः
चन्द्रार्क्कपातञ्च शशाङ्कमुच्यम् तम्मध्यमं पूर्णिमम चार्द्धरात्रौ
प्रसाध्ययित्वा निपुने तञ्च स्फुटन्तु चन्द्रार्क्क सुनिश्चयेन ।
संसाधयित्वा स्फुटभुक्तिका च पूर्वैव कर्मेण तिथिम्प्रकुर्यात्
पर्व्वन्तमानीय तथैव पूर्वं तम्पर्वनाडीमसुना प्रगुण्य
तेन प्रगुण्य स्फुटभुक्ति स्वं स्वं भक्तन्तु शून्याभ्ररसैकनेत्रैः ।
भाग २१६००॥

स्वं स्वं फलं चन्द्रनिशारिपाते । यद्यर्द्धरात्र्यात्परतो नियुक्तं
रात्र्यर्द्धपूर्वे क्षय चन्द्रभान्वोः पाते । स्वभक्तथा विपरीतकर्मम्
तात्कालिकौ मध्यमचन्द्रसूर्यौ ।

स्फुटेन्दुभुक्तिर्गुणितं खवेदैः रूपार्तुकूपैर्विभजेन्दुमानं
गुण ४० भाग ६६१॥

स्फुटार्क्कभुक्तिर्हत शून्यमालैः लोकाद्रिभिर्भाज्य फलार्कमानं
गुण ४० भाग ७३॥

शून्या-

१०३ क पत्रे

भ्ररूपैर्हत चन्द्रभुक्तिं सूर्यस्य भोग वध खाभ्ररामैः
तौ चन्तरं त्र्यर्त्तुशिलैर्विभक्तथा तमप्रमान स भवे ततस्तु ।

चन्द्रभुक्ति गुण १०० । सूर्यभुक्ति गुण ३०० तौ चन्तर भाग ७६३॥

संशोध्य पातं समलिप्तचन्द्रादसंभवे द्वादशराशियुक्तं
षड्राशिहीने दिशि उत्तरः स्यात् । यदा तु षड्राश्यधिके तु याम्यः
पातोनचन्द्रोत्तरदक्षिणज्यां त्रिंशङ्गुणं दस्रवसुत्रिभक्तं
लिप्ता विलिप्ता च लिखेद्यथादिक् विक्षेप एषोर्क यथा हिमांशोः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुण ३० भाग ३८२ ॥

चन्द्रप्रमाणा तु तमःप्रमाणं सम्पर्कभेदात्परिशोधनीयं
विक्षेपलिप्ताः परिशोध्य शेषम् सा ग्रासलिप्ता ग्रहणं तदास्ति ।
तन्मध्यविक्षेपकला यदि स्यात् प्रमाणसम्पर्कदलेन तुल्या
अस्तित्वमेवं तमसो न दृष्टि नैवास्ति विक्षेपकलाधिकाथ ।

ग्रासप्रमाणञ्च शशिप्रमाणे सोध्यावशेषं शशिशुक्लवर्णम् ।

तस्मिन्नशुद्धे विपरीतशुद्धम् ग्रासास्तु निःशेषशशि न दृष्टिः

संपर्कभेदस्य विलिप्तवर्गात् तत्कालविक्षे-

१०३ ख पत्रे

पविलिप्तवर्गं

सशोध्य मूलं विकला स्थितार्धा भुक्त्यन्तराप्ता घटिका स्थितार्धाः ॥

तमध्यमार्धस्थितिनालिकाभिः प्राणीकृताभिः गुणितं स्वभुक्ति
षष्ठी घटी प्राणकृताभिराप्ता । लिप्ता विलिप्ता स्फुटचन्द्रभुक्ति
लिप्तासु जह्यात्समलिप्तचन्द्रे । संस्पर्शचन्द्रे भवितार्थपूर्वे
एकत्र दद्यात्समलिप्तचन्द्रे स मोक्षचन्द्रो भवतीति पश्चात्
पाते स्वभुक्त्या विपरीत्य तद्वम् पृथक् पृथक् स्पर्शविमोक्षकर्मा ।
विक्षेपमानीय यथादिशन्तम् स्थित्यर्द्धनाडीञ्च पुनः प्रकुर्यात्
तात्कालवृत्यर्द्धघटी स्वभुक्त्या त्रैराशिकं स्यात्समलिप्तचन्द्रात्
स्पर्शस्य कर्म्मण्यपनीय नित्यम् मोक्षस्य कर्म्मण्यधिकं न पाते ।
भूच्छायचन्द्राहुयुतार्द्धवर्गात् जह्या स्वविक्षेपकृतिं हि मूलं
वृत्यर्द्धमानीय विधी तु नाड्या पुनर्नयेत्प्रागपरा विशेषम् ॥
चन्द्रस्तमश्चाङ्गहितार्द्धवर्गात् तत्मध्यविक्षेपकृतिं विशोध्य ।
मूलं तिथी चार्द्ध विमर्द्दमध्य स्थित्यर्द्धव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१०४ क पत्रे

चार्द्धविमर्द्दनाडी

तद्भोगमिन्दोस्समलिप्तचन्द्रे । हित्वा विमर्द्दादिगतः स चन्द्रः
तामेव दत्वा समलिप्तचन्द्रे । सोन्ते विमर्द्दस्य भविष्यतीन्दुः
तात्कालपात व्यपनीय ताभ्याम् तात्कालविक्षेपकृतिं विहाय
तमःशशिव्यासदिनार्द्धवर्गात् मूलं तिथी चार्द्धविमर्द्दनाडी
विमर्द्दकालावधिवेदनार्थं वैमर्द्दिकीनस्थितिवेदनार्थं
स्थित्यर्द्धवत्ताम्पुनरेव कुर्यात् स्थिरीकृताश्चाद्यवसानयोस्ते ॥

ग्रासादिमध्यान्तनिशांकरेषु क्रमेण राशित्रयसंयुतेषु
षट्भूत्तरः षट्खपरेष्वयाम्यः भागोयनानामिति लक्षयित्वा
कष्ठेन हत्वात्परमेण तज्यम् विभज्य विष्कम्भदलेन भागः
लब्धस्य चापं पुनरेव षष्ठ्या विभज्य लब्धा क्रमशो यथाङ्शाः

पर्वन्तनाडी च निशार्द्धपूर्वे । स्थित्यर्द्ध पर्वन्त युतं तु स्पर्शं
स्थित्यर्द्ध पर्वं विवरञ्च मोक्षं यद्यार्द्धरात्र्यात्परतोपि पर्वे
व्यस्तं क्षयं क्षेप तथैव कुर्या युक्तम्वियुक्तन्नवमध्यपर्वे
प्रागर्द्ध रात्र्यात्परतोपि चन्द्रे । मध्याह्नतः प्राक्परतोपि

१०४ ख पत्रे

सूर्य ।

संस्पर्शमध्यग्रहणान्तकालाः प्रत्यायिकाया इह नाडिकाः स्युः

प्राणीकृता सून्यखवेदमाणा । तयोर्विशोध्यन्तरमस्य पौर्वी
प्राणाधिके व्यासदले नियोज्या । प्राणा विहीने तु विशोध्यमाहुः
एवं भवत्युत्क्रमशिंजनी सा स्वाक्षज्याहत्य यथाक्रमेण
व्यासार्द्धभक्तः कृतचापलिप्ताः षष्ठ्याक्षभागास्त्रय एव लब्धाः
सौम्योक्षभागः प्रथमे दिनार्द्धे । याम्योपराह्णे शशिसूर्ययोः स्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अक्षयनांशौ विवरं दिगत्ये स्याच्छेषदिग्योज्या सम यथादिक् ।
तदर्द्ध मौर्वी द्विगुणञ्च षष्ट्या हृत्वाक्षसूत्राणि भवन्ति तद्दिक्

व्यासार्द्ध षष्ट्यांशकतुल्यसूत्रे ॥ लिखेत्समोव्यामुनुमण्डलानि
आलिख्य सम्पर्कदलेन मध्ये । चन्द्राङ्गमध्येन तु मण्डलञ्च
पूर्वापरे सूत्ररजोव ताड्य । मत्स्यो तयो उत्तरयाम्यसूत्रम्
पूर्वाग्ररेखादुतुमण्डले तु । स्पर्शाक्षसूत्रेण लिखेद्यथादिक्
पश्चान्तरेखादुतुमण्डले च । मोक्षाक्षसूत्रेण च दिग्विपर्याः
आद्यन्तविक्षेपकलाप्रमाणम् । दि-

१०५ क पत्रे

ग्वैपरीत्येन नयेच्च सूत्रम्
स्वाक्षस्य चाग्रात्परिधौ च चिह्ने विक्षेपचिह्नाच्छशिमध्यबिन्दुं
यावन्ननयैत्तत्परिधौ च चिह्नं स्वस्पर्शश्च मोक्षश्च हि तौ भवेता
ताभ्यान्तु मत्स्यौ परिकल्प्य सूत्रं प्रच्छादयेत्पुंच्छमुखानुयातं
तत्सूत्ररेखानुगतश्च कार्योः यो मध्यविक्षेपदिशो विपर्या ।
विक्षेपचिह्नाच्छशिमध्यचिह्नं । कृत्वा त्रिविक्षेपगतञ्च सूत्रम्
तेन प्रदृष्टस्तमसस्तु पन्थाः तच्छाद्यसपकदलान्तरस्य
तुल्येन सूत्रेण तु मण्डलानि कुर्वन्नयेत्तेत यथाक्रमेण

छाद्यस्य वर्णो सित एव खण्डे । आद्यन्तकालेषु भवेच्च धौम्रः
ग्रस्ते तु सर्वे कपिलस्सताचः विमर्द्दमध्ये कपिलस्तदानी ॥०॥

चन्द्रोपरागं सितपञ्चदश्यां कृत्वान्ततो मध्यममर्द्धरात्रौ
तञ्चन्द्रसूर्यस्फुटकर्म्म कुर्या । चन्द्रार्कपातं स्फुटभुक्तिका च ॥
पर्वन्तमानीय यथाविधानं प्राणैर्वधम्पर्विकनाडिकेन
चन्द्रादिकम्मध्यमभुक्तिघातम् विभाजयित्वा खखाष्टिदस्रैः
भाग २१६०० ।
निशार्द्धपूर्वे यदि पर्वनाड्यां स्वमध्यमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१०५ ख पत्रे

स्वफल शोधयित्वा ।
परे निशार्द्धे तु नियोजये तु पाते स्वभुक्त्या विपरीत तद्वत्
प्रसाध्य तात्कालिकमध्यमेन ॥

द्विस्थे स्वमन्दोच्च विशोध्य केन्द्रं भुजं त्रिराशौ परिशोध्य कोटी ।
पृथक् पृथक् स्थाप्य ततस्तयोर्ज्याम्मन्दोच्चवृत्तेन हतन्तयो ज्याम् ॥
इन्द्रोर्कुलोकै कृतरूप भानोः ॥ गुण ३१ गुण १४ ॥
चक्रांशकेन प्रविभज्य लब्धं । भाग ३६०॥
भुजश्च कौटौश्च फलं भवेताम् केन्द्रो यदा कर्कटादिकः स्यात्
ज्यार्द्धे तु तात्कोटिफलम्विशोध्य ॥ नियोजयित्वाम्मकरादिकेन्द्रे
वर्गं क्षिपेत् बाहुफलस्य वर्गम् तं मूलमानीय भवेत्तु कर्ण्णम्
बाहोः फलं व्यासदलेन हत्वा कर्ण्णेन भक्तं फलमस्य चापं
स्वमध्यमे केन्द्रवशात् स्फुटा स्युः ॥

ज्यार्द्धेन माहत्य तु मध्यभुक्त्या ॥ कर्ण्णेन वाप्तं स्फुटया स्वभुक्त्या ।

चन्द्रस्य कक्षं खशिलाष्टषट्कं कक्षा ६८७० ॥
सूर्यस्य कक्षं मुखरन्द्रनेत्रं कक्ष २९१ ॥
इन्द्रोर्क्ककक्षञ्च यमार्तुशक्रं कक्ष १४६२ ॥

घातं पृथक् व्यासदलेन सर्वं कर्ण्णेन भक्तं स्फुटकक्षमेवां
तं चन्द्रकक्षं हृत गोख-

१०६ क पत्रे

नेत्रैः तं लब्ध चन्द्रस्य तनुप्रमानं
तं लब्ध चन्द्रस्य तनुप्रमानं भाग २०९ ॥

सूर्यस्य कक्षं विभजेत्तु रंध्रैः ।
लब्धं दिनेशस्य तनुप्रमानं भाग ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्योमाभ्रनागैर्हत चन्द्रमाने । खसप्तरूपैर्वध सूर्यमानं संशोध्य कोशाष्टमुखैर्विभक्तं चन्द्रप्रमाणेन त्रिशोध्य शेष सूर्यतमप्रमाणम् स भवेत्ततस्तु ॥

चन्द्र गुण ८०० ॥ रवि गुण १७० । चन्द्रे शोध्य भाग १८६ फल तमप्रमाणं भवति ॥

द्विघ्नेन्दुना शोध्य तमप्रमाने विमर्द्दमानञ्च ततो विदित्वा ।

संशोध्य पातं समलिप्तसूर्ये । अविद्यमाने यदि मण्डलोप्यं मेषादि याम्या च तुलादि सौम्यां दिक् ज्ञात्वमेवन्तु ततस्तु जीवा । खाङ्कैर्हतं त्र्यद्रिशरैर्विभक्ता । चन्द्रस्य विक्षेप तनुप्रमाणं गुण ६० भाग ५७३ ॥

विक्षेप संशोध्य तमप्रमाने । सोध्यावशेषार्द्ध भवेत्तु ग्रासं ग्रासप्रमानञ्च शशिप्रमाणमूनाधिकं स्यादुपलक्षणीयं

तमप्रमानञ्च विलिप्तवर्गे

१०६ ख पत्रे

तात्कालविक्षेपविलिप्तवर्ग

संशोध्य शषेण पदञ्च कुर्यात् इन्द्रोर्क्कर्कक्षेन विभक्त लब्धं स्थित्यर्द्धनाडी स भवे-

त्ततस्तु स्थित्यर्द्ध प्राणेन हतं स्वभोगा षष्ठिघटी प्राणकृतैर्विभक्ता स्थित्यर्द्धभोगञ्च निशाकरस्य संशोधयित्वा समलिप्तसूर्ये । संस्पर्शसूर्यञ्च ततो विदित्वा तमेव दत्वा समलिप्तसूर्ये विमोक्षसूर्ये स भवेत्ततस्तु पाते क्षयं क्षेपविपर्ययेन संस्पर्शसूर्ये ग्रहणादिपातं मोक्षे विमोक्षेण विशोधयित्वा । विक्षेपमानीयः यथैव पूर्वं स्थित्यर्द्धनाडी च पुन प्रकुर्यात् यावञ्च कुर्यादविशेषभावं विमर्द्दमानञ्च विलिप्तवर्गे ॥ तात्कालविक्षेपविलिप्तवर्ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संशोध्य शेषेन पदञ्च कुर्या । इन्दोर्क्कक्षैर्विभजे विमर्द्दं
स्थित्यर्द्धभोगैव विमर्द्द भोगं संस्पर्शमोक्षञ्च तथैव कुर्यात्

यद्यर्द्धरात्र्यात्परेपि पर्वस्थित्यर्द्ध पार्वान्तरशेषस्पर्शं ।
नियोजयित्वान्तु

१०७ क पत्रे

विमोक्षनाडी निशार्द्ध पूर्वे तु विपर्ययेन
प्रत्यानाडी शशिसूर्ययो स्या ॥ तथैव कुर्यात्तु विमर्द्दनाडी
निमीलनोत्मीलनकालमाहु ॥

स्थित्यर्द्धके शोधित मिष्टनाडी शेषाञ्च भुक्तयन्तरया निहत्य ।
त्रिंशैर्विभक्त फलमस्य वर्गम् विक्षेपवर्ग सह योज्य मूलं
तन्मूल संशोध्य युतार्द्धमाने शेषाञ्च ग्रासेष्ट भवे रविन्द्वोः

प्रत्यायप्राणघ्न खखार्थवेदे विश्लेषं ज्या तु यथाक्रमेण ।
प्रत्यायहीने तु विशोध्य ज्यार्द्धे । प्रत्यायनाडी रधिके नियोज्यं
अक्षज्यायाहत्य यथाक्रमेण ज्यार्द्धेन भक्तं फलमस्य चापं
अक्षांशकज्य स भवेत्ततस्तु ।

स्पर्शादिमध्यन्तदिवाकरेषु । संस्पर्शा मध्ये त्रयराशि शोध्या ।
मोक्षेपि युक्तानि दिश विदित्वा मेषादि सोम्या च तुलादि याम्यां
ज्यामानये भिन्न गुणाग्नियमैः ॥ लोकाद्रिबानै हृत लब्धिचापं
स्पर्शादिमध्यन्त स चायण्यंशाम्

गुण २३३ भाग ५७३ फल चाप ।

अक्षायनांसं ग्रहनादिमध्यं तयोर्यदा चैकदिवशे नियोज्या ।

१०७ ख पत्रे

अन्यत्र काष्टे विवरं च कुर्या । यस्याधिकन्तस्य दिशि विदित्वा
मोक्षेपि चाक्षायणयोर्यदि स्यात् योज्यन्तु दिग्भेद समे विशोध्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदर्द्ध जीवा द्विगुणञ्च कुर्यात् जिनैर्विभक्तञ्च स चाक्षसूत्रं ।

दुव्यासकं वेदकरैर्विभक्तं लिखेत्समूव्यां सितबिन्दुमेकं
आलिख्य चन्द्रस्य तु मानवृत्तं । तमप्रमानं परिलिख्य वृत्तं ।
दुव्यासबिम्बम्परिलिख्य भूय । तासात्त्रयो मध्यसबिम्दुमध्ये ।
पूर्वापरे सूत्र रजेन ताड्य । सत्ताडये दक्षिण चोत्तरञ्च
दुव्यास पूर्वापररेख चाग्रे आद्यन्तसूत्रञ्च लिखे यथादिग् ।
तौ सूत्र चान्ते स मध्यबिन्दुं सत्ताडयेत्सूत्र रजेन तस्मिम् ।
यस्मि स्पृशे सूत्र तमश्च बिम्बे विक्षेपयो स्थाप्य यथादिशान्तम्
तम्मध्यविक्षेपवशेन मध्यम् बिम्बस्य याम्योतरतम्प्रकुर्यात्
मध्याक्षविक्षेपसमानकाष्टं दुव्यास याम्यो-

१०८ क पत्रे

तररेख चाग्रे
मध्याक्ष संस्थाप्य लिखे च पूर्व्वं दिग्भेदे यो पश्चिमरेख कुर्यात्
मध्याक्षसूत्रस्य विरामचिह्ने । बिन्दो तु तं सूत्र रजेन ताड्यः ।
विक्षेपबिन्दो विनिसृत्ययित्वा तम्मध्यविक्षेपविरामचिह्नं
आद्यन्तविक्षेपविरामचिह्नं एवन्तृविक्षेपगत स चिह्ने ।
तासत्त्रयो सूत्र रजेन ताड्य तमश्च चन्द्रश्च यदन्तरं च
तमानतुल्यानि शलाकिकेन । प्रवेशये भ्राम्य यथानुपन्था ।
स्पर्शे प्रविश्ये विनिसृत्त मोक्षे ॥०॥

पूर्णिणमास्यान्तवेलाया चन्द्रादित्योच्यसेंघिकं
मध्यमं कारयेत्तत्र स्फुटं कृत्वा यथाविधिं
पर्वान्तमानयेत्तत्र समलिप्तानि कारयेत्
पर्वन्तफल चन्द्रार्कौ गतेस्यौ शोध्य योजयेत्
एवन्तात्कालिका यच्च सर्वकर्माणि कारयेत्

आदिज्या पञ्चरुद्रघ्नं चन्द्रस्य त्वंतज्या ॥
तस्मिं कर्कटाधिके योज्य मकरादौ विशोधयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुदस्त्रैर्भागलब्धञ्च प्रमानाञ्च निगायते
सूर्यस्य भद्रघ्नन्तथैवान्तज्याया कृतम् ।
भद्रवेदै हृत लब्धं सूर्यमानं भवेत्तत ॥
चन्द्रमानं खखा–

१०८ ख पत्रे

घ्नं । सूर्य नखाश्विभिर्हतं
तयोरन्तरशेषाञ्च पञ्चाब्धिशिखिभिर्हतं
लब्धं योगार्द्धमानञ्च चन्द्र शोध्या विमर्द्दकं ।

पातं विशोधये चन्द्रे अभावे मण्डल क्षिपेत्
मेषादौ दिग्सोम्यं तुलादौ दक्षिणं भवेत् ॥
तं ज्या खार्थेनं गुण्य कोषलोकार्तुभिर्हतं
विक्षेपं भवेत्तोत्तत्र प्रतिराशिं च स्थापयेत्

योगार्द्धं सोधयेदेकं । ग्रासं भवति तस्य च ।

वर्गं योगार्द्धं विक्षेपौ योगार्द्धे तु विशोधयेत्
शेषमूलञ्च मानीय षष्ठिभिः संगुणीकृतं
भुक्तयन्तरहृते लब्धि स्थित्यर्द्धं नाडिकं भवेत्
विमर्द्दनाडी तथैवञ्च वर्गविक्षेपशोधिकं

स्थित्यर्द्धं षष्ठिभि गुणा विकलं योज्य स्थापयेत्
तेन घात स्वभोगञ्च खखरसाग्निना ।
शोध्य स्पर्श युतं मोक्ष पातेश्चैव विपर्ययेत्
विमर्द्देन तथैवञ्च आदौ शो–

१०९ क पत्रे

ध्यान्त योजयेत्
स्पर्शविक्षेपकर्मञ्च चन्द्र विशोधयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोक्षे मोक्षपातेन शोध्यं विक्षेप कारयेत् ।
विमर्द्दादि विमर्द्दान्तम् स्व स्वं विक्षेपमानयेत्
स्थित्यर्द्ध नाडीराद्यान्ता विमर्द्द श्च तथैव च
पूर्वदृष्टेन कर्त्तव्यं इष्टग्रासश्च पूर्ववत्

अर्द्ध रात्र्यात्परे पर्वे स्पर्शस्थित्यर्द्ध शोधयेत्
मोक्षे नियोजयेत्तत्र प्राक्परे तु विपर्ययेत्
एवम्प्रत्यायनाडी च । स्पर्शमध्यन्तमेव च

तम्प्राणाश्च ऋले शोध्य ज्यामानीय क्रमेण तु ।
तं ज्या संशोध्य मासार्द्धे प्रात्यायाधिक योजयेत्
लोकदस्राश्विभि घातं ॥ रूपतानैर्विभाजयेत्
लब्धं क्रमेन चापन्तु । अक्षज्याया भवेत्क्रमं ।
प्राक् निशार्द्धे तु प्रात्यायां अक्षज्या चोत्तरं भवेत्
अपरे दक्षिणं विद्या दिशं चैवोपलक्षयेत्

स्पर्शमध्यान्तचन्द्राश्च । लिप्तापिण्डश्च कारयेत्
ऋले शोध्य सलिप्तश्च क्रन्तिजीवानुमानयेत्
चापं कृत्वा तु तल्लब्धं क्रन्तिजीवा भवेत्तत ।
कर्क्कटादौ दक्षिणं विद्या । मकरादौ तु चोत्तरं

१०९ ख पत्रे

अक्षज्या क्रन्तिजीवा च दिग्भेदे तु विशोधयेत्
दिग्समे मिश्रयित्वा तु दलितं जीवमानयेत्
तं ज्यायाः द्विगुणं कृत्वा आदिमध्यन्त यथाक्रमं
संपकार्द्धेन संगुण्य व्यासार्द्धेन विभाजयेत्
क्रमेन मादिमध्यान्त स्थापयित्वाक्षसूत्रकं

अक्षसूत्रश्च विक्षेप दिक्समे तु नियोजयेत्
दिग्भेदे विवरं कृत्वा दिशं यस्यादिकं भवेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वं दिश स्थापयित्वा तु परिलेख तत्र कारयेत् ।
समे मूर्व्या लिखे बिन्दु । चन्द्रार्द्धधृतमालिखेत्
सम्पर्कार्द्ध ततो पश्चात्प्रमाणं वृतमालिखेत्
ततो बिम्बस्य मध्ये तु प्राक्पूर्व सूत्र ताडयेच्च
दक्षिणोत्तरदिक्सूत्रं तन्मध्ये भू ताडयेत्
योर्गध्र्ध पूर्व्वरेखाग्रे स्पर्शसूत्रं यथादिशं
पश्चिमस्य च रेखाग्रे मोक्षसूत्रं विपर्ययेत्
तयोः सूत्र तयो चिह्ने मत्सपुंच्छञ्च कारयेत्
विक्षेपस्य विपर्यन्तम्म-

११० कपत्रे

पुच्छानि ताडयेत्
मत्सपुंच्छेन मध्यञ्च ताडयेत्सुप्रयत्नत
मध्यबिन्दो विनिष्क्रान्ता तद्रेखानुगतीकृतम् ।
सम्पर्कार्द्धस्य चन्द्रस्य चान्त यत्र विद्यते
तन्मानानि शालाकाञ्च स्पर्शाद्या च प्रवेशयेत्
आदौ यस्मिं स्पृशे स्पर्श । च्छाद्यच्छाद्यञ्च मध्यत ।
यस्मिन्निर्गच्छते मोक्ष तमश्च स्तृविधा गति ॥०॥

अस्य सूत्रस्याङ्क ॥

आदिज्या गुण ११५ । चन्द्रान्तज्या गुण १० ॥ भाग २१ फल शशिप्रमाणं भवति ॥

आदिज्या गुण २५८ सूर्यन्तज्या गुण १० भाग ४८ फल सूर्य-प्रमानं भवति ॥

चन्द्रप्रमाण गुण ८०० । सूर्यप्रमाण गुण २२० अन्तर शेष भाग ३४५ । फल योगार्द्ध मानम्भवति ।

चन्द्रे पात विशोध्य तज्या गुण ५० भाग ६३६ फल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विक्षेपं भवति ॥०॥

पूर्णिमास्यान्तवेलायां चन्द्रादित्योच्चसैङ्गिकं
अर्द्ध रात्रिक सर्वेषां मध्यमं सा-

११० ख पत्रे

धयेत्ततः ॥
स्फुटं कृत्वा तु चन्द्रार्कौ स्फुटभुक्तिञ्च कारयेत्
तिथिञ्च कारयेत्तत्र पर्वान्ते निपुनीकृतं
स्व स्वं तु स्फुटभोगञ्च पर्वान्तेन गुणीकृतं ॥
षष्टिभिर्भक्त लब्धञ्च स्वम् स्वं तु स्फुटमध्यमे ।
गते शोध्या गते योज्यः समलिप्तञ्च ततो भवेत्

स्फुटेन्दुभुक्ति त्रिघ्नञ्च द्वयद्रिभिच्छेदितं शशिः ॥

स्फुटार्कभोग रुद्रघ्नं नखैर्भक्तं फलं रविः

सूर्यभोग खतत्वघ्नं खाष्टघ्न शशिभुक्तिके ॥
शोध्यं भक्त द्विशून्याङ्गैः तमतुङ्गं भवेत्ततः ॥

पाते विशोधयेच्चन्द्रं । अभावे मण्डलं क्षिपेत्
षड्रास्याधिके याम्यञ्च षड्राश्यूने दिगुत्तरं
तज्याया खाश्विभिर्घातं वेदतत्वैर्विभाजयेत्
फल चन्द्रस्य विक्षेपं दिशम् ज्ञात्वा तु स्थापयेत्

तममानं दलं कृत्वा ततो द्विस्थञ्च स्थापयेत्
चन्द्रार्द्ध[1] योजयेदेके एके चन्द्रार्द्ध[2] शोधयेत्
योजितं छा-

१११ क पत्रे

दकं विद्यात् शोधितन्तु विमर्द्दकं ।

विक्षेपं छादके शोध्य ग्रासं भवति तस्य च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रभाने तु ग्रासोनं शेषं शुक्लाङ्गुलं भवेत्

विक्षेपं छादकं यच्च तुल्यमानं यदा भवेत्
न दृश्यते तम बिम्बे पर्वमात्त्रं विकल्पयेत्
विक्षेपमान स्वल्पञ्च ततो ग्रहणकं भवेत्

छादकञ्च विमर्द्दञ्च पृथक् वर्गाणि कारयेत्
तयो विक्षेपवर्गेणः मूलं कृत्वा पृथक् पृथक्
ततो मूलञ्च षष्ठिघ्नम् भक्तं भुक्तन्तरेण तं
स्थित्यर्द्धञ्च विमर्द्दञ्च स्थापयित्वा पृथक् पृथक् ।

स्फुटभोगञ्च स्व स्वन्तु स्थित्यर्द्धेन गुणीकृतं
षष्ठिभिर्भक्त लब्धञ्च । तात्कालचन्द्रपातयोः
शोध्य स्पर्शः युतं मोक्षं पाते व्यस्त क्षयाधिकं
विमर्द्देन तथैवञ्च आदौ शोध्यान्ते योजयेत्
ततो स्पर्शादिमध्यान्तं त्रैराश्यं स्थापयेत् शशि
विमर्द्द चादिमध्यन्तं तथैव स्थापयेत्
तात्का-

१११ ख पत्रे

लपात संस्थाप्य स्पर्शाद्या त्त्रयमेव च ।
स्पर्शः मोक्षञ्च विक्षेपं पूर्वदृष्टेन साधयेत्
ततो स्थाप्य तृविक्षेपं । स्पर्शमध्यान्तमेव च
विमर्द्दस्य तथैवञ्च विक्षेपं साधयेत्क्रमं
स्थित्यर्द्धञ्च विमर्द्दञ्च पूर्ववत्कारयेत्पुनः ॥
ततो स्थित्यर्द्धराद्यान्तम्विमर्द्दञ्च तथैव च ॥

प्राक् निशार्द्धे तु पर्वान्त । आदौ स्थित्यर्द्ध योजयेत्
अन्ते तु विवरं कृत्वा न मध्ये योज्य शोधयेत्
निशार्द्धे परतो पर्व विपरीत क्षयं धनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एव प्रत्यायनाडी च स्पर्शाद्यानुपूर्वशः ।
भास्करस्य स्वपर्वान्ते एवम्प्रत्याय साधयेत्
विमर्द्दर्द्धन्तथैवं च पर्वान्ते क्षय क्षेपयेन्

ततो प्रत्यायप्राणाञ्च ऋलेषु चान्तर कृतं
अधिकोणम्विदित्वा तु जीवा तु मानयेत् क्रयम्
तं ज्याया शोध्य व्यासार्द्धे प्रत्यायाधिक योजयेत्
स्वाक्षज्यया गुणन्ताञ्च व्यासार्द्धेनाप्त चापयेत्
निशार्द्धपूर्वतो सौम्या । प-

११२ क पत्रे

रे दक्षिण दिक् भवेत्
त्रेराश्यस्पर्शमध्यान्तं तं चन्द्रा स्थापयेत्क्रमं

स्पर्शमध्ये त्रिराश्युप्य मोक्षे त्रिराशि सोधयेत्
तं ज्याया यथान्यायां क्रन्तिघ्ना तृज्याया हृतं
चापं कृत्वा तु क्रन्तिज्या । षड्राश्यूने दिगुत्तरं
षड्राश्याधिक याम्यञ्च दिशं ज्ञात्वा त्त्रयं बुधैः ।

स्पर्शमध्ये तत क्रान्ति स्पर्शमध्या क्षयैः सह ।
दिग्समे योजयित्वा तु दिग्भेदे तु विसोधयेत्
मोक्षे दिग्समे शोध्य दिग्भेदे सह योजयेत् ।

तस्यार्द्धं ज्या क्रमम् कुर्यात् छादकेन गुणीकृतं
व्यासार्द्धेन विभक्तञ्च अक्षस्य वलनं भवेत्
विक्षेपवलन यच्च दिग्समे विमिश्रयेत्
दिग्भेदे शोधयेत् ततु स्फुटविक्षेपकं भवेत्

अस्य सूत्रस्याङ्क
स्फुटेन्दुभुक्ति गुण ३ भाग ७२ फल चन्द्रप्रमाण
स्फुटार्कभुक्ति गुण ११ भाग २० फल रविमान ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूय स्फुटार्कभोग गुण २५०। चन्द्रस्फुटभोग गुण ८०॥
तयो विवरं कृत्वा भाग ६०२ फल तमप्रमानं भवति ॥
पाते चन्द्र विशोध्य ज्या गुण २० भाग २५४ फल वि-

११२ ख पत्रे

क्षेपं भवति ॥०॥

परिलेख तत्र कर्त्तव्यं ज्यार्द्ध मण्डलवर्जितं ।
समे भूमौ लिखे बिन्दु चन्द्रार्द्ध वृत्तमालिखेत्
सम्पर्कार्द्ध न्ततो लिख्य बिन्दु मध्यगतन्तत ॥
प्राक्परे ताडयेत्सूत्रं याम्य सौम्य ततो पुन ।
प्राक्परे सूत्ररेखाग्रे सम्पर्कस्य च मण्डले
स्फुटविक्षेप संस्थाप्य नयेत् सूत्रं यथादिशं
विक्षेपस्य वशं तत्र मध्यकर्माणि कारयेत्
विक्षेपौद्यन्तचिह्ने न मत्सपुच्छानि कारयेत्
मत्सेन मध्यबिन्दुं च रज सूत्रेण ताडयेत्
तत्सूत्र आगतीकृत्य विक्षेपं विनिसारयो
विक्षेपान्ते ततो चिह्ने तृविक्षेप तृबिन्दुकं
स्पर्शविक्षेपचिह्ने न मध्यबिन्दु ताडयेत्
चन्द्रबिम्बे स्पृशे यस्मिं तस्मिं स्पर्श विजानयेत्
मध्यविक्षेपचिह्ने तु तमार्द्ध स्य प्रस्थापितं
मण्डलं भ्रामयेत्तत्र अनेन यत्र च्छादितं
तत्र कृष्णं भवेद् बिम्ब ग्रासमध्यं विजानयेत्
मोक्षविक्षेपचिह्ने न ताडयेत्मध्यबि-

११३ क पत्रे

न्दुकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रबिम्बे स्पृशे यस्मिं तस्मि क्षोभं विदुर्बुधैः
इति ॥०॥

चन्द्रसूर्यौ तु जामित्त्रे पक्षान्ते रात्त्रिपर्वाणि ।
चन्द्रपातञ्च मेकस्थे निकटे सय सप्तमे
चन्द्रोपरागमित्येवं दर्शनं चोपलक्षयेत्
सूर्यचन्द्र यदेयस्थे यासान्ते दिनपर्वाणि
सूर्यापात यदैकस्थे चासन्ने सप्तमेपि वा ।
सूर्यस्य ग्रहणन्तत्र । एतेस्तु लक्षणैर्यदा ॥

भूच्छायया प्रच्छादन्ति चन्द्रबिम्बन्तु निश्चय
चन्द्रेण च्छादते सूर्यां एवं ग्रहणकं भवेत्

इन्द्रोस्तावद्वक्ष्यामि ग्रहणन्तु सुनिश्चयं
पूर्णिमास्यार्द्धरात्त्रौ तु मध्यमा साधयेत्तत ॥
ततो चन्द्रार्क्कपातञ्च चन्द्रोचस्य तथैव च ।
स्फुट कृत्वा तु पूर्वोक्त स्फुटभुक्तिञ्च साधयेत्
पर्वान्तं साधयेत्तत्र पूर्व्वदृष्टेन कर्मणा ।
ततो पर्वान्तप्राणघ्नम् घात मध्यमभुक्तिकं
भाजये चक्रलि–

११३ ख पत्र

प्रेन २१६०० लब्ध लिप्तविलिप्तक
स्वमध्यमे तु स्वलब्धं प्राक् निशार्द्धे विशोधयेत्
अर्द्धरात्र्यात्परे योज्य पातेश्चैव विपर्ययेत्

स्वमध्यमं स्वमन्दोचे शोध्य केन्द्र ततो भुक्तं
तृराशौ शोध्य कोटि स्यात् तयोर्ज्या तु पृथक् न्यसेत्
स्वमन्दवृत्तिना घातं स्वमन्दच्छेदकैर्हृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लब्धं लिप्तविलिप्ता च भुजकोटिफलं भवेत्
ज्यार्द्धकोटीफल शोध्य केन्द्र कर्क्कटकादिके ।
मृगादौ योज्य तद्वर्गे । बाहोः फलकृतिं क्षिपेत्
मूलं कृत्वा तु चन्द्रार्कौ । कर्ण्ण चन्द्रार्क्कयोः पृथक् ॥

अथवा मध्यभोगेन व्यासार्द्ध सा गुणीकृतं
स्फुटभोगेन भक्तञ्च कर्ण्णं भवति यत्फलं

भुज्यज्या घात ज्यार्द्धेण कर्ण्णेनाप्तन्तु चापयेत्
यदि केन्द्रञ्च मेषादौ मध्यमे योज्य स्वं फलं
तुलादौ शोधयेत्तत्र एवां तात्कालमध्यमां

ज्यार्द्धे–

११४ क पत्रे

न मध्यभोगाघ्नं स्वकर्ण्णेन विभाजयेत्
स्फुटभोग भवेत्तत्र चन्द्रभास्करयो पृथक् ॥

समलिप्त यदि न स्यात् । अनेन पर्व साधयेत्
सर्वेण स्फुटभोगाघ्नं षष्ठिभिर्भाज्ययेत्फलं
अर्द्धरात्राग्रतो शोध्य परतो तु नियोजयेत्
समलिप्तं भवते ह्येवं ततो कर्माणि कारयेत्

अनेन समलिप्तेन अनेन स्फुटभुक्तिना
चन्द्रसूर्यस्य कर्ण्णेन तत कर्माणि कारयेत्

चन्द्रभू शून्यद्वारार्तु ६९०॥ सूर्यभू वसुतत्व च २५८॥
तमभू द्विर्थशून्यैक १०५२। भूविमर्द्ध खखार्तु च ६००॥
छेदभू खाद्रिरामञ्च ३७०॥

व्यासार्द्धेण गुणीकृतं ३४३८॥

एवा गुणकृतं यच्च स्थापयेच्च पृथक् पृथक् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्यभू सूर्यकर्णेन । छेदितां स्फुटभू भवेत्
चन्द्राकर्णेन च्छेदयेत्
एन्तु स्फुटभू सर्वं स्वं स्वं छेदेन च्छेदयेत्
चन्द्रभु मूर्च्छनैर्भक्तं २१॥ भद्रेण सूर्यभूर्हृतं ८॥
स्फुटभू तमभान्वोस्तु विवरं दिग्भिर्भाजितं १०।
अर्क्कभूः भूविमर्द्दञ्च विवरम्

११४ ख पत्रे

छेद कौशिकैः १४॥
प्रमानं भवतेत्तत्र चन्द्रादीनं पृथक्तनुं

पञ्चधा पञ्चधा मानं चन्द्रस्याद्या प्रवक्ष्यते ॥
षष्ठिभिः स्फुटभोगाघ्नं ६० कब्धिशक्रैर्विभाजयेत् १४४१॥
शून्यवेदेन सङ्गुण्य ४०। कर्तुरन्ध्रैर्विभाजयेत् ६६१॥
तृघ्नं द्वथद्रिभिर्भक्तं गुण ३ भाग ७२।
मगुण वेदाश्विभिर्हृतं भाग २४।
एतेषां भक्त लब्धानि प्रमाणञ्च निषापते ॥

भानो स्वस्फुटभोगेन मानान्तथैव साधयेत्
खखरामैर्वधम्भुक्ति ३०० तानार्थेन विभाजयेत् ५४६॥
खखरूपेन संगुण्य १००॥ शिखितीर्थेण भाजयेत् १८३॥
शरार्थेण हतन्तत्र ५५ खखरूपेण भाजयेत् १००॥
रुद्रघ्मन्नखभिर्भक्तं गुण ११ भाग २०। रविमानं भवेत्तत

खतत्वैर्रविभोगाघ्नं २५० खाष्टघ्नं शशिभुक्तिके ८०।
तन्तु शोध्यावशेषञ्च वेदशून्यरसैर्हृतं ६०४॥
तृघ्नं तु सूर्यभोगञ्च ३ चन्द्रभोगे विशोधयेत्
शेषां खखरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

११५ क पत्रे

पाघ्नं १००। पक्षकोषशिलैर्हृतं ७६२॥
चन्द्राक्कौ भुक्तिमिश्रञ्च खखरूपै संगुणं १००।
पञ्चार्थसप्तभिर्भक्तं ७५५। रविमानेन शोधयेत् ।
चन्द्रमानञ्च खाष्टघ्ने ८०। सूर्यं दस्राश्विभिर्हृतं २२।
तन्तु शोध्यावशेषाञ्च जिनैर्भक्तन्तमं भवेत् २४॥

वेदघ्न रविभोगन्तु ४ चन्द्रभोगे विशोधयेत्
लोकदस्रैर्हृतं लब्धं २३ विमर्द्दस्य तनु भवेत् ॥
शतघ्न सूर्यभोगञ्च १०० चन्द्रभोग दशघ्नके १०
तयोस्संमिश्रयित्वा तु भक्त पञ्चाब्धिलोचनैः २४५।
रविमानेन संशोध्य विमर्द्दमानयं भवेत् ॥
रुद्रघ्नं रविभोगन्तु ११ षट्भिघ्नं शशिभुक्तिके ४०।
संशोध्य खाब्धिभि भक्तं ४० विमर्द्दमानकं भवेत् ॥
अथ संक्षेपकाले च लघुकर्मेण कारयेत्
चन्द्रमानन्तमे शोध्यं अर्द्ध कृत्वा विमर्द्दकम् ॥०॥

अनुलोम

११५ ख पत्रे

विलोमेन विक्षेप तत्र कारयेत्
पातं विशोधये चन्द्रे नशुद्धे मण्डलं क्षिपेत्
यच्च शोध्यावशेषाञ्च षड्राश्यूने दिगुत्तरं
षड्राश्याधिकयाम्यञ्च जीवा तु मानयेत्तत ।
विक्षेपेण वधन्तं ज्या २७० व्यासार्द्धेन विभाजयेत्
त्रिंशघ्नं कारयेत् वाथ ३० द्व्यष्टरामैर्विभाजयेत् ३८२ ॥
खखरुपैर्गुणम्वाथ १०० शैलसूर्येण विभाजयेत् १२७ ।
लब्धं विलोमविक्षेपं शशांकस्य न संशयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूयश्चैवानुलोमेन विक्षेपञ्च प्रवक्ष्यते ।
पाते विशोधयेच्चन्द्रं अभावेत्मण्डलम् क्षिपेत्
एवं कृत्वा तु विक्षेपं अनुलोमं विजानयेत्

तमचन्द्रं च संयुक्तं योगमानं भवेत्तत ।
योगमानदल कृत्वा तु योगार्द्ध स भवेत्तत

योगार्द्धे चन्द्रमानोनं एवन्तस्य विमर्द्दकं

योगार्द्धश्चैव विक्षेपतुल्यमानं यदिर्भवेत्
ग्रह-

११६ क पत्रे

णन्तत्र न विद्यन्ति पर्वमात्त्रं भवेन्ति सः
यदि विक्षेप स्वल्पञ्च तदा ग्रहणकं भवेत्
योगार्द्धे शोध्य विक्षेपं शेष ग्रासं भवेन्ति सः ॥

चन्द्रे विशोधये ग्रासं शेष शुक्लंगुलं भवेत्

यदि ग्रासाधिकश्चैश्च विपरीतेन शोधयेत्

योगार्द्धश्चैव विक्षेपं विलिप्ता वर्ग कारयेत्
योगार्द्ध वर्गे संशोध्य विक्षेपावर्गमेव च ॥
शेषेण मूलमानीयः भूच्छेदेन विभाजयेत् ॥
भुक्त्यन्तरेण वा भक्तम् स्थित्यर्द्ध घटिकं भवेत् ।

स्थित्यर्द्ध नाडिप्राणघ्नं स्वम् स्वं भोगञ्च संगुण ।
चक्रलिप्तेन तम्भक्तं फलं लिप्तविलिप्तकं
चन्द्र समकले शोध्य स्पर्शचन्द्रं भवेन्ति सः
योजितं तु भवे मोक्षं एवान्तात्कालचन्द्रमा
पातश्च विपरीतेन क्षयक्षेपाणि कारयेत्
सर्वग्रासे यदि श्चैव कृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

११६ ख पत्रे

त्वा विमर्द्दनाडिकं
विमर्द्दवर्गे संशोध्य विक्षेपाकृति तस्य हि ।
मूलं कृत्वा तत शेषं । भूच्छेदेन विभाजयेत्
अथ भुक्त्यन्तरेनाप्तं विमर्द्दनाडिकं भवेत्
तथा विमर्द्दभोगञ्च समलिप्ते क्षय क्षयेत् ।
विमर्द्दाविमर्द्धान्तं । तथा तात्कालचन्द्रमां ॥
स्पर्शमध्यविमोक्षञ्च । त्रैराश्या स्थापये शशिं
विमर्द्दस्यादिमध्यान्तं । तथा राशित्त्रयं शशि
स्पर्शमध्यविमोक्षञ्च पातं चैव तथा त्त्रयं ।
एवं त्रयत्त्रय राशौ ज्ञात्वा कर्म समारभेत्
स्पशेन्दौ स्पर्शपातोनं मोक्षे मोक्षेण शोधयेत्
पूर्वदृष्टेण कर्मेण विक्षेपं साधयेत्ततः ।
विमर्द्दादि विमर्द्दान्ता विक्षेपां साधयेत्तथा ।
चतुर्णाम्मपि विक्षेपं वर्गञ्च कारये पृथक्
पूर्वयोगार्द्धवर्गञ्च चतुर्द्धा स्थापयेत्क्रमं
चतुविक्षेपवर्गेण शोधितं मूलम्

११७ क पत्रे

मानयेत्
स्पर्शविमोक्षविक्षेपौ ताभ्यां संशोध्य मूलयेत्
तत्मूल भक्त भूच्छेदैः स्थित्यर्द्ध स्पर्शमोक्षयोः
विमर्द्दादि विमर्द्दान्त विक्षेपाभ्याम्विशोधितम्
तत्मूल भाजित लब्ध विमर्द्दनाडिकौ भवेत् ॥
एवं स्थितिविमर्द्दार्द्धम् नाडिका स्पर्शमोक्षयोः
निशार्द्ध प्राक्परे ज्ञात्वा पर्वान्तां स्थापयेत्त्रयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थित्यर्द्धस्य च पर्वान्तमेकधा चान्तरं कृतं
एकत्रे योजयेत्तत्र मध्ये न स्या युतं क्षयं
निशार्द्ध परतो यद्वत् विवरं स्पर्शनाडिका ।
योजितं मोक्षमित्याहु प्राक् निशार्द्धे विपर्ययेत्
एवं प्रत्यायनाडी च स्पर्शमध्यान्तमेव च ।
विमर्द्देन तथैवञ्च पर्वान्ते शोध योजयेत्
आदौ निमीलनं विद्या अन्ते मुन्मीलनन्तथा

क्रमेण त्रयपर्वन्त प्राणपिण्डञ्च कारयेत्
भाजये खखतीर्थेन

११७ ख पत्रे

१८०० लब्धं राश्यादय क्रमं ।
शेष त्रिंशगुणं कृत्वा तेनैवाप्ता तु रंशका ।
षष्ठिघ्नं भाज्य लिप्ता च । स्थाप्य लग्न क्रमेन तु ।
तात्तृराशौ विशोध्यानि नशुद्धे प्रतिशोधयेत्
जीवा तु मानयेत्तत्र तं ज्यार्द्धे तु विशोधयेत्
प्रतिशोधित जीवा तु व्यासार्द्धे विशोधयेत्
अथवा ऋले विशोध्यानि नशुद्धे प्रतिशोधयेत्
तं ज्याया शोध्य व्यासार्द्धे । प्रतिज्याया नियोजयेत्
स्वाक्षज्याया हत तञ्च । व्यासार्द्धेन विभाजयेत्
फलञ्चापन्तु कर्त्तव्यां अक्षज्याया भवन्ति च
पर्व निशार्द्धे पूर्वे तु स्पर्श शोध्याक्ष चोत्तरम्
निशार्द्धपरतो याम्यां मोक्षाक्षञ्च विपर्ययेत्

स्पर्शमध्यविमोक्षञ्च त्रैराश्या स्थापये शशिः
तस्मि स्पर्शमध्ये च । तृराशिञ्च नियोजयेत्
मोक्षे राशित्रयं शोध्य ज्यामानी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

११८ क पत्रे

य क्रमेन च ।
तं ज्या स्वापक्रमैर्घातं व्यासार्द्धेन विभाजयेत्
चापं कृत्वा तु तल्लब्धं क्रन्तिज्याया भवेति सः ।
षड्राश्याधिक याम्या च षड्राश्यूने दिगुत्तरं

अक्षज्या क्रान्तिजीवा च दिक्समे तु नियोजयेत्
दिग्भेदे विवरम् कृत्वा दिशं यस्याधिकं भवेत्
तस्यार्द्धं जीवमानीय ज्यासिद्धं द्विगुणीकृतं
अक्षसूत्रं भवे लब्धं प्रतिराशिञ्च स्थापयेत्

संपर्कार्द्धेण घातञ्च व्यासार्द्धेण विभाजयेत्
तल्लब्ध चाक्षसूत्रञ्च विक्षेपा स्यानुलोमयोः ।
दिक्समे योजयित्वा तु दिग्भेदे विवरं कृत्वा
यस्याधिकं ततो दि स्यात् ज्ञात्वा स्थाप्य यथादिशं
विलोमस्य च विक्षेपं विपरीतयुतक्षयं
ज्यार्द्धे बिम्बेन तस्य परिलेखञ्च सिध्यति ।

अस्यानुलोमसूत्रञ्च विलोमञ्च प्रवक्ष्यते ।
प्रत्यायस्पर्शम–

११८ ख पत्रे

ध्यञ्च प्राक् निशार्द्धे तु दक्षिणं
निशार्द्धे परतो सौम्याः मोक्षश्चैव विपर्ययेत् ।
एवं प्रकल्पितं जीवा पूर्वदृष्टेन कारयेत् ।

त्रैराश्या स्पर्शमध्ये तु तत्र राशिं विशोधयेत्
मोक्षे नियोजये तत्र ज्यामानीं च पूर्ववत्
ततो क्रन्ति च ह्याक्षञ्च पूर्ववज्जीवमानयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो विलोमसूत्रञ्च ज्ञात्वा कर्मञ्च कारयेत् ॥

यथाक्षसूत्रपक्षे त स्फुटं येन विजानयेत्
स्पर्शमध्यन्तचन्द्रञ्चा त्रैराश्या स्थापयेत् ॥
क्रमे राशित्रयं क्षेप्य । क्रन्तिजीवा तु मानयेत्
षड्राश्याधिक याम्या च । षड्राश्यूने दिगुत्तरं

पर्वान्त चार्द्धरात्रूने । अक्षज्या दिशि चोत्तरं
अधिके दक्षिणन्तत्र दिशं चैवोपलक्षयेत्

अक्षज्या क्रन्तिजीवा च । दिक्समे तु नियोजयेत्
दिग्भेदे चान्तरीकृतं दलं कृत्वा तु तं जीवा
द्विगुणं तारयेत्ततः

११९ क पत्रे

एवं यथा सरूपञ्च अक्षसूत्रं विजानयेत् ॥

अनुलोम विलोमञ्च स्वरूपन्त त्रय तथा
विदित्वा चाक्षसूत्रञ्च परिलेखानि कारयेत्

अक्षसूत्रञ्च व्यासार्द्ध तानैर्भक्त फलं भवेत् ४६॥

समे मूव्या लिखेद् बिन्दु चन्द्रार्द्ध वृतमालिखेत्
सम्पर्कार्द्धञ्च व्यासार्द्ध स्वमानं वृतमालिखेत्
त्रयाणां कृतमध्येषु मध्यबिन्दौ स मध्यत ।
पूर्वापर तमायामा । तस्मिं सूत्रेण ताडयेत्
याम्येत्तरे पुन तस्मिं रज सूत्रेण ताडयेत्
पूर्वपश्चिमरेखाग्रे संपर्कार्द्धस्य मण्डले
आद्यन्ता मनुलोमाक्षम् स्थाप्य यथादिशं नयेत्
तस्यान्ते ताडयेन्मध्यं योगार्द्धे स्पृशते यस्मिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आद्यान्ते तु विचिंह्नयेत् तस्मिं माद्यान्तविक्षेप
स्थापयित्वा यथादिशं ॥

अतः परं प्रवक्ष्यामि विलोमस्य च कर्मणि
अक्षसूत्रञ्च विक्षेप स्वं स्वं स्थाने निधापितं
माप-

११९ ख पत्रे

ये दिग्विलोमेन आद्यान्त तत्र मेव च ॥

पुनः वक्ष्यामि चाक्षस्य स्वरूपस्य विधानत ।
स्पर्शे यथादिशं स्थाप्य मोक्षे स्थाप्य विपर्ययेत् ॥७॥
ज्यार्द्धबिम्बे विना तत्र परिलेखानि कारयेत्
स्फुटविक्षेपकश्चैव स्थापयित्वा यथादिशं ॥
मध्यकर्मम्प्रवक्ष्यामि विक्षेप विविधा गति ।
यद्यानुलोमविक्षेपं अनुलोमेन कारयेत्
विक्षेपस्य वशात्तत्र बिम्बदेशं समाश्रयेत्
विलोमस्य विपर्येण बिम्बपार्श्वं समाश्रयेत्
ज्यार्द्धे याम्याग्रे सूत्राग्रे मध्याक्षं स्थापयेत्तत
अनुलोमाक्षविक्षेप दिग्भेदे पूर्व मापयेत्
समदिशे पश्चिमं रेख विलोमस्य तथैव च ।
विक्षेपं तु विलोमञ्च ह्यनुलोमाक्षसूत्रकम्
दिक्समे पूर्वरेखञ्च दिग्भेदे पश्चिमा भवेत् ॥

अथ राद्यन्तवि-

१२० क पत्रे

क्षेपं ताभ्या मत्सानि कारयेत्
तन्मत्सान्मध्यबिन्दौ तु रज सूत्रेण ताडयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्य विक्षेप निसृत्य तत् सूत्रानुगतीकृतं
ततो राद्यन्तविक्षेपं मेव च ।
त्रयाणान्ते विचिह्ने त स्वं स्वं ज्ञात्वा पृथक् पृथक् ।
त्रयाणां चिह्नमध्ये तु । रज सूत्रेण ताडयेत्
तद्रेखा तमस पंथा स्पर्शाद्यामनुपूर्वश
प्रविश्यति ततो मार्गात् शशिबिम्बं प्रच्छादयति
तमस्यार्द्धप्रमानञ्च शलाकञ्च प्रवेशयेत्
यस्मिं बिम्बे स्पृशे चादौ तस्मिं स्पर्शं विजानयेत् ।
पूर्णग्रास भवे यस्मिं तस्मिं मध्यं विजानयेत्
निष्क्रान्ता तमसा यस्मिन्तस्मिं मोक्षं विजानयेत् ॥

अथवान्यप्रकारेण तममार्ग

१२० ख पत्रे

विवक्ष्यते ।
स्पर्शविक्षेपचिह्ने न मध्यबिन्दुञ्च ताडयेत्
चन्द्रबिम्ब स्पृशे यस्मि स्पर्शं विजानयेत्
मध्यविक्षेपचिह्ने न तस्मिम्मध्य कृतस्ततो
तमार्द्ध माणसूत्रञ्च मण्डलम्परिभ्रामयेत्
तद्वृतेन तु संच्छाद्य तत्र मध्यं विजानयेत्
मोक्षविक्षेपचिह्ने न मध्यबिन्दुञ्च ताडयेत्
सोमबिम्बे स्पृशे यस्मि तस्मि मोक्षं भवेति सः ॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताडपत्रोपलब्धस्य सुमतितन्त्रस्य
चन्द्रग्रहणाधिकारः समाप्तः ।
अतः परं सूर्यग्रहणाधिकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रोपरागस्य परेण तत्र । सूर्योपरागन्निपुनं प्रवक्ष्ये ।

साध्य ह्यमावास्यदिने प्रयत्नम् आदित्यचन्द्रा शशिनोच्चपाताः
कृत्वा तु मध्याह्निकमध्यमञ्च पर्वान्तमानीय यथैव पूर्वं
तात्कालिकं पूर्ववदेव कुर्यात् कर्णा विशेषेण स्फुटे प्रकु-

१२१ क पत्रे

र्यात्
तात्कलिकं स्या भवते रविन्दोस्तात्कालभुक्तधार्क शशिप्रमाने ।
पूर्वे च कृत्वा तु यथाक्रमेण । तात्कालिकार्केण तु साधनीया
अपक्रमादी द्युनिशार्द्धमानम् क्षितिज्ययाश्चैव चनासवश्च
दिनार्द्ध नाडी च ततो प्रकुर्यात् तात्कालशंकुञ्च यथैव पूर्वं
सर्वत्र कुर्या निपुनीकृतेन ॥

शोध्या दिनार्द्धे यदि पर्वनाड्यः मध्याह्नतः प्राक्परतो नियोज्य
प्राणीकृताभी रहिता युताभिः कुर्यात्क्रमेणोदयलग्नमानं ॥
तात्कलिकार्केण तु साधनीयं त्रिंशांशके शोध्य सभुक्तशेषाः
कालां हनेत् स्वैरुदयासुपिण्डैः विभज्यमष्टादशभिः शतैश्च ।
प्राणीकृतां प्राणमपास्य लब्धं राशिं क्षिपेद्भागमपास्य भुक्तं
गते गते राश्युदयप्रमाणे एकेण कर्म्मे विनियोज्य राशि
त्रिंशङ्गुण शेषगतो परेण प्रा-

१२१ ख पत्रे

णेन लब्धांशकमेव योज्या ।
शेषञ्च षष्ठया गुणितं विभज्य । लिप्ताविलिप्ता क्रमशस्ततो ज्याः

पूर्वापरा वा दिनमध्यतो याः प्राणीकृताः पार्विकनाडिका स्युः ।
ताभिस्तथैवापि च मध्यलग्नं मध्योदयेन ह्यपराह्नसंस्थे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वाह्नसंस्थे रहितां गतांशैः स मध्यलग्नो भवतीति वेद्य ।

काष्ठेन हृत्वा परमेण तज्यां ।विभज्य विष्कम्भदलेन लब्धं
तच्चापभागोक्षसमुच्छ्रयांशे । लग्नोत्तरे शोध्य नियोज्य याम्ये
अक्षांश ऊने दिश उत्तरः स्यात् अक्षाधिके दक्षिण एव तज्याः ॥

सा मध्यजीवोदयलग्नजीवा मध्याज्याया संगुणितं विभज्या ।

स्व-

१२२ क पत्रे

लम्बकं व्यासदलेन गण्य ज्येष्ठावयातेन विभज्य लब्धैः ।

लम्बको नाम ३०६३॥ ज्येष्ठापरातो नाम १३६८॥

हृत्वा कृति मध्यज मौविवर्गे । विशोध्य दृक्षेपकवर्गमाहुः
कृत्वा पृथक्तस्य यदत्र मूलं दृक्षेपकज्यादिशमध्यमोर्वी ।

मध्याह्न पूर्वापरपर्व नाडी दिनार्द्ध नाड्यामपनीय य स्यात् ॥
प्राणीकृतात्पूर्ववदेव कार्यस्तात्कालशङ्कुञ्च यथाक्रमेण
तच्छङ्कुवर्ग विशरार्द्ध वर्गे । शोध्य द्विधा मूलमपास्य दृक्ज्याः ।

तद्वर्गदृक्षेपकवर्गयोश्च विश्लेषमूलं त्विह दृग्गतिज्या

तादृग्गतिज्यान्तु नवाब्धिनागैः हृत्वा फलं दृग्गतिनाडि-

१२२ ख पत्रे

काः स्युः॥

खसप्तसप्ताश्विशरं शतघ्नं ॥५२७७०। सूर्यस्य भोगेन विभक्त लब्धैः
भाज्या शतघ्नामथ दृग्गतिज्या । सूर्यस्य सा दृक्गतिलिप्तिकाः स्युः ॥

दृग्यातनाडी दिनमध्यज्यायां योज्या तिथिच्छेदकपर्वनाड्यां
प्राह्ने हरेद् दृग्गतिलिप्तकास्ताः क्षेपोपराह्ने समलिप्तसूर्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाड्यानयानेन च भास्करेण । लग्नादयो दृग्गति नाडिकान्तां
निर्वृत्य निर्वृत्य यथाक्रमेण । कार्या न यावत् स्थिरतां प्रयान्ति ॥
स्थिरीकृता दृग्गतिनालिका सा । ग्रोज्या तिथिच्छेदकपर्वनाड्यां
पूर्वापरा वा दिनमध्यतः स्युः एतावतीभिर्ग्रहणस्य मध्ये ।

